

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्



Free

8

# संस्कृतकौमुदी

## अष्टमी कक्ष्या

(प्राच्यपाठशालानाम्)

8th Sanskrit Reader
(Main Language)

तेलंगाणप्रभुत्वप्रकाशनम्
हैदराबाद्

तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम्

TELANGANA

# माहेश्वरसूत्राणि

अ इ उ ण्
ऋ ऌ क्
ए ओ ङ्
ऐ औ च्
ह य व र ट्
ल ण्
ञ म ङ ण न म्
झ भ ञ्
घ ढ ध ष्
ज ब ग ड द श्
ख फ छ ठ थ च ट त व्
क प य्
श ष स र्
ह ल्





नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम् ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥



चरणौ मृदुलौ स्वल्पौ
मावगच्छ निरर्थकौ ।
प्रश्नवारिदमारुह्य
ज्ञानवृष्टिकणान् पिब ॥

सम्प्रति समस्तच्छात्राणां विद्यायाम् अधिकारः अस्ति ।
यतो हि अधुना विद्यास्वाम्यनियमः (R T E) आगतः ।

SCERT TELANGANA

# संस्कृतकौमुदी

## अष्टमी कक्ष्या

## (प्राच्यपाठशालानाम्)

*8th Sanskrit Reader (Main Language)*

### सम्पादकमण्डली

**आचार्य विरिवेण्टि मुरलीधरशर्मा**
शिक्षाविभागः
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः

**डा. दोर्बल प्रभाकरशर्मा**
विश्रान्तप्राचार्यः
संस्कृतकलाशाला
कोव्वूरु, पश्चिमगोदावरी जिल्ला

**विद्वान् तिगुल्ल श्रीहरिशर्मा**
विश्रान्तप्राचार्यः
श्रीराजराजेश्वरसंस्कृतकलाशाला
वेमुलवाडा, करीम्नगर्जिल्ला

### संयोजिका

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**
उपन्यासिका
राज्यविद्यापरिशोधनशिक्षणसंस्था
हैदराबाद्.

### विषयनिपुणौ

**आचार्य रमाकान्त अग्निहोत्री**
विश्रान्तप्रवाचकः
दिल्लीविश्वविद्यालयः, नवदेहली

**सुवर्ण विनायकः**
संयोजकः
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

### पाठ्यपुस्तकविकासमुद्रापकसमितिः

प्रधाननिर्वहणाधिकारी
**श्री.डा.सत्यनारायणरेड्डि,**
सञ्चालकः
राज्यविद्यापरिशोधनशिक्षणसंस्था
हैदराबाद्

निर्वाहकः
**आचार्य नन्नूरु उपेन्द्र् रेड्डि**
आचार्यः, विद्याप्रणालिकापाठ्यपुस्तकविभागः
राज्यविद्यापरिशोधनशिक्षणसंस्था,
हैदराबाद्.

प्रधानव्यवहारनिर्वाहकः
**श्री बि.सुधाकरः**
सञ्चालकः
प्रभुत्वपाठ्यपुस्तकमुद्रणालयः,
हैदराबाद्.



*सत्यमेव जयते*
*विद्या ददाति विनयम्*

**तेलंगाणप्रभुत्वप्रकाशनम्**

*धर्मो रक्षति रक्षितः*
*कृषितो नास्ति दुर्भिक्षम्*

SCERT TELANGANA

© Government of Telangana, Hyderabad

*First Published 2013*
*New Impressions 2014, 2015, 2016, 2017, 2018*

**All rights reserved**

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published and without a similar condition including this condition being imposed on the subsequent purchaser.

The copy right holder of this book is the Director of School Education, Hyderabad, Telangana.

This Book has been printed on 70 G.S.M. SS Maplitho
Title Page 200 G.S.M. White Art Card

**तेलंगाणप्रभुत्वस्य निश्शुल्कवितरणम् 2018-19**

SCERT TELANGANA

*Printed in India*
at the Telangana Govt.Text Book Press,
Mint Compound, Hyderabad,
Telangana.

# पुरोवाक्

संस्कृतं भारतीयानां सांस्कृतिकवैज्ञानिकभाषात्वेन परिगणय्य प्राथमिकस्तरे पाठ्यपुस्तकानां रूपकल्पनं ''संस्कृतकौमुदी'' इति नाम्ना सर्वकारेण 2011-12 तमे विद्यासंवत्सरे आरब्धम् । प्राथमिकस्तरे तृतीयकक्ष्यातः संस्कृते श्रवणभाषणपठनलेखनकौशलानाम् अधिगमनं प्राच्यपाठशालासु भवति । यद्यपि तृतीय-चतुर्थ-पञ्चमकक्ष्याणां पाठ्यपुस्तकानि तेलुगुलिप्या निबद्धानि तथापि षष्ठकक्ष्यातः देवनागर्या एव तानि उपनिबद्धानि ।

छात्रेषु व्यक्तित्वनिर्माणं, साहित्याभिरुचिः, सामाजिकचिन्तनं, मानवीयमूल्यानि इत्यादीनंशान् आधृत्य इदं पाठ्यपुस्तकं निर्मितमस्ति । तदनुगुणं प्राचीनार्वाचीनसाहित्यतः, निबन्धः, आत्मकथा, दण्डकं, वचनकविता इत्यादीनां भाषाविषयिकाणां प्रक्रियाणां परिचयः अत्र कृतः वर्तते । तदर्थं विविधप्रान्तीयानां रचयितॄणां रचनाः अत्र स्वीकृताः सन्ति ।

RTE 2009 अनुसृत्य छात्रैः सर्वैः साधनीयानि सामर्थ्यानि दृष्टौ निधाय प्रत्येकमपि पाठ्यांशस्य अन्ते अभ्यासाः सज्जीकृताः। एते अभ्यासाः छात्रेषु आलोचनशक्तिं, विश्लेषणपाटवं, विभिन्नदृष्ट्या एकस्य विषयस्य अवगमनकौशलं, समकालिकसामाजिकांशानां समन्वयावगाहननैपुण्यम् इत्यादिबहुविधान् मानसिक-बौद्धिक-भाषिक-सांस्कृतिकविकासान् छात्रेषु वर्धयन्तीति आशास्महे ।

पाठशालादशायाम् इमाः कक्ष्याः उन्नताः इत्यतः भाषाविषये विशिष्टानपि अंशान् अवगन्तुम् अपेक्षिताः व्याकरणांशाः अत्र उपनिबद्धाः । व्याकरणम् अल्पप्रयासेन अवगन्तुं कण्ठस्थीकरेणन विना स्वयमेव सूत्राणि च सज्जीकर्तुम्, उदाहरणेषु तानि समन्वयितुं च अभ्यासाः समारचिताः सन्ति । पाठ्यपुस्तकस्य अन्तेऽपि 'पदकोशः' इति नाम्ना निघण्टुः उपनिबद्धः अस्ति ।

कक्ष्याप्रकोष्ठे उपाध्यायैः आनुकूल्येन बोधयितुम् अत्र सोपानक्रमानुसारं पाठ्यांशाः आयोजिताः। छात्रेषु पठनाभिरुचेः वर्धनाय सर्वस्यापि पाठस्य आरम्भे श्लोकाः, प्रश्नाः, घटनाः, कथाः, चित्राणि इत्यादीनि उपनिबद्धानि। भाषोपाध्यायैः - यथा छात्राः भाषां कक्ष्यायां स्वेच्छया उपयुञ्जीरन् तथा समुचितं वातावरणं कक्ष्याप्रकोष्ठे कल्पनीयम् । छात्राणां भावव्यक्तीकरणस्वेच्छा च तैः कल्पनीया । तथैव प्रश्नकरणाय अवसरश्च तेभ्यः पर्याप्ततया दातव्यः। पाठ्यांशगतस्य विषयस्य यथातथं विवरणस्य अपेक्षया भावस्य, विशेषांशानां मूल्यानां, कविहृदयस्य च अवगमनाय कक्ष्यायां चर्चाः आयोजनीयाः। गणकृत्यसदृशीभिः भागग्रहणानुकूलपद्धतिभिः बोधनाभ्यसनप्रक्रियायाः निर्वहणं करणीयम् । विशिष्टपदप्रयोगाः, सन्देशात्मकवाक्यानि, विचारजनकाश्च घटनाः पाठ्यांशेषु वर्तन्ते । एताः भाषाधिगमनं सार्थकं सम्पादयितुं छात्रेषु साहित्यविमर्शने प्राथमिकावगाहनम् अभिवर्धयितुं च सहकुर्वन्ति। तत्तत्सन्दर्भेषु अभ्यासानामनुसारं चर्चाः यथा भवेयुः, तत्र सर्वे छात्राः यथा भागं स्वीकुर्युः स्वाभिप्रायान् च यथा स्वेच्छया प्रकटयेयुः तथा अध्यापकैः ते प्रोत्साहनीयाः।

पाठ्यांशानाम् अनुबन्धतया ग्रन्थालयपुस्तकानि, परामर्शग्रन्थाः, साहित्येतिहासः, कवीनां चरितानि इत्यादीनां पठनार्थं समुचितं वातावरणं विद्यालये कल्पनीयम् । तदर्थं पाठशालायाः ग्रन्थालयाः पोषणीयाः।

एतस्य पाठ्यपुस्तकस्य रूपकल्पने उपकृतवद्भ्यः, उपाध्यायेभ्यः, उपन्यासकेभ्यः, विषयनिपुणेभ्यः, चित्रकारेभ्यः, कार्यसंयोजकेभ्यः, उट्टङ्केभ्यः, चित्रसंयोजकेभ्यः, पाठ्यप्रणालिकासदस्येभ्यः, मार्गदर्शनं कृतवद्भ्यः देहली विश्वविद्यालयस्य निवृत्ताचार्येभ्यः रामाकान्त-अग्निहोत्रिमहोदयेभ्यः सम्पादकमण्डल्याः सदस्येभ्यः च हार्दाः कृतज्ञताः।

एतस्मिन् पाठ्यपुस्तके पाठ्यांशतया स्वप्रकाशनेभ्यः विविधरचनाः सङ्ग्रहीतुम् अनुमतिं प्रदाय उपकृतवत्यै **संस्कृतभारत्यै** विशेषधन्यवादाः। पाठ्यपुस्तकमिदं छात्रेषु भाव्यधिगमाय आवश्यकानि सामर्थ्यानि, पाटवं च वर्धयतीति आशास्महे ।

**सञ्चालकः**
**राज्यविद्यापरिशोधनशिक्षणसंस्था,**
**हैदराबाद्.**

SCERT TELANGANA

# अध्यापकेभ्यः सूचनाः

- ❖ पाठ्यपुस्तकस्य उपयोगात् पूर्वमेव पाठ्यपुस्तकेन अपेक्षितानि सामर्थ्यानि ज्ञातव्यानि । तदर्थं पुरोवाक्, विषयसूची, अध्यापकेभ्यः सूचनाः इति शीर्षिकास्थान् विषयान् अध्यापकाः अवश्यं पठेयुः ।
- ❖ पाठ्यपुस्तकस्थं पद्यभागं, गद्यभागं च बोधयितुं प्रतिदिनम् प्रत्येकं एकः कालांशः भवति । इत्थम् एकस्मिन् विद्यासंवत्सरे पद्यभागस्य गद्यभागस्य च बोधनार्थं 220 कालांशाः भवन्ति ।
- ❖ अत्रस्थः पद्यभागः, गद्यभागो वा 150 कालांशेषु यथा बोधयितुं शक्येत तथा उपनिबद्धः अस्ति ।
- ❖ एकस्य पाठ्यांशस्य बोधनार्थं 12-15 कालांशाः उपयोक्तव्याः। तदनुगुणमत्र अभ्यसनस्य रूपकल्पनं करणीयम् ।
- ❖ पाठ्यभागस्य बोधनाय कालांशविभजनम् एवं कर्तुं शक्नुमः -

  उन्मुखीकरणार्थम् (1), विद्यार्थिनाम् अनुवाचनार्थम् (1), पाठ्यांशबोधनार्थम् (3), शृण्वन्तु-विचिन्त्य वदन्तु - इत्यस्य कृत्यस्य कृते (1), पठन्तु-अवगच्छन्तु - व्यक्तीकुर्वन्तु इत्यस्य कृत्यस्य कृते (1), सर्जनात्मकव्यक्तीकरणाय (1), स्वीयरचनार्थं (2), पदजालाभिवृद्धये (1), व्याकरणांशानां कृते (2), प्रशंसाकार्यार्थं (1), परियोजनार्थम् (1), आहत्य 15 कालांशान् विनियोक्तुं शक्नुमः।
- ❖ पाठ्यांशस्य बोधनं नाम ''उन्मुखीकरणम्'' इत्यारभ्य ''भाषांशाः'' इति शीर्षिकापर्यन्तं भवति इति विषयः मनसि स्थापनीयः।
- ❖ पाठ्यांशबोधनं नाम केवलं सारांशस्य बोधनं न, परन्तु निर्दिष्टे सर्वस्मिन्नपि अंशे छात्राणाम् अवगाहनम्, अधिकारश्च यथा जायेयाताम् तादृशवातावरणस्य प्रकल्पनमेव ।
- ❖ सर्वस्यापि पाठ्यांशस्य बोधनार्थम् अधिकाधिकं चत्वारः कालांशाः उपयोक्तव्याः । अन्यकालांशाः अभ्यासानां साधनाय उपयोक्तव्याः।
- ❖ पाठ्यांशबोधनसमये एतानि चत्वारि सोपानानि अनुसरणीयानि ।

  (अ) **उन्मुखीकरणम्** - एतदर्थं चित्राणि, घटनाः, कथाः, गीतानि, श्लोकाः, प्रश्नाः इत्यादयः निर्दिष्टाः।

  - चर्चया उन्मुखीकरणं करणीयम् । अत्र छात्रेषु सर्जनात्मकता यथा वर्धेत तथा प्रयत्नः करणीयः ।

  - चर्चया प्रश्नैः च शीर्षिकाप्रकटनं करणीयम् ।

  - पाठ्यांशचित्राणाम् आधारेण पाठ्यांशगतं विषयं यथा छात्राः ऊहेरन् तथा उपाध्यायैः प्रश्नाः करणीयाः।

  आ) **अर्थसङ्ग्रहणम् - पठनकृत्यम्**

  ''छात्रेभ्यः सूचनाः'' इति शीर्षिकागतस्य विषयस्य आधारेण छात्रैरेव विषयावगमनं कारयितव्यम् ।

  इ) **पाठ्यांशविषये चर्चा - अवगमनम्**

  उपाध्यायः बोधनव्यूहेन पाठ्यांशविषयाणाम् अवगमनं कल्पयितुं चर्चां निर्वहेत् ।

  ई) **अभ्यासानां साधनम्** - ''एतानि कुर्वन्तु'' इति शीर्षिकया अभ्यासानाम् आरम्भः भवति । सर्वेऽपि छात्राः अभ्याससम्पादने यथा श्रद्धां कुर्युः तथा अध्यापकैः प्रयतनीयम् ।
- ❖ पाठस्थानां विविधसन्दर्भाणां विषये छात्राः यथा स्पन्दनं, विश्लेषणं, समन्वयनं च कुर्युः, स्वीयवाक्यैः स्वयं वक्तुं च शक्नुयुः तथा अध्यापकेन कक्ष्यायां वातावरणं कल्पनीयम् ।
- ❖ **''शृण्वन्तु-विचिन्त्य वदन्तु''** इति कृत्यं पूर्णतया कक्ष्याप्रकोष्ठस्य कृत्यरूपेण कारयितव्यम् ।
- ❖ **पठन्तु-अवगच्छन्तु,** इत्यत्र स्थिताः अभ्यासाः गणशः कारयितव्याः। व्यक्तिशः कारयितुमपि अवसरः अस्ति ।
- ❖ व्याकरणांशानां बोधनसमये योग्यैः उदाहरणैः अवगमनं सम्पादनीयम् ।
- ❖ **स्वीयरचना, सर्जनात्मकव्यक्तीकरणम्, परियोजनाकार्यम्, प्रशंसा** इत्येतानि सामर्थ्यानि उद्दिश्य



SCERT TELANGANA

लेखनार्थं सम्पूर्णकक्ष्यायां सूचनाः देयाः । तदनन्तरं छात्रैः एतानि सामर्थ्यानि कारयितव्यानि । छात्रैः लेखनानन्तरं चर्चापद्धत्या समीकुर्यात् । तदनन्तरं स्वीयपुस्तिकासु लेखितुं समादिशेत् ।

❖ प्रत्येकमपि पाठेन साधितव्यानां सामर्थ्यानां साधनाय प्रणाली संरचनीया । संस्कृते पाठ्यप्रणाली अधो दत्तप्रकारेण निर्मातव्या ।

१. पाठस्य नाम -

२. पाठं बोधयितुम् आवश्यककालांशाः -

३. साधितव्यानि सामर्थ्यानि -

४. कालांशानुसारं विभागः -

| कालांश-सङ्ख्या | बोधनांशः | बोधनव्यूहः | सामग्री / संसाधनानि | छात्रेभ्यः दीयमानः अभ्यासः, गृहकार्यञ्च |
|---|---|---|---|---|
| | | | | |

५. पाठ्यबोधनार्थम् आवश्यकतातिरिक्तसमाचारसङ्ग्रहणम् (अध्यापककृत्यम्)।

६. पाठ्यबोधनानन्तरम् अध्यापकस्य प्रतिस्पन्दनानि (अनुभवाः, अनुभूतयश्च) ।

❖ एवम् 'एतानि कुर्वन्तु' इति शीर्षिकागतांशेषु एकैकं कतिभिः छात्रैः कृतमिति परिशीलयेत् । आवश्यकतानुसारं प्रत्याम्नायबोधनं निर्वोढव्यम् ।

❖ सामर्थ्यसाधनार्थं कदापि मार्गदर्शिकाम् (Guide), अध्ययनसामग्रीं (Study material) दृष्ट्वा प्रश्नानां समाधानानाम् अभ्यासानां च लेखनं न कारयेत् । यद्येवं दृष्ट्वा लिख्यते तर्हि अङ्काः न प्रदीयन्तेति वदेत् । स्वीयबुद्ध्या लिखितांशानेव परिशीलयेत् ।

❖ निरन्तरसमग्रमूल्याङ्कनविध्यनुसारं छात्रप्रगतिं प्रतिदिनं पञ्जीकुर्यात् । एतदर्थं प्रत्येकपञ्जीकरणपुस्तिका स्थापनीया।

❖ छात्रप्रगतिं निर्धारितसामर्थ्यानां प्रकारेण सूचयेत् ।

❖ निरन्तरसमग्रमूल्याङ्कनविधानेन जूलै, आगस्ट्, नवम्बर्, फिब्रवरीमासेषु आयोज्यमाननिर्माणात्मकमूल्याङ्कनेषु छात्राणां भागग्रहणपरिशीलनं (१०अङ्काः), लिखितविषयाः (१०अङ्काः), कृतपरियोजनाकार्याणि (१०अङ्काः), लघुपरीक्षा (२०अङ्काः) चेति एतैः चतुर्भिः छात्रप्रगतिं निर्धार्य छात्रप्रगतिसूचकपुस्तिकासु पञ्जीकरणं कुर्यात्। एतदर्थं प्रत्येकच्छात्रप्रगतिपञ्जीकरणपुस्तिका समुपस्थापनीया ।

❖ सेप्टेम्बर्/अक्टोम्बर्, डिसेम्बर्/जनवरी, एप्रिल्मासेषु अयोज्यमानसङ्ग्रहणात्मकमूल्याङ्कनार्थम् अध्यापकैरेव स्वयं सामर्थ्याधारितप्रश्नपत्रं निर्मातव्यम् ।

❖ पाठ्यांशानाम् आधारेण यथावकाशं मानवीयमूल्यानि, पर्यावरणम्, कलाः, अनुभवः, जीववैविध्यम् इत्यादिविषयाः कक्ष्यायां चर्चनीयाः।

❖ संस्कृतसाहित्ये अभिरुच्युत्पादनार्थं पाठशालाग्रन्थालये संस्कृतस्य प्राचीनग्रन्थाः आधुनिकग्रन्थाः च स्थापनीयाः।

❖ छात्रस्तरस्य ऊहने लेखनपरीक्षाः विना तेषां सर्जनात्मकशक्तिः, प्रतिस्पन्दनं, प्रवर्तनं, कार्यनिर्वहणदक्षता, व्यक्तित्वं, भाषाभिरुचिः इत्याद्यंशाः आधारत्वेन स्वीकरणीयाः । अत्र अध्यापकेन समुचितं प्रोत्साहनं देयम्। छात्राः परीक्षासु यथा स्वप्रतिभां पूर्णतया उपयुञ्जीरन् तथा अभ्यासाः तैः कारयितव्याः।

❖ जीवने विविधसन्दर्भेषु भाषाम् उपयोक्तुम् आवश्यकं शिक्षणं छात्रेभ्यः दातव्यम् । (उदा - सभानिर्वहणं, प्रसङ्गः, चर्चासु भागग्रहणं, लेखानां लेखनं, अपरिचितान् अंशान् पठित्वा अवगमनं, विषयविशेषस्य विश्लेषणात्मकं विवरणम् इत्यादिकम्)

SCERT TELANGANA

# वन्दे मातरम्

- बंकिंचन्द्र छटर्जी

वन्दे मातरं, वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं वन्दे मातरम् ।

# पठत संस्कृतम्

- श्री मञ्जुनाथशर्मा

पठत संस्कृतं, वदत संस्कृतम्
लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि ॥ पठत॥

ज्ञानवैभवं वेदवाङ्मयम्
लसति भवभयापहारि यत्र मुनिभिरार्जितम्
कीर्तिरार्जिता यस्य प्रणयनात्
व्यास-भास-कालिदास-बाणमुख्यकविभिः ॥ ॥ पठत॥

स्थानमूर्जितं यस्य मन्वते
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम्
यद्विना जना नैव जानते
भारतीयसंस्कृतिं सनातनाभिधां वराम् ॥ ॥ पठत॥

जयतु संस्कृतं संस्कृतिस्तथा
संस्कृतस्य संस्कृतेश्च प्रणयनाच्च मनुकुलम्
जयतु संस्कृतं, जयतु मनुकुलम्
जयतु जयतु संस्कृतं, जयतु जयतु मनुकुलम् ॥ ॥ पठत॥

SCERT TELANGANA

# राष्ट्रियगीतम्

- रवीन्द्रनाथ् ठागूर्

जनगणमन अधिनायक जय हे !
भारतभाग्यविधाता !
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्ग !
विन्ध्य हिमाचल यमुना गङ्गा,
उच्छलजलधितरङ्गा !
तव शुभ नामे जागे !
तव शुभ आशिष मागे !
गाहे तव जय गाथा !
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता !
जय हे ! जय हे ! जय हे !
जय जय जय जय हे !

# प्रतिज्ञा

- पैडिमर्रि वेंकट सुब्बाराव‍ु

भारतदेशः मम मातृभूमिः। भारतीयास्सर्वे मम सहोदराः।

अहं मम देशं प्रीणामि। सुसम्पन्ना बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम्। तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि ।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि । सर्वैः सह सगौरवं व्यवहरामि ।

मम देशस्य विषये, प्रजानां च विषये सेवानिरतिं भजामि । जन्तूनां विषये दयालुः भवामि इति प्रतिज्ञां करोमि ।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम् ।

SCERT TELANGANA

## पाठ्यपुस्तकरूपकर्तारः

**श्रीमती के.आर्.टि.एल्.ज्योतिर्मयी**
उपन्यासिका
राज्यविद्यापरिशोधनशिक्षणसंस्था
हैदराबाद्

**श्री डा. धूलिपाल रामकृष्णः**
संस्कृतविभागाध्यक्षः
मारिस् टेल्ला कलाशाला
विजयवाडा, कृष्णा जिल्ला

**श्री डा. विरिवेण्टि सुब्रह्मण्यम्**
उपसञ्चालकः
संस्कृत अकाडमी
हैदराबाद्

**श्रीमती पि.माधवी**
अध्यापिका
ब्रिलियंट् ग्रामर् उन्नतपाठशाला
दिलशुक्नगर्, हैदराबाद्

**श्री कोम्पल्लि शिवकुमारः**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
पर्लपल्लि, करींनगर् जिल्ला

**श्री तिरुनगरि. लक्ष्मणस्वामी**
सहाध्यापकः (संस्कृतम्)
श्रीराजराजेश्वरसंस्कृतपाठशाला
वेमुलवाडा, करींनगर् जिल्ला

**श्री सि.हेच. वेङ्कटसाम्बशिवरावः**
शिक्षितस्नातकाध्यापकः (संस्कृतम्)
आन्ध्रप्रदेशावासविद्यालयः, सिद्धिपेट, मेदक् जिल्ला

**श्री आर्. राजेश् प्रभुः**
सहाध्यापकः (संस्कृतम्)
जिल्लापरिषत् प्राच्योन्नतपाठशाला
वरिगोण्डा, नेल्लूरुजिल्ला.

**श्री जि.बि.वि. सुब्रह्मण्यम्**
प्रधानोपध्यायः
एस्.एम्.एस्. संस्कृततोन्नतपाठशाला
कोव्वूरु, पश्चिमगोदावरी जिल्ला

**श्री डा. मरुधूरि नरसिंहाचार्यः**
सहाध्यापकः (संस्कृतम्)
नगरपालकोन्नतपाठशाला
विजयवाडा, कृष्णाजिल्ला

**श्री के रङ्गराजु**
सहाध्यापकः
जिल्लापरिषत् उन्नतपाठशाला
रङ्गापुरम्, रङ्गारेड्डिजिल्ला

**श्री नमिलिकोण्ड. हरिप्रसाद्**
विश्रान्तप्रधानोपाध्यायः
श्रीराजराजेश्वरसंस्कृतपाठशाला
वेमुलवाडा, करींनगर्जिल्ला

**श्री ए. गिरिहरनाथबाबु**
सहाध्यापकः (संस्कृतम्)
प्रभुत्वोन्नतपाठशाला
वेङ्गलरावुनगर्, हैदराबाद्

**श्रीमती मादिराजु विजयलक्ष्मीः**
विश्रान्तसंस्कृताध्यापिका
श्री मलयालस्वामिसंस्कृतपाठशाला
कोवेलकुण्ट्ल, कर्नूल् जिल्ला

**श्री जे. चन्द्रशेखरः**
संस्कृतोपन्यासकः
श्री माजेटि गुरवय्य जूनियर् कलाशाला,
गुण्टूर् जिल्ला

**श्री भुवनगिरि वेङ्कटलक्ष्मीनारायणः**
परिशोधनाधिकारी
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः
तिरुपतिः, चित्तूरु जिल्ला

**श्री डा. उपद्रष्ट वेंकटरमणमूर्तिः**
संस्कृतोपन्यासकः
शारदाकलाशाला
विजयवाडा, कृष्णा जिल्ला

**श्री तुर्लपाटि शिवरामकृष्णः**
संस्कृताध्यापकः
दिल्ली पब्लिक् स्कूल्
नाचारम्, हैदराबाद्

**श्रीमती डा. वै.नागेन्द्रम्मा**
संस्कृतोपन्यासिका
प्रभुत्व जूनियर् कलाशाला
पेनुकोण्डा, अनन्तपुरं जिल्ला

**श्रीमती पि. श्रीवल्ली**
उपन्यासिका
प्रभुत्वकलाशाला
राजमण्ड्री, तूर्पुगोदावरी जिल्ला

**श्री डा. इक्कुर्ति वेङ्कटेश्वर्लु**
उपन्यासकः
गेट् शिक्षकप्रशिक्षणकलाशाला
तिरुपतिः, चित्तूरु जिल्ला

**कुमारी सुमेधा**
शोधच्छात्रा
राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः

## चित्रकाराः

**के. सुरेन्दर्,** प्रधानाचार्यः, स्रवन्ति उपाध्यायविद्याकलाशाला, वरंगल् जिल्ला
**कूरेल्ल श्रीनिवास्,** प्रधानाध्यापकः, जिल्लापरिषत् उन्नतपाठशाला, कुर्मेडु, नल्लगोण्ड जिल्ला
**के.बाबु,** प्रधानाध्यापक :, जिल्लापरिषत् उन्नतपाठशाला, वज्रपल्लि, निजामाबाद् जिल्ला
**टि.वि. रामकृष्णः,** चित्रलेखनाध्यापकः, जि.प.उ. पाठशाला, दुद्देड मेदक् जिल्ला
**वड्डेपल्लि वेंकटेश्वर्लु,** अध्यापकः, प्राथमिकपाठशाला, सोमवारं नल्लगोण्ड जिल्ला
**ए. गौरय्या,** (गौतम्) चित्रलेखकः, कुरुपां, विजयनगरम् जिल्ला
**बि.वि.आर.चारी,** चित्रकारः, निर्मल्, आदिलाबद् जिल्ला

SCERT TELANGANA

# विषयसूची

## पद्यभागः


| | पाठस्य नाम | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|---|
| प्रथमभागः | १. सादरं समीयताम् | (गीतम्) | जून् | 03 - 10 |
| | २. सप्तविभक्तिश्लोकाः | (नीतिश्लोकाः) | जुलै | 11 - 18 |
| | ३. भगवान् शशाङ्कः | (वर्णनश्लोकाः) | जुलै | 19 - 25 |
| | ✸ दानस्य माहात्म्यम् | | | 26 |
| द्वितीयभागः | ४. मनुजरीतिः | (अनुवादश्लोकाः) | आगष्ट् | 27 - 34 |
| | ५. लौकिकज्ञानम् | (प्रश्नोत्तरश्लोकाः ) | सेप्टेम्बर् | 35 - 42 |
| | ६. सिंहदिलीपयोः संवादः | (प्राचीनकाव्यश्लोकाः) | अक्टोबर् | 43 - 51 |
| | ✸ चित्रकारस्य चातुर्यम् | | | 52 |
| तृतीयभागः | ७. तस्मै श्रीगुरवे नमः | (श्लोकाः) | नवम्बर् | 53 - 58 |
| | ८. भूमिरियं बलिदानस्य | (गीतम्) | डिसेम्बर् | 59 - 66 |
| | ९. चिन्तयन्तु साधयन्तु | (प्रहेलिकाः) | जनवरी | 67 - 74 |
| | १०.चलद्वाणी | (दण्डकम्) | फिब्रवरी | 75 - 80 |
| | ✸ मूर्खवैद्ये | | | 81 - 82 |
| | पुनश्चरणम् | | मार्चि-एप्रिल् | |


## गद्यभागः


| | पाठस्य नाम | प्रक्रिया | मासः | पृष्ठसङ्ख्या |
|---|---|---|---|---|
| प्रथमभागः | १. भगीरथः | (कथा) | जून् | 85 - 92 |
| | २. आवेदनम् | (करपत्रम्) | जुलै | 93 - 100 |
| | ३. प्रतिमाराधनम् | (सम्भाषणम्) | जुलै | 101 - 109 |
| | ✸ वाचः व्रणः | | | 110 |
| द्वितीयभागः | ४. विश्वेश्वरय्यः | (निबन्धः) | आगष्ट् | 111 - 118 |
| | ५. अविचार्य न कर्तव्यम् | (विदेशीयकथा) | सेप्टेम्बर् | 119 - 126 |
| | ६. आर्यभटः | (निबन्धः) | अक्टोबर् | 127 - 133 |
| | ✸ प्रशंसायाः प्राप्त्यर्थम् | | | 134 |
| तृतीयभागः | ७. बृहत्कथावृत्तान्तम् | (कथा) | नवम्बर् | 135 - 142 |
| | ८. पुरस्कारः | (लेखः) | डिसेम्बर् | 143 - 150 |
| | ९. नारायणगुरुः | (सम्भाषणम्) | जनवरी | 151 - 158 |
| | १०.जीववैविध्यम् | (निबन्धः) | फिब्रवरी | 159 - 169 |
| | ✸ पायसस्य प्रहसनम् | | | 170 - 171 |
| | पुनश्चरणम् | | मार्चि-एप्रिल् | |


## अनुबन्धः


| | |
|---|---|
| शब्दाः | 172 - 174 |
| धातवः | 175 - 181 |
| पदकोशः | 182 - 187 |
| क्रियापदकोशः | 188-190 |


☞ अध्यापकः पाठ्यांशस्थान् नक्षत्रचिह्नितान् श्लोकान् छात्रैः कण्ठस्थान् कारयेत् । तेषां प्रतिपदार्थं, भावञ्च बोधयेत् ।

✸ इत्यनेन चिह्नेन चिह्निताः अंशाः मूल्याङ्कनाय नोपयोक्तव्याः।

SCERT TELANGANA

# విద్యార్థులకు సూచనలు

పిల్లలూ ! ...............

- మీరందరూ ధారాళంగా చదవగలగాలి. తెలిసిన దాని గురించి సొంతంగా రాయగలగాలి. ఒకవేళ మీరు చదవడం, రాయడం చేయలేకుంటే మీ ఉపాధ్యాయుల సాయంతో చదవడం, రాయడం నేర్చుకోండి.
- మీకోసం మీరు నేర్చుకోవలసిన అంశాలను దృష్టిలో పెట్టుకొని సంస్కృతపుస్తకాన్ని రూపొందించారు. ఈ పుస్తకంలో మీరు సాధించాల్సిన సామర్థ్యాల గురించి రెండవ పేజీలో ఇచ్చారు. విద్యా సంవత్సరం పూర్తయ్యేసరికి మీరు వీటిని చేయగలగాలి. వాటిని చదవండి.
- ప్రతిపాఠం ప్రారంభంలో అనుచ్ఛేదం/సంభాషణం/శ్లోకం ఉంటుంది. వాటి గురించి మాట్లాడండి. ప్రశ్నలకు జవాబులను చెప్పండి.
- 'ఛాత్రేభ్యః సూచనాః' అనే గడిలోని సూచనలు చదవండి. వాటి ప్రకారం చేయండి.
- మీ ఉపాధ్యాయుడు పాఠంలోని విషయం గురించి బోధించేటప్పుడు తప్పనిసరిగా మీకు తెలియని పదాలు, వాక్యాలు, విషయాల గురించి ప్రశ్నించండి. చర్చించి తెలుసుకోండి.
- అభ్యాసాల గురించి తరగతిగదిలో చర్చలు జరుగుతున్నప్పుడు, జట్టుపనులలో పాల్గొన్నప్పుడు మీరు కూడా మాట్లాడాలి. అవసరం అయితే ప్రశ్నించాలి.
- పాఠం తర్వాత 'ఏతాని కుర్వంతు' అనే పేరుతో అభ్యాసాలు ఉన్నాయి. వీటిని మీరు సొంతంగా ఆలోచించి చేయాలి. జవాబులు చూసి రాయకూడదు. ఒక వేళ అలా రాస్తే ఫార్మేటివ్ మూల్యాంకనంలో మీకు మార్కులు ఇవ్వరు.
- పాఠంలోని ప్రాజెక్టుపనులను, ప్రశంసకు సంబంధించిన ప్రశ్నలను మీరు మీ మిత్రుల సహాయంతో చేయవచ్చు. వీటిని ఎలా చేయాలో మీ ఉపాధ్యాయుని అడిగి తెలుసుకోండి. వీటిని చేసిన తర్వాత మీరు ఎలా చేశారు? ఏం చేశారు ? ఎలా నేర్చుకున్నారు ? మీరే సొంతంగా చెప్పాల్సి ఉంటుంది.
- స్వీయరచనా, సర్జనాత్మకత, పరియోజనాకార్యమ్, ప్రశంసలకు సంబంధించిన అభ్యాసాల గురించి ముందుగా ఉపాధ్యాయుడు చర్చ నిర్వహిస్తాడు. మీరు ఆ చర్చలో పాల్గొనండి. తెలియని విషయాలు అడిగి తెలుసుకోండి. మీరే స్వంతంగా అభ్యాసాలను రాయండి. అవసరమైతే మీ తోటి వారితో కలిసి చేయండి.
- పఠంతు, అవగచ్ఛంతు, వ్యక్తీకుర్వంతు – పదజాలాభివృద్ధిః లోని అభ్యాసాలను మీరే సొంతంగా చేయండి. చేయలేని వాటి గురించి మాత్రమే ఉపాధ్యాయుని అడిగి తెలుసుకోండి.
- అభ్యాసాలలో ఇచ్చిన వ్యాకరణాంశాలు మీకు అర్థం కావడానికి మొదట ఉదాహరణలు ఇచ్చారు. వాటి ఆధారంగా మీకు అర్థమయ్యేలా సూత్రాన్ని ఇచ్చారు. కాబట్టి ఉదాహరణలను జాగ్రత్తగా పరిశీలించి వాటిని విశ్లేషించి సూత్రాన్ని తెలుసుకోండి.
- ప్రతిపాఠంలో చివరకు 'స్వీయమూల్యాంకనమ్' అనే పేరుతో పట్టికలో కొన్ని వాక్యాలు ఉన్నాయి. ఒక్కొక్క వాక్యాన్ని చదవండి. చేయగల్గితే 'ఔను', వద్ద చేయలేకుంటే 'కాదు' వద్ద (✓) పెట్టండి. వీటిలో మీరు చేయలేని వాటి గురించి మీ ఉపాధ్యాయుని సహాయంతో పునరభ్యాసం చేయండి.
- పాఠాలకు సంబంధించిన ఇతర పుస్తకాలను, గ్రంథాలను పాఠశాలగ్రంథాలయానికి వెళ్ళి అడిగి తీసుకొని చదవండి.
- మీరు తప్పనిసరిగా నిఘంటువును ఉపయోగించడం అలవాటు చేసుకోండి. వార్తాపత్రికలు, మాసపత్రికలు, కథలపుస్తకాలు వంటివి చదవడం అలవాటుగా చేసుకోండి.
- కొన్ని పాఠాలలో నాటకీకరణ చేయడం, ఏకపాత్రాభినయం చేయడం, గేయాలను రాగంతో పాడడం, అభినయం చేయడం, పద్యాలను కంఠస్థం చేసి గానం చేయడం వంటివి ఉన్నాయి. వీటిని మీరు తప్పనిసరిగా సాధనచేయండి.
- మీరు తప్పనిసరిగా వ్యాసాలు, లేఖలు, నినాదాలు, కరపత్రం, భిత్తిపత్రాలు, సంభాషణ వంటివి రాయగలగాలి.
- సర్జనాత్మకతలోని అంశాలను మీరు రాసిన తరవాత ఒక పుస్తకరూపంలో సంకలనం చేసి తరగతిగదిలో ప్రదర్శించండి.

SCERT TELANGANA

# पद्यभागः

SCERT TELANGANA

# अनेन पाठ्यपुस्तकेन छात्रैः साधितव्यानि सामर्थ्यानि

**श्रुण्वन्तु, विचिन्त्य वदन्तु**

- धारालतया-भावयुक्ततया-रागयुक्ततया श्लोकानां, गीतानां च पठनसामर्थ्यम् ।
- निर्दिष्टकारणानां विवरणपूर्वकं यस्य कस्यापि विषयस्य समर्थन-निराकरणसामर्थ्यम् ।
- तत्तत्पाठ्यांशेषु आगतानां सन्देशानां वाचनसामर्थ्यम् ।
- श्लोकानां, गीतानां स्पष्टतया भावविवरणसामर्थ्यम् ।
- विविधचर्चासु सुनिश्चिततया भागग्रहणसामर्थ्यम् ।
- स्वयं विचिन्त्य भावकथनसामर्थ्यम्, निर्दिष्टायां दिशि चिन्तन-व्यक्तीकरणसामर्थ्यञ्च ।

**पठन्तु - अवगच्छन्तु - व्यक्तीकुर्वन्तु**

- विभिन्नांशानां सम्बद्धानां शीर्षिकाणाम् आलोचनापूर्वकप्रकटनसामर्थ्यम् ।
- दत्तान् विषयान् अधिगत्य सावगमनं समाधानानां लेखनसामर्थ्यम् ।
- पाठ्यांशसम्बद्धानां सर्वेषां प्रश्नानाम् अनुकूलतया समाधानानां लेखनसामर्थ्यम् ।
- विषयावगमनपूर्वकं समाधानानां लेखनसामर्थ्यम् ।
- पाठाधारेण समाधानानां स्वीयवाक्यैः लेखनसामर्थ्यम् ।

**स्वीयरचना**

- विविधानाम् अंशानां स्वीयवाक्यैः लेखनसामर्थ्यम् ।
- स्पष्टतया स्वीयवाक्यैः स्वाभिप्रायाणां लेखनसामर्थ्यम् ।
- समस्यानां परिष्कारान् विचिन्त्य सूचनानां लेखनसामर्थ्यम् ।
- पूर्णावगाहनतया, अधिकारपूर्वकं पाठ्यांशविवरणस्य लेखनसामर्थ्यम् ।
- विषयविशेषस्य समर्थने तिरस्करणे निर्दिष्टकारणानां लेखनसामर्थ्यम् ।

**पदजालाभिवृद्धिः**

- सन्दर्भानुगुणं संस्कृतभाषायां विशिष्टपदानां, पाठ्यपुस्तके स्थितानां नूतनपदानाञ्च उपयोगसामर्थ्यम् ।
- पर्यायपदानि - नानार्थान् - व्युत्पत्यर्थान् ज्ञात्वा भाषणे तेषां उपयोगसामर्थ्यम् ।
- भाषाक्रीडाभिः पदजालाभिवृद्धेः पदकोशोपयोगसामर्थ्यम् ।

**सर्जनात्मकव्यक्तीकरणम्**

- पाठ्यांशानां गीत - कथा- सम्भाषण - लेखादि विविधसाहितीप्रक्रियासु परिवर्तनस्य अनुवदनस्य च सामर्थ्यम् ।
- भित्तिपत्राणां, करपत्राणां च निर्माणसामर्थ्यम् ।
- चित्राणां संरचनासामर्थ्यम् ।

**प्रशंसा**

- कुल - धर्म - वर्गभेदान् विना प्रशंसनगुणस्य विकासः ।
- कवीनां, कविभावानां, प्रशंसनसामर्थ्यम् ।
- उच्चनीचभेदान् अपरिगणय्य (विहाय) प्रशंसनसामर्थ्यम् ।
- उदात्तभावनाभिः प्रान्तीयभेदं विना व्यक्तीनां, संस्थानां प्रशंसनसामर्थ्यम् ।
- इतरभाषांशानां महत्त्वस्य प्रशंसनसामर्थ्यम् ।

**भाषांशाः**

- वाक्यभेदान् संलक्ष्य सन्दर्भोचितरीत्या वाक्यानां प्रयोगसामर्थ्यम् ।
- सन्धि - समासपदानाम् अभिज्ञानसामर्थ्यम् । स्वीयवाक्यैः अर्थयुक्ततया सूत्राणां लेखनसामर्थ्यम् ।
- उपसर्गाणां प्रत्ययानाञ्च अभिज्ञानसामर्थ्यम्, उपयोगसामर्थ्यञ्च ।
- अलङ्काराणां, छन्दसां च अवगमनपूर्वकं प्रयोगसामर्थ्यम् ।

प्रथमः भागः

# १. सादरं समीयताम्

## पठन्तु, विचिन्त्य वदन्तु

प्रधानाध्यापकः - अद्य अस्माकं सर्वेषामपि शुभदिनम् । किमर्थमिति जानन्ति वा ?

छात्राः - जानीमः । अद्य वीरविजयदिवसः अस्ति ।

प्रधानाध्यापकः - सत्यमुक्तम् । बहूनां वीरसैनिकानां त्यागेन पराक्रमेण च विदेशीयेभ्यः अस्माकं देशः रक्षितः अस्ति । तादृशानां वीरसैनिकानां सम्माननम् अस्माभिः कर्तव्यम् ।

अतः वयं तेषु अन्यतमं कञ्चन वीरसैनिकम् अतिथिरूपेण विद्यालयं प्रति आहूतवन्तः। इदानीन्तने समारोहे प्रथमं सांस्कृतिककार्यक्रमाः भविष्यन्ति । तदनन्तरम् अतिथिमहोदयस्य प्रेरणात्मकं भाषणं च भवति ।

(सांस्कृतिककार्यक्रमानन्तरम्)

वीरसैनिकः - प्रियच्छात्राः । भवतां प्रदर्शनम् अद्भुतम् अस्ति । अहम् एकं देशभक्तिगीतं गायामि । भवन्तः प्रथमं शृण्वन्तु, ततः अनुगायन्तु ।

प्रश्नाः

१. कस्मिन् सन्दर्भे एषः प्रसङ्गः दत्तः अस्ति?
२. प्रधानाध्यापकः किमर्थं सभाम् आयोजितवान् ?
३. छात्राः किं श्रोतुम् उद्युक्ताः आसन् ?

### उद्देश्यम्

★ विभिन्नगीतैः भाषाध्ययने अभिरुचेः उत्पादनम् । देशभक्तिसंवर्धनम् ।
★ संस्कृतभाषायाः सरलतायाः निरूपण पुरस्सरं भावविनिमयसम्पादनम् ।

बहूनि वर्षाणि यावत् वैदेशिकैः आक्रान्तः भारतदेशः बहूनां त्यागनिरतानां महापुरुषाणां त्यागेन स्वातन्त्र्यं प्राप्तम् । परं स्वातन्त्र्यानन्तरमपि कतिपयवैदेशिकैः पीड्यमानः अस्ति अस्माकं भारतदेशः । १९९९ वर्षे पुनः अस्माकं कतिपयदेशभक्तानां वीरसैनिकानां पराक्रमेण, त्यागफलेन च देशः सुरक्षितः अस्ति । अत्र देशरक्षणं कथं करणीयमिति तदर्थं किमपेक्षितमिति गीतरूपेण उक्तमस्ति । तद्वयम् इदानीं जानीमः।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



सादरं समीयताम्
वन्दना विधीयताम्
श्रद्धया स्वमातृभूस्समर्चना विधीयताम् ।

आपदो भवन्तु वा
विद्युतो लसन्तु वा
आयुधानि भूरिशोऽपि मस्तके पतन्तु वा ।

धीरता न हीयताम्
वीरता विधीयताम्
निर्भयेन चेतसा पदं पुरो निधीयताम् ।

प्राणदायिनी इयम्
त्राणदायिनी इयम्
शक्तिभुक्तिमुक्तिदा सुधाप्रदायिनी इयम् ।

एतदीयवन्दने
सेवनेऽभिनन्दने
साभिमानमात्मनो जीवनं प्रदीयताम् ॥



**॥ पण्डित वासुदेवद्विवेदी ॥**



SCERT TELANGANA

## सारांशः



भवन्तः सर्वे परस्परादरेण सङ्गच्छन्ताम् । भारतमातरं नमन्तु । मातृभूमिं श्रद्धया अर्चन्तु । बहूनि कष्टानि भवन्तु नाम, आयुधानि मस्तके पतन्तु नाम, तथापि धैर्यं मा त्यजन्तु, वीरत्वं दर्शयन्तु, भयं विना अग्रे सरन्तु ।

एषा भारतमाता प्राणदायिनी, रक्षणदायिनी च । एषा शक्तिं, भुक्तिं, मुक्तिम्, अमृतं च ददाति । ईदृश्याः अस्याः भारतमातुः वन्दने, सेवने, अभिनन्दने च आत्मनः जीवनं सगर्वं समर्पयन्तु ।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) गीतमिदं किं बोधयति ?

आ) देशरक्षणाय जीवनम् अर्पितवन्तम् एकं देशभक्तम् उद्दिश्य वदन्तु ।

इ) भवन्तः देशं किमर्थम् प्रीणन्ति ?

ई) एतस्य गीतस्य गानेन भवन्तः किमपि अन्यत् देशभक्तिगीतं स्मरन्ति चेत् तत् गायन्तु ।

उ) गीते देशः अस्मभ्यं किं किं यच्छतीति वर्णितम् ?

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठस्थानि अनुस्वारान्त-मकारान्तपदानि चित्वा तेषामधः रेखाङ्कनं कुर्वन्तु । लिखन्तु।

आ) अधः दत्तानां वाक्यानां समानार्थकसंस्कृतवाक्यानि पाठे अन्विष्य लिखन्तु ।

१) ధైర్యాన్ని వీడకండి.

२) నిర్భయంగా అడుగు ముందుకు వేయండి.

३) జీవితాన్ని అర్పించండి.

४) భారతమాత ముక్తినిస్తుంది.

इ) अधः दत्तं श्लोकं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

**चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।**
**चन्द्रचन्दनयोर्मध्ये शीतला साधुसंगतिः ।।**

१) लोके किं शीतलम् ?

२) चन्दनादपि कः शीतलः?

३) चन्द्रचन्दनाभ्याम् अपि अत्यन्तं का शीतला ?

४) अस्य श्लोकस्य शीर्षिकां सूचयन्तु ।

**ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१) भारतमाता कीदृशी अस्ति ?

२) देशरक्षणाय जनाः किं कर्तुं सिद्धाः भवेयुः ?

३) कष्टकाले युद्धे च कथं वर्तितव्यम् ?

४) कविः कीदृशकालेऽपि देशरक्षणं कर्तव्यमिति अस्मान् बोधयति ?

५) गीतस्य नूतनशीर्षिकां लिखन्तु ।

## III. स्वीयरचना

**अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. भारतमाता किमर्थं प्राणदायिनी इति वर्णिता ?

२. देशस्य रक्षणार्थं भवन्तः किं कुर्वन्ति ?

३. देशः नाम कः इति भवन्तः चिन्तयन्ति ?

४. मातृदेशरक्षणार्थम् अस्माभिः किं कर्तव्यमिति अंशम् अधिकृत्य स्वीयवाक्यैः लिखन्तु ।

५. गीतस्य भावं स्वीयवाक्यैः लिखन्तु ।

## IV. पदजालाभिवृद्धिः

**१. देशरक्षणाय भारतीयाः किं कुर्युः इति लिखन्तु ।**

उदा : देशरक्षणाय भारतीयाः सर्वदा ऐक्यभावनां प्रदर्शयेयुः ।

**भारतीयाः**

१. ............................
२. ............................
३. ............................
४. ............................
५. ............................

**२. ताम्, न्तु इत्यक्षराणि पदस्यान्ते उपयुज्य नूतनक्रियापदानि लिखन्तु ।**

| | |
|---|---|
| उदा : वर्धताम् | नन्दन्तु |
| ताम् | न्तु |
| ................ | .................. |
| ................ | .................. |
| ................ | .................. |

SCERT TELANGANA

३ अधः दत्तम् उदाहरणम् अनुसृत्य धातुरूपाणां वचनान्तराणि लिखन्तु, तानि उपयुज्य नूतनवाक्यानि रचयन्तु ।

**उदा : वन्दते**

| वन्दताम् | वन्देताम् | वन्दन्ताम् |
|---|---|---|
| भवान् भारतदेशं वन्दताम् | भवन्तौ भारतदेशं वन्देताम् | भवन्तः भारतदेशं वन्दन्ताम् |

१.सेवते २. वर्तते ३. वर्धते ४. एधते

**उदा : पठति**

| पठतु | पठताम् | पठन्तु |
|---|---|---|
| सा गृहे पठतु | ते गृहे पठताम् | ताः गृहे पठन्तु |

१. वदति २. लिखति ३. पश्यति ४. पिबति ५. पचति

४. अधः दत्तम् उदाहरणं दृष्ट्वा तदनुगुणं पदानाम् अर्थं विवृण्वन्तु ।

**उदा - शक्तिदा - या शक्तिं ददाति ।**

१. मुक्तिदा -

२. भुक्तिदा -

३. सुखदा -

४. धनदा -

५. प्राणदा -

## V. सर्जनात्मकता

१. गीतस्य भावं निबन्धरूपेण लिखन्तु ।

२. शान्तिप्रबोधकं चित्रं रचयन्तु ।

३. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఎందరో వీరులు భారతదేశంలో పుట్టారు. వీరు దేశక్షేమం కొరకు ఎంతో కృషి చేశారు. ప్రాణాలు అర్పించారు. వారి శ్వాస దేశము యొక్క స్వాతంత్ర్యసంపాదనం, భారతమాతస్వేచ్ఛయే. వారంతా మనందరికీ ఆదర్శప్రాయులు.

## VI. प्रशंसा

कञ्चन देशभक्तम् अधिकृत्य चर्चां कुर्वन्तु ।

SCERT TELANGANA

## VII. भाषांशाः

### गुरु-लघुनिरूपणम्

भवन्तः श्लोकान् पठन्ति । गीतानि रागयुक्ततया गायन्ति । लयबद्धताम् अनुसरन्तः श्लोगीतानि गायामश्चेत् आनन्दः जायते । श्लोकेषु संस्कृतच्छन्दः शास्त्रे लयबद्धताम् आनेतुं केचन नियमाः कल्पिताः सन्ति । तेषां नियमानाम् अनुसारं श्लोकाः गीतानि च विरच्यन्ते । तान् नियमान् अत्र ज्ञास्यामः ।

**अ) अधः दत्तानि अक्षराणि उच्चारयन्तु ।**

क) अ, इ, उ, ऋ , क, जि, श, स, न, हि, च, झ, षि, फ, र, नि, भ, यि, ब, लि

एतानि अक्षराणि उच्चारयितुं कियान् समयः अपेक्ष्यते ?

ख) आ, ई, ऊ, ए, ऐ, ओ औ, गं, नः, सा, ती, शू, तॄ, घौ, दं, सै, ड़ू, कौ, मन्, फः, हं, श्री

ईदृशानि अक्षराणि उच्चारयितुं कियान् समयः अपेक्ष्यते ?

**उभयोः उच्चारणे समयस्य न्यूनाधिक्यं ज्ञातवन्तः खलु !**

- एकमात्राकालेन उच्चारयितुं शक्यानि 'क' भागीयानि अक्षराणि ।
- एकमात्राधिककालेन अर्थात् द्विमात्राकालेन, त्रिमात्राकालेन वा उच्चारयितुं शक्यानि 'ख' भागीयानि अक्षराणि ।

ईदृशानि अक्षराणि अभिज्ञातुं पूर्वजाः चिह्नद्वयम् असूचयन् । तत् चिह्नद्वयं पश्यन्तु ।

**'एकमात्रो भवेत् ह्रस्वः'** - ह्रस्वाक्षराणि "।" चिह्नेन सूच्यन्ते । एतत् चिह्नं "लघुः" इति कथयन्ति ।

**' । ' - लघुः**

**'द्विमात्रो दीर्घ उच्यते'** - अर्थात् लघोः अक्षरस्य उच्चारणे अपेक्षितसमयापेक्षया अधिकसमयः येषाम् अक्षराणाम् अपेक्ष्यते तानि अक्षराणि ' U ' चिह्नेन सूच्यन्ते । एतत् चिह्नं "गुरुः" इति कथयन्ति ।

**' U ' - गुरुः**

SCERT TELANGANA

आ) अधः दत्तानि पदानि पश्यन्तु । कथं लघुः गुरुश्च सूचितः इति अवगच्छन्तु ।

| | | |
|---|---|---|
| I U U<br>स म र्थः | U I U<br>दु र्ब लः | I U I U<br>प रा क्र मः |
| U U<br>दू रम् | I U I U<br>नि र न्त रं | U U U<br>स द्गु णः |
| U U<br>स त्यम् | I U U<br>सु शी ला | I I U<br>म ति मान् |

'I' 'U' लघु - गुरुसहितानि अक्षराणि अभिज्ञातुं केचन अंशाः ज्ञातव्याः ।

इ) अधः दत्तानि पदानि पठन्तु ।

१) अर्कः, २) सज्जा, ३) नामन्

एतेषु पदेषु

प्रथमपदे ''र्क'' - इदं संयुक्ताक्षरम् ।
द्वितीयपदे ''ज्जा'' - इदं द्वित्वाक्षरम् ।
तृतीयपदे ''मन्'' - इदं हलन्तपदम् ।

**अतः ईदृशानि अक्षराणि केन उपायेन लघु - गुरुरिति निरूपणीयानीति पश्यन्तु ।**

U U — य ज्ञः
U I — क र्म

संयुक्ताक्षरेभ्यः प्राक् स्थितानि अक्षराणि गुरुचिह्नेन सूचितानि खलु !

**✶ अर्थात् संयुक्ताक्षरेभ्यः प्राक् स्थितानि अक्षराणि गुरूणि ।**

ई) अधः दत्तानाम् अक्षराणां गुरुलघूनां निरूपणं पश्यन्तु ।

| | | |
|---|---|---|
| U U<br>स त्ता | U I U U<br>बु द्धि म त्ता | U I U U<br>का र वे ल्लः |
| U I U<br>प ल्ल वः | U U U<br>क ल्लो लः | U U<br>फु ल्लः |

उपरि दत्तेषु पदेषु द्वित्वाक्षरेभ्यः पुरतः स्थितानि अक्षराणि गुरूणि ।

**✶ अतः संयुक्ताक्षरेभ्यः, द्वित्वाक्षरेभ्यः प्राक् स्थितानि अक्षराणि गुरूणि ।**

SCERT TELANGANA

★ **अनुस्वारसहितानि, विसर्गसहितानि चाक्षराणि गुरूणि ।**

यथा -

| | | | |
|---|---|---|---|
| U U | I I U | I U | I U |
| भावः | सकलं | तिलः | फलं |
| I I U | I I U | I U | I U |
| अमरं | समरं | करः | स्वरः |

एवमेव -

| | | |
|---|---|---|
| I U | U U | U I U |
| गु णिन् | शृ ण्वन् | चि न्त यन् |

उपरि स्थितेषु पदेषु हलन्ताक्षराणि गुरूणीति सूचितानि खलु !

* **अतः हलन्ताक्षराणि गुरूणि ।**

एवं प्रकारेण गुरुलघूनाम् अभिज्ञानमिति श्लोकगीतरचनायै उपयुक्तेषु नियमेषु प्रथमः नियमः।

### उ) अधः दत्तानां पदानां गुरु-लघुचिह्नानि लिखन्तु ।

१. पुण्डरीकम्  २. मनुष्यः  ३. विज्ञानम्  ४. तद्धिताः  ५. रज्जुः

६. षण्णवतिः  ७. दुर्योधनः  ८. धृतराष्ट्रः  ९. आञ्जनेयः  १०. शशाङ्कः

### (ऊ) गुरुलघुज्ञानाय कश्चन श्लोकः अत्र दत्तः वर्तते । अवगच्छन्तु ।

**'सानुस्वारो विसर्गान्तः दीर्घो युक्तपरश्च यः ।**
**वा पादान्ते त्वसौ ग्वक्रः ज्ञेयोऽन्यो मात्रिको लृजुः ॥ इति**

**अनुस्वारसहितः, विसर्गसहितः, दीर्घसहितः, संयुक्ताक्षरस्य पूर्ववर्ती च वर्णः गुरुः भवति। अन्ये एकमात्रयुक्ताः वर्णाः लघवः ।**

### परियोजनाकार्यम्

संस्कृतभाषया रचितानि देशभक्तिगीतानि सङ्गृह्य प्रदर्शयन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. गीतस्य भावः अवगतः, भावानुगुणं सस्वरं गातुं शक्नोमि । | | |
| २. गीतस्य भावं स्वीयवाक्यैः लेखितुं शक्नोमि । | | |
| ३. देशसेवकानां नामानि वक्तुं शक्नोमि । | | |
| ४. शान्तिप्रबोधकं चित्रमेकं रचयितुं शक्नोमि । | | |

SCERT TELANGANA

प्रथमः भागः

# २.सप्तविभक्तिश्लोकाः

## पठन्तु, विचिन्त्य वदन्तु

**रामो** राजमणिः सदा विजयते **रामं** रमेशं भजे
**रामेणा**भिहता निशाचरचमूः **रामाय** तस्मै नमः ।
**रामान्**नास्ति परायणं परतरं **रामस्य** दासोऽस्म्यहम्
**रामे** चित्तलयः सदा भवतु मे **हे राम** ! मामुद्धर ।।

## प्रश्नाः

१. उपरितनश्लोकस्य विशेषता का ?

२. उपरि श्लोके कति विभक्तयः सन्ति ?

३. एकैकः छात्रः एकां विभक्तिम् उपयुज्य एकं वाक्यं वदन्तु ।

### उद्देश्यम्

* विभिन्नश्लोकैः संस्कृतभाषाध्ययने अभिरुचेः उत्पादनम् ।
* संस्कृतस्य सरलतायाः निरूपणपुरस्सरं अभिव्यक्तिसामर्थ्यस्य सम्पादनम्।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥ १ ॥

★ पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिते विहिताभियोगाः ॥ २ ॥

★ श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां परोपकारेण न चन्दनेन ॥ ३ ॥

श्रीमन् नृसिंहविभवे गरुडध्वजाय
तापत्रयोपशमनाय भवौषधाय ।
तृष्णारिवृश्चिकजलाग्निभुजङ्गरोग-
क्लेशव्ययाय हरये गुरवे नमस्ते ॥ ४ ॥



★ कर्पूरादपि कैरवादपि दलत्कुन्दादपि स्वर्णदी-
कल्लोलादपि केतकादपि गलत्कान्ताट्टगन्तादपि ।
दूरोन्मुक्तकलङ्कशङ्करशिरश्शीतांशुखण्डादपि
श्वेताभिस्तव कीर्तिभिर्धवलिता सप्तार्णवा मेदिनी ॥
॥५॥

★ ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ६ ॥

★ विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ७ ॥

हे गोपालक ! हे कृपाजलनिधे ! हे सिन्धुकन्यापते !
हे कंसान्तक ! हे गजेन्द्रकरुणापारीण ! हे माधव !
हे रामानुज ! हे जगत्त्रयगुरो ! हे पुण्डरीकाक्ष ! मां
हे गोपीजननाथ ! पालय परं जानामि न त्वां विना ॥ ८ ॥

संस्कृतं मे प्रिया भाषा संस्कृतं चिन्तयाम्यहम्
संस्कृतेन सदा वच्मि संस्कृताय च जीवनम् ।
संस्कृतान्मे स्थितं सर्वं संस्कृतस्य व्रती सदा
संस्कृते मे दृढा भक्तिः हे संस्कृत ! नमोऽस्तु ते ॥ ९ ॥



SCERT TELANGANA

**भावाः -**

१. सत्यं मातृसदृशं, ज्ञानं पितृसदृशं, धर्मः भ्रातृसदृशः, दया एव सखासदृशी, शान्तिः पत्नीसदृशी, क्षमा पुत्रसदृशी । इत्थमेते षट् मम बान्धवाः।

२. सूर्यः सरसि स्थितानि कमलानि विकासयति । चन्द्रः कैरवचक्रवालं विकासयति । अयाचितोऽपि मेघः जलं ददाति । तथैव सज्जनाः परोपकारे मग्नाः भवन्ति ।

३. श्रोत्रं शास्त्रश्रवणेन विभाति न तु कुण्डलेन, पाणिः दानेन विभाति न तु कङ्कणेन, तथैव करुणापराणां महात्मनां कायः परोपकारेणैव विभाति । न तु चन्दनेन ।

४. श्रीमते, सर्वव्यापकाय, गरुडध्वजाय, तापत्रयनिवारकाय, पुनर्जन्मनिवारकाय, तृष्णाशत्रुवृश्चिकजलाग्निसर्परोगैः प्राप्यमाणकष्टनिवारकाय विष्णुरूपाय गुरवे नृसिंहाय नमः।

५. हे राजन् ! तव धवलिता कीर्तिः कर्पूरात् अपि, कैरवपुष्पादपि कुन्दपुष्पादपि, गङ्गायाः कल्लोलफेनादपि, शङ्करशिरश्शीतांशुश्चन्द्रस्य खण्डादपि (एतेभ्यः धवलितपदार्थेभ्यः) अतिशयेन धवलतया तव कीर्त्या एषा सप्तसमुद्रयुक्ता पृथिवी वर्तते ।

६. ऐश्वर्यस्य अलङ्कारः सज्जनता, शूरतायाः अलङ्कारः वाङ्नियन्त्रणम्, ज्ञानस्य अलङ्कारः शान्तिः, शास्त्रश्रवणस्य अलङ्कारः विनयशीलता, धनस्य अलङ्कारः सत्पात्रे व्ययीकरणं, तपसः भूषणं क्रोधराहित्यम्, उन्नतेः भूषणं क्षमाशीलता, धर्मस्य भूषणं निष्कपटता, इत्थमेतेषां सर्वेषां कारणं शीलमेव परमोत्तमं भूषणं वर्तते।

७. विपत्तौ धैर्यम्, उन्नतौ क्षमाशीलता, सभायां वचनपटुत्वं, युद्धे पराक्रमप्रदर्शनं, प्रसिद्धौ निर्लिप्तता, सच्छास्त्रश्रवणे प्रवृत्तिः, इत्यादयो गुणाः महात्मसु जन्मसिद्धाः एव भवन्ति ।

८. हे गोपालक ! हे कृपाजलनिधे ! हे विष्णो ! हे कंसान्तक ! हे गजेन्द्रसंरक्षक ! हे माधव ! हे रामानुज! हे जगत्त्रयगुरो ! हे पुण्डरीकाक्ष ! हे गोपीजननाथ ! मां पालय । अहं त्वां विना अन्यं न जानामि ।

९. संस्कृतं मम प्रिया भाषा वर्तते । संस्कृतस्य चिन्तनं करोमि । अहं सदा संस्कृतेनैव भाषणं करोमि । मम जीवनं संस्कृताय एव । संस्कृतादेव मम सर्वं प्राप्तम्, अहं सर्वदा संस्कृतव्रती । संस्कृते एव मम दृढा भक्तिः वर्तते, अतः हे संस्कृत ! तुभ्यं नमः।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) पाठे कति श्लोकाः सन्ति ?
आ) विभक्तयः कति सन्ति ? ताः काः?
इ) सप्तविभक्तियुक्तमेकं श्लोकं वदन्तु ।
ई) एकः छात्रः विभक्तिं पृच्छतु । अपरः तद्विभक्तियुक्तं श्लोकं पठतु ।
उ) श्लोकानां भावान् वदन्तु ।
ऊ) एकः श्लोकं पठतु । अन्यः भावं वदतु ।

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु ।

### अ) अधः दत्तक्रमेण निर्दिष्टानि विभक्तिसूचकानि पदानि लिखन्तु ।

| | श्लोकः | विभक्तिः | पदानि |
|---|---|---|---|
| उदा- | प्रथमः | प्रथमा | माता, पिता, सत्यं........ |
| | | | |

### आ) अधः दत्तानि पदानि कां विभक्तिं सूचयन्तीति लिखन्तु ।

उदा- श्रोत्रं - प्रथमा

१. विभवे - .................
२. तापत्रयोपशमनाय - .................
३. कर्पूरात् - .................
४. विपदि - .................
५. पात्रे - .................
६. चन्द्रः - .................
७. गुरवे - .................
८. विक्रमः - .................
९. बान्धवाः - .................
१०. हे गोपालक ! - .................

### इ) अधः दत्तानां विभक्तीनां समुचितश्लोकपादं चित्वा लिखन्तु ।

१. चतुर्थी
२. षष्ठी
३. तृतीया
४. सप्तमी

### ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. षट् बान्धवाः के ?
२. करुणापराणां कायः केन विभाति ?
३. परोपकाराय के किं कुर्वन्ति ?
४. महात्मनां प्रकृतिसिद्धाः गुणाः के ?

SCERT TELANGANA

## III. स्वीयरचना

### (अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. ''ऐश्वर्यस्य विभूषणं सुजनता'' इत्यमुं श्लोकम् अधिकृत्य पञ्च वाक्यानि लिखन्तु ।

२. ''सत्यं माता पिता ज्ञानम्'' इत्यस्मिन् श्लोके एते षड् मम बान्धवाः इत्युक्तं कविना । एतस्मिन् विषये स्वीयाभिप्रायं पञ्चवाक्यैः लिखन्तु ।

३. श्लोके ''शौर्यस्य वाक्संयमः'' इति विषयं कथं समर्थयति ?

### (आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. सज्जनाः परेषां हितं कुर्वन्ति इति विषयमधिकृत्य उदाहरणपुरस्सरं दशवाक्यानि लिखन्तु ।

२. ''करुणापराणां कायः परोपकारेण विभाति'' इत्युक्तम् । तादृशान् जनान् भवन्तः स्वग्रामे वा नगरे वा दृष्टवन्तः चेत् तानुद्दिश्य दशवाक्यानि लिखन्तु ।

## IV. पदजालाभिवृद्धिः

### (अ) श्लोकं पठन्तु ।

कृष्णो रक्षतु नो जगत्त्रयगुरुः कृष्णं नमस्याम्यहम्
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहम्
कृष्णे तिष्ठति सर्वमेतदखिलं हे कृष्ण ! रक्षस्व माम् ॥

#### १. अधः दत्तानि पदानि समुचितविभक्तिभिः योजयन्तु ।

| पदानि | विभक्तयः |
|---|---|
| कृष्णः | |
| कृष्णेन | षष्ठी |
| जगत्त्रयगुरुः | द्वितीया |
| कृष्णं | तृतीया |
| अमरशत्रवः | प्रथमा |
| कृष्णाय | चतुर्थी |
| कृष्णात् | पञ्चमी |
| दासः | सप्तमी |
| कृष्णस्य | सम्बोधनप्रथमा |
| कृष्णे | |
| अखिलं | |
| हे कृष्ण ! | |

SCERT TELANGANA

२. कोष्ठके दत्तानि पदानि उपयुज्य रिक्तस्थानानि पूरयित्वा श्लोकस्य भावं लिखन्तु

| अहं, माम्, नमः, जगत्, कृष्णात्, त्रायस्व, त्रिलोकानां, कृष्णेन, कृष्णे |
|---|

.............गुरुः श्रीकृष्णः ..................रक्षतु । ............. कृष्णं नमामि । .............राक्षसाः हताः। तस्मै कृष्णाय ...................... । .............एव इदं............समुत्थितमभवत् । अहं कृष्णस्य दासोऽस्मि । .............सर्वं तिष्ठति । हे कृष्ण ! ................माम् ।

आ) कविताशब्दस्य सर्वासु विभक्तिषु रूपाणि ज्ञात्वा तैः अधः दत्तानि रिक्तस्थानानि पूरयित्वा नूतनवाक्यानि रचयन्तु ।




१. .................. पुष्पाणि आनयतु ।

२. .................. सखी जयलक्ष्मीः ।

३. .............. कुत्र गच्छति ?

४. ................. अम्बा आह्वयति ।

५. ................ सख्यः विश्वसन्ति ।

६. .................. प्रसादं ददातु ।

७. .................. विना अहं न गच्छामि ।

## V. सर्जनात्मकता

(अ) अधः दत्तेषु अंशेषु एकं गृहीत्वा तत्सम्बद्धाम् एकां कथां लिखन्तु ।

१. सन्तः स्वयं परहिते विहिताभियोगाः ।

२. प्रकृतिसिद्धमिदं हि महात्मनाम् ।

३. करुणापराणां कायः परोपकारेण विभाति ।

४. शीलं परं भूषणम् ।

(आ) अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

కలిసి కూర్చున్నా, స్నేహం చేసినా, మైత్రిగా ఉన్నా, పోట్లాడినా మరేమి చేసినా మంచి వాళ్ళతోనే కాని చెడ్డవాళ్ళతో ఎటువంటి సంబంధం పెట్టుకోవద్దు. మంచి వాళ్ళ మనస్సు ఎలా ఉంటుందో అలానే మాట ఉంటుంది. వారి మాటను బట్టి వారి పని కూడా ఉంటుంది. ఇలా మనసు, మాట, పనులు ఈ మూడూ ఒకే విధంగా కలవారు సాధుపురుషులు.

SCERT TELANGANA

## VI. प्रशंसा

भवतः विद्यालये काचन बालिका प्रतिदिनं प्रार्थनायाम् एकं संस्कृतश्लोकं वदति । तस्याः एतत्कौशलमुद्दिश्य भवतः अभिप्रायः कः ?

## VII. भाषांशाः

(अ) अधः दत्तं वाक्यद्वयं पठन्तु । विवरणम् अवगच्छन्तु ।

**(१) शारदा अमन्दमन्दहासमुखी**

**(२) सुन्दरदरहासवदनानि**

- अत्र वाक्यद्वये द्विवारम् आगते पदे के ?
- प्रथमवाक्ये मन्दशब्दस्य द्वितीयवाक्ये दरशब्दस्य च आवृत्तिः दृश्यते । अत्र मन्द-दर पदे अव्यवधानतया आगते ।
- तयोः समानपदयोः अर्थः अपि भिन्नः एव ।

**★ यत्र हलां समुदायः अर्थभेदेन अव्यवधानतया प्रयुज्यते, तत्र छेकानुप्रासालङ्कारः भवति ।**

(आ) अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।

अनाथनाथसर्वज्ञ गीर्वाणगणवन्दित !

### परियोजनाकार्यम्

१. **वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणात्**
**औदार्यादघशोषणादगणितश्रेयःपदप्रापणात् ।**
**सेव्यः श्रीपतिरेक एव जगतामेतेऽभवन्साक्षिणः**
**प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः ॥**

अत्र षण्णां कथानां निरूपणमस्ति । ताः कथाः काः इति ज्ञात्वा कक्ष्यायां वदन्तु ।

२. एकैकस्याः विभक्तेः श्लोकद्वयं सङ्गृह्य भित्तिपत्रे लिखित्वा आनयन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. श्लोकानां भावं वक्तुं शक्नोमि । | | |
| २. कठिनशब्दान् धारालतया पठितुं शक्नोमि । | | |
| ३. श्लोकस्थविभक्तिपदानि लक्षयितुं शक्नोमि । | | |
| ४. मातृभाषया दत्तस्य अनुच्छेदस्य संस्कृतभाषया अनुवादं कर्तुं शक्नोमि । | | |

SCERT TELANGANA

प्रथमः भागः

# ३. भगवान् शशाङ्कः

## पठन्तु, विचिन्त्य वदन्तु

भगवान् सूर्यः पूर्वस्यां दिशि प्रत्यहम् उदेति । प्रतीच्यां दिशि अस्तमेति । सः सूर्यः सर्वेषां प्राणिनां कर्मसाक्षी भवति। तथैव आरोग्यप्रदाता । शास्त्रज्ञाः खगोले बृहत् नक्षत्रं सूर्य एवेति अभिप्रयन्ति । सः समस्तलोकाय कान्तिं यच्छति । श्रीवाल्मीकिप्रणीते श्रीमद्रामायणे सूर्यः एवं वर्णितः।

**नक्षत्रग्रहताराणामधिपो विश्वभावनः।**
**तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ।।**
**नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।**
**ज्योतिर्गणानां पतये दिनाधिपतये नमः।।**
**जयाय जयभद्राय हर्यश्वाय नमो नमः।**
**नमो नमस्सहस्रांशो आदित्याय नमो नमः।।**

यथा सूर्यस्य वर्णनम् अत्र कृतं तथा वेदपुराणकाव्येषु प्रकृतिवर्णनावसरे चन्द्रपर्वतारण्यसमुद्रादीनां वर्णनं कृतं प्रसिद्धमेव । तेनैव प्रकारेण श्रीमद्रामायणे वाल्मीकिना अपि चन्द्रस्य वर्णनम् अतिमनोहरतया कृतम् ।

### उद्देश्यम्

★ वाल्मीकिप्रणीतस्य रमणीयकाव्यस्य रामायणस्य परिचयप्रदानम् ।
★ संस्कृतभाषायां विद्यमानस्य अपूर्वसरलसाहित्यस्य परिचयप्रदानम् ।

### प्रश्नाः

१. उपर्युक्तानुच्छेदः किं वदति ?
२. अनुच्छेदे सूर्यवर्णनसम्बद्धान् श्लोकान् पठन्तु।
३. प्रकृते अनुच्छेदे सूर्यवर्णनात्मकश्लोकाः कस्मात् ग्रन्थात् स्वीकृताः?
४. उपरि श्लोकेषु सूर्यः कथं वर्णितः ?

## पृष्ठभूमिः

महर्षिः वाल्मीकिः श्रीमद्रामायणाख्यं महाकाव्यं व्यरचयत् । श्रीमद्रामायणे काण्डसप्तकं वर्तते। तेषु अन्यतमं सुन्दरं पञ्चमं काण्डं सुन्दरकाण्डमिति प्रसिद्धम् । अस्मिन् सुन्दरकाण्डे भगवान् हनूमान् सीतान्वेषणाय शतयोजनविस्तीर्णं समुद्रं तीर्त्वा लङ्कां प्राविशत् । तदा रात्रिरजायत । तत्कारणेन ज्योत्स्ना एव तस्मै मार्गं दर्शयतीव आसीत्। तदानीं हनूमान् आनन्देन चन्द्रम् अपश्यत्। तस्मिन् सन्दर्भे कविना विरचिताः चन्द्रवर्णनपराः श्लोकाः प्रस्तुतपाठ्यांशरुपेण स्वीकृताः ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

★ ततस्स मध्यङ्गतमंशुमन्तं ज्योत्स्नावितानं महदुद्वमन्तम् ।
दर्दश धीमान् दिवि भानुमन्तं गोष्ठे वृषं मत्तमिव भ्रमन्तम् ॥१॥

★ लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥२॥

★ या भाति लक्ष्मीर्भुवि मन्दरस्था यथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था रराज सा चारु निशाकरस्था ॥३॥

★ हंसो यथा राजतपञ्जरस्थः सिंहो यथा मन्दरकन्दरस्थः ।
वीरो यथा गर्वितकुञ्जरस्थः चन्द्रोऽपि बभ्राज तथाम्बरस्थः ॥४॥

★ स्थितः ककुद्मानिव तीक्ष्णशृङ्गो महाचलः श्वेत इवोच्चशृङ्गः ।
हस्तीव जाम्बूनदबद्धशृङ्गो रराज चन्द्रः परिपूर्णशृङ्गः ॥५॥

★ विनष्टशीताम्बुतुषारपङ्को महाग्रहग्राहविनष्टपङ्कः ।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को रराज चन्द्रो भगवान् शशाङ्कः ॥६॥



★ शिलातलं प्राप्य यथा मृगेन्द्रो
महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्रः
तथा प्रकाशो विरराज चन्द्रः ॥७॥

SCERT TELANGANA

## भावाः -

१. चन्द्रः विनिर्मले आकाशे
प्रकाशमानः वर्तते इति
वर्णयन् वाल्मीकिमहर्षिः
स्वदार्शनिकतां वर्णननैपुण्यञ्च
अस्माकं पुरतः उपस्थापयति । आकाशे
नक्षत्राणां मध्ये ज्योत्स्नां दिशि दिशि विकिरन् चन्द्रः गोष्ठे चरन् मत्तः वृषभः इव प्राकाशत ।

२. लोकानां पापानि निवारयन् समुद्रं वर्धयन् प्राणिनस्सर्वान् प्रकाशयन् चन्द्रः नक्षत्राणां मध्ये उदितस्सन् हनुमता दृष्टः ।

३. पृथिव्यां मन्दरस्था, सायङ्काले समुद्रस्था जले कमलस्था या शोभा भाति सैव शोभा चन्द्रे अवर्तत ।

४. राजतपञ्जरे क्रीडार्थं स्थापितः हंसः इव, पर्वतगुहायां निश्चलेन स्थितः सिंहः इव, मत्तगजस्योपरि स्थितः वीरः इव, अम्बरे स्थितः चन्द्रमाः अतितरां व्यराजत ।

५. तीक्ष्णैः शृङ्गैः शोभितः वृषभः इव, उच्चशृङ्गैः युक्तः श्वेताचलः इव, सुवर्णखचितदन्तैः युक्तः गजः इव आकाशे चन्द्रः सम्पूर्णकिरणैः शोभमानः आसीत् ।

६. शीतशीकरैः शीतलहिमबिन्दूनां नाशेन, सूर्यकिरणप्रसारणेन नष्टमालिन्यः
धवलकान्तेः आश्रयेण च निर्मलकिरणः
सन् विराजमानः चन्द्रः हनुमता दृष्टः।

७. पर्वतशिखरम् अधिरुह्य दिशः पश्यन् सिंहः
यथा प्रकाशते, महारणरङ्गे प्रविष्टः
मत्तमातङ्गः यथा विराजते, शत्रुहस्तेभ्यः
स्वीयं राज्यं पुनः प्राप्य राजा कश्चित् यथा
प्रकाशते तथा आकाशे नक्षत्राणां मध्ये
चन्द्रः विरराज ।



SCERT TELANGANA

### कविपरियचः

श्रीमद्रामायणं वाल्मीकिमहर्षिः व्यरचयत् । अस्य आदिकविः, कविकोकिलः, मुनिसिंहः इत्यादीनि बिरुदानि सन्ति । रामायणे चतुर्विंशतिसहस्रलोकाः विद्यन्ते । संस्कृतसाहित्यजगति श्रीमद्रामायणमेव आदिकाव्यम् ।

श्रीमद्रामायणे बाल-अयोध्या-अरण्य-किष्किन्ध-सुन्दर-युद्ध-उत्तरकाण्डाः इति सप्तकाण्डाः सन्ति ।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) भवन्तः पूर्णचन्द्रं कदा पश्यन्ति ?

आ) चन्द्रः अस्मभ्यं किं ददाति ? के चन्द्राधारेण जीवन्ति ?

इ) अस्मिन् पाठे चन्द्रः कैस्सह उपमीयते ?

ई) पाठस्य सारांशं स्वीयवाक्यैः वदन्तु ।

### II. पठन्तु, अवगच्छन्तु , व्यक्तीकुर्वन्तु

अ) श्लोकेषु विद्यमानानाम् उपमानवाचकानां पदानाम् अधः रेखाङ्कनं कृत्वा पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु ।

आ) अधः दत्तानां वाक्यानां ससन्दर्भ भावं लिखन्तु ।

१. गोष्ठे वृषं मत्तमिव भ्रमन्तम्

२. रराज चन्द्रः परिपूर्णशृङ्गः

इ) अधः दत्तं पद्यांशं पठित्वा कोष्ठकस्य आधारेण वाक्यानि लिखन्तु ।

**विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।**
**खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ॥**

**उदा** - सुजनस्य शक्तिः परेषां रक्षणाय भवति ।

| | | |
|---|---|---|
| | | परेषां परिपीडनाय |
| | विद्या | दानाय |
| दुर्जनः | धनं | मदाय |
| सुजनः | शक्तिः | विवादाय |
| | | ज्ञानाय |
| | | रक्षणाय |

SCERT TELANGANA

ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. शिलायां कः प्राप्तवान् ?

२. गजेन्द्रः कं प्राप्तवान् ?

३. राज्यं प्राप्य कः रराज ?

४. चन्द्रः कुत्र विरराज ?

५. हनूमान् कीदृशं चन्द्रं ददर्श ?

६. चन्द्रः कुत्र कुत्र कीदृशः इव विरराज ?

७. चन्द्रः कानि विराजयति ? कानि विनाशयति ?

८. चन्द्रः कं समेधयति ?

## III. स्वीयरचना

(अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. चन्द्रस्य ज्योत्स्ना भवते रोचते किम् ? किमर्थम् ?

२. अस्मिन् पाठे चन्द्रः कविना वर्णितः । भवान् स्वीयवाक्यैः तस्य वर्णनं करोतु ।

३. चन्द्रम् अतिरिच्य आकाशे के के सञ्चरन्ति ? तेषाम् उपयोगान् लिखन्तु ।

(आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. हनुमता दृष्टः चन्द्रः कीदृशः इति स्वीयवाक्यैः लिखन्तु ।

२. चन्द्रवर्णने कविप्रतिभां वर्णयन्तु ।

## IV. पदजालाभिवृद्धिः

अ) अधः दत्तान् श्लोकान् उच्चैः पठन्तु ।

**हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः।**
**विधुस्सुधांशुश्शुभ्रांशुरोषधीशो निशापतिः।।**
**अब्जो जैवातृकस्सोमो ग्लौर्मृगाङ्कः कलानिधिः।**
**द्विजराजश्शशधरो नक्षत्रेशः क्षपाकरः।।**

- एतानि चन्द्रशब्दस्य पर्यायपदानि अमरकोशे उक्तानि ।

**एतेषु चन्द्रस्य विंशतिः नामानि सन्ति । पदच्छेदं कृत्वा तानि लिखन्तु ।**



SCERT TELANGANA

आ) अधः दत्तानि वाक्यानि पठन्तु। रेखाङ्कितपदानाम् अर्थान् जानन्तु । तानि उपयुज्य नूतनवाक्यानि लिखन्तु ।

१. चन्द्रः ज्योत्स्नां तनोति । २. शीतांशुः निशायां रराज ।

३. नद्यः महोदधिं प्राप्नुवन्ति । ४. भगवान् शशाङ्कः दिवि रराज ।

इ) इव इति अव्ययं येषु श्लोकेषु विद्यते तान् श्लोकान् पठन्तु । किं पदं केन उपमितम् इति ज्ञात्वा वाक्यानि रचयन्तु ।

**उदा** - उच्चशृङ्गैः श्वेतमहाचलः इव पूर्णकिरणैः चन्द्रः विराजते ।

## V. सर्जनात्मकता

अ) प्रतिपत्तः पूर्णिमापर्यन्तं प्रतिदिनं जायमानस्य चन्द्रविकासस्य चित्राणि लिखित्वा प्रदर्शयन्तु।

अ) अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఆకాశం నీలిరంగులో ఉంటుంది. ఆకాశంలో మేఘాలు సంచరిస్తాయి. పగలు సూర్యుడు ప్రకాశిస్తాడు. రాత్రి చంద్రుడు వెన్నెలను కురిపిస్తాడు. అలాగే నక్షత్రాలు తళుకు తళుకుమని మెరుస్తూ ఉంటాయి. ఇలా ఎన్నో వింతలతో ఆకాశం ఎంతో సుందరంగా ఉంటుంది.

## VI. प्रशंसा

अ) भवत्कक्ष्यायां विद्यालयं वर्णयितुं कः शक्नोति, सूचयतु ।

आ) लोकाय चन्द्रस्य उपयोगाः के ? निरूपयन्तु ।

## VII. भाषांशाः

अ) सन्धिं कृत्वा - सन्धिनाम निर्दिशन्तु ।

| | | | | |
|---|---|---|---|---|
| १. महा | + | उदधिः | = | ............ |
| २. शीत | + | अंशुः | = | ............ |
| ३. महा | + | अचलः | = | ............ |
| ४. हस्ती | + | इव | = | ............ |

आ) विसन्धिं कृत्वा - सन्धिनाम निर्दिशन्तु ।

| | | | | |
|---|---|---|---|---|
| १. तथैव | = | ......... | + | ......... |
| २. चन्द्रोऽपि | = | ......... | + | ......... |

SCERT TELANGANA

| | | | | |
|---|---|---|---|---|
| ३. मृगेन्द्रः | = | ......... | + | ......... |
| ४. नरेन्द्रः | = | ......... | + | ......... |
| ५. निर्मलाङ्गः | = | ......... | + | ......... |

### इ) एतानि वाक्यानि पठन्तु । अवगच्छन्तु ।

**१. पार्वत्याः मुखं चन्द्रः इव शोभते ।**

**२. हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ।**

✶ प्रथमवाक्ये पार्वत्याः मुखं चन्द्रः इव अस्तीति मुखं चन्द्रेण उपमीयते ।

✶ द्वितीयवाक्ये कृष्ण! तव कीर्तिः हंसी इव आकाशगङ्गामवगाहते इति कृष्णस्य कीर्तिः हंसेन उपमीयते।

**उपमालङ्कारे चत्वारि अङ्गानि भवन्ति। उपमानम्, उपमेयम्, उपमावाचकः, साधारणधर्मः।**

| | | | |
|---|---|---|---|
| **प्रथमवाक्ये** | उपमानं | - | चन्द्रः |
| | उपमेयं | - | पार्वत्याः मुखम् |
| | उपमावाचकः | - | इव शब्दः |
| | द्वयोः साधारणधर्मः | - | शोभा । |

✶ साधारणतया उपमानोपमेययोः साम्यं यत्र वर्तते तत्र उपमालङ्कारः भवति ।

- द्वितीयवाक्यस्य चतुर्णाम् अङ्गानां निरूपणं कृत्वा उपमालङ्कारं जानन्तु ।

### (ई) अधः दत्तस्य वाक्यस्य अङ्गानां निरूपणं कृत्वा अलङ्कारं जानन्तु ।

कालिदासः वाल्मीकिरिव सुप्रसिद्धः संस्कृतकविः।

### (उ) पाठे स्थितानि उपमालङ्कारवाक्यानि लिखित्वा अङ्गनिरूपणं कुर्वन्तु । अलङ्कारं जानन्तु ।

## परियोजनाकार्यम्

अन्तरिक्षं गतानां व्योमगामिनां चित्राणि सङ्कलय्य भित्तिपत्रे लेपयन्तु। तेषां नामानि लिखन्तु ।

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. श्लोकानां भावं वक्तुं शक्नोमि । | ☐ | ☐ |
| २. चन्द्रं स्वीयवाक्यैः वर्णयितुं शक्नोमि । | ☐ | ☐ |
| ३. कालिदासमहाकविमुद्दिश्य पञ्चवाक्यानि लेखितुं शक्नोमि । | ☐ | ☐ |
| ४.प्रतिपत्तः पूर्णिमापर्यन्तं चन्द्रस्य विविधचित्रानि लेखितुं शक्नोमि । | ☐ | ☐ |

SCERT TELANGANA

# दानस्य माहात्म्यम्

पूर्वं कश्चन धनिकः आसीत् । सः महाकृपणः आसीत् । धनव्ययभीत्या सः न रुचिकरं भोजनं करोति स्म, न उत्तमानि वस्त्राणि धरति स्म, न वा भोगसाधनानाम् उपयोगं करोति स्म । भिक्षुकाः तस्य गृहस्य समीपम् आगन्तुम् अपि न शक्नुवन्ति स्म । पुण्यकार्यार्थम् अपि सः धनव्ययं नैव करोति स्म ।

सः यस्मिन् नगरे वसति स्म, तस्मिन् नगरे कदाचित् कश्चन घोरः साङ्क्रमिकरोगः प्रसृतः । रोगकारणतः बहवः मृताः अभवन् ।

जनानां दुर्गतिं दृष्ट्वा खिन्नः कश्चन महात्मा तत् नगरम् आगतवान् । नगरस्य दुःस्थितिं सम्यक् अवगतवान् सः । निर्धनानां रोगग्रस्तानां सेवार्थं प्रभूतं धनम् आवश्यकम् आसीत् । 'एतदर्थं धनसङ्ग्रहः करणीयः इति निश्चितवान् सः । धनदानसमर्थाः धनिकाः नगरे के के सन्ति इति जनान् विचार्य, सः धनिकानां नामानि सङ्गृहीतवान् । किन्तु धनिकाः सन्नध्दाः न आसन् ? एतदर्थं सः महात्मा एकम् उपायं कृतवान् ।

सः तस्य महाकृपणस्य समीपं गत्वा नमस्कृत्य स्वस्य उद्देश्यं निवेद्य प्रार्थितवान् - "श्रीमन् । भवता मम एकं साहाय्यं करणीयम् । तत् न धनरूपेण । भवता दशसहस्ररूप्यकात्मकम् एकं देयादेशपत्रं (चेक्) मह्यं दातव्यम् । सायं तत् भवते प्रतिदास्यामि । एतेन भवतः अल्पः अपि व्ययः न भविष्यति इति ।



तदा सः कृपणधनिकः पृष्टवान् "तादृशं देयादेशपत्रं स्वीकृत्य किं करिष्यति भवान्" ? इति ।

"अहं तत् अन्यधनिकेभ्यः प्रदर्शयिष्यामि । तत् दृष्ट्वा आश्चर्यम् अनुभवन्तः ते औदार्येण धनं दास्यन्ति । एवम् अधिकप्रमाणेन धनसङ्ग्रहणे भवतः देयादेशपत्रं साहाय्यं करिष्यति" इति उक्तवान् महात्मा ।

'एतादृशपत्रदानेन महात्मनः प्रयोजनं न भवेत् । किन्तु मम हानिः तु कापि नास्ति' इति चिन्तयित्वा सः कृपणधनिकः महात्मने दशसहस्ररूप्यकात्मकं देयादेशपत्रं दत्तवान् ।

सायङ्कालाभ्यन्तरे तेन महात्मना लक्षशः रूप्यकाणि सङ्गृहीतानि । देयादेशपत्रं प्रतिदातुं यदा उद्युक्तः तदा सः धनिकः तस्य स्वीकरणं निराकृतवान् । 'एतस्य किं कारणम्' ? इति आश्चर्येण कृपणधनिकं पृष्टवान् महात्मा ।

तदा कृपणधनिकः उक्तवान् - "दानतः कीदृशी तृप्तिः प्राप्यते इति अद्य ज्ञातं मया । भवान् देयादेशपत्रं स्वीकृत्य गतवान् खलु ! ततः बहवः गृहम् आगत्य मम दानस्य प्रशंसां कृतवन्तः । अन्ये केचन पत्रद्वारा अभिनन्दन्तः प्रशंसां कृतवन्तः । ततः या तृप्तिः जाता तादृशी तृप्तिः मया जीवने इतः पूर्वं कदापि न प्राप्ता आसीत् । यदि देयादेशपत्रम् अहं प्रतिस्वीकुर्यां तर्हि सा तृप्तिः नश्येत् । तत् न इच्छामि अहम् । अतः तत्र उल्लिखितं धनं भवतः सेवाकार्यार्थं स्वीकरोतु भवान्" इति ।

एतत् वचनं श्रुत्वा महात्मा आश्चर्येण मूकः अभवत् ।

SCERT TELANGANA

द्वितीयः भागः

# ४. मनुजरीतिः

## पठन्तु, विचिन्त्य वदन्तु

रमा - लते ! तव वदने सन्तोषः दृश्यते । किं कारणम् ?

लता - किमपि नास्ति सखि ! मम मातामहः अद्य श्लोकानां विषये उक्तवान् ।

रमा - किम् उक्तवान् ?

लता - श्लोकेषु कश्चन मकुटः विद्यते इति ।

रमा - मकुटः नाम कः?

लता - केषाञ्चन श्लोकानाम् अन्तिमे पादे एकं पदं वा, वाक्यं वा मुहुर्मुहुः आयाति स एव मकुटः।

रमा - स्पष्टतया कथय ।

लता - ''दाशरथी करुणापयोनिधी'' इति, ''सुमती'' इति, ''कृष्णा'' इति च तेलुगुभाषानिबद्धेषु शतकपद्येषु दृश्यते खलु ! सः एव मकुटः इति मम मातामहेन उक्तम् ।

रमा - तथा वा अस्माकम् अध्यापकः अपि शतकश्लोकान् उद्दिश्य अद्य पाठं बोधयति खलु !

लता - आम् । शीघ्रं गच्छावः।

### प्रश्नाः

१. लतायाः मातामहः किम् उक्तवान् ?

२. मकुटः नाम कः ?

३. केषाञ्चन मकुटानां नामानि वदन्तु ।

### उद्देश्यम्

★ मनुजव्यवहाररीतेः ज्ञापनम् ।

★ अल्पमपि उत्तमं कर्म अत्यन्तं फलदायकं भवतीति बोधनम् ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

उपकर्तारमुद्दिश्य नोपकारेऽस्त्यपूर्वता ।
उपकर्ताऽपकर्तुस्तु सुमते सुजनो मतः ॥ १ ॥



शुभलग्नेऽभिषिक्तोऽपि हेमसिंहासने वरे ।
शुनकः किं विजह्यात्तं सुमते पूर्ववर्तनम् ॥ २ ॥



पिपीलनिर्मिता यान्ति वल्मीकाः फणिनां वशम् ।
तथाज्ञैः सञ्चितं वित्तं सुमते नृपसाद्भवेत् ॥ ३ ॥



कोप एव स्वकीयोऽरिः शान्तिः रक्षा तथा दया ।
बन्धुः तुष्टिर्भवेत्स्वर्गो निरयस्सुमते व्यथा ॥ ४ ॥



विषं स्यात्फणिनो मूर्ध्नि पुच्छाग्रे वृश्चिकस्य च ।
आचूडापादं सर्वत्र खलस्य सुमते विषम् ॥ ५ ॥

SCERT TELANGANA



किं मे बलवतश्छिन्नमिति मा बह्वरिर्भव ।
पिपीलिकावशं प्राप्तो म्रियते सुमते फणी ॥ ६ ॥



अल्पो वदति साटोपं प्रशान्तः सज्जनः पुनः ।
कांस्यवत्किं स्वनेत्स्वर्णं श्रूयतां वेम विश्वद ॥ ७ ॥



कर्पूरक्षारयोः रूपं तुल्यं भिन्नस्तु तद्रसः ।
पुण्यपापनरेष्वेवं श्रूयतां वेम विश्वद ॥ ८ ॥



आत्माशुद्धौ किमाचारात् चित्ताशुद्धौ शिवार्चनात् ।
पात्राशुद्धौ फलं पाकात् श्रूयतां वेम विश्वद ॥ ९ ॥



चित्तशुद्ध्या कृतं पुण्यमण्वपि श्लाघ्यतां व्रजेत् ।
न्यग्रोधस्य कियद्बीजं श्रूयतां वेम विश्वद ॥ १० ॥

SCERT TELANGANA

## भावाः -

१. सुमते ! यः उपकारं करोति, तस्य प्रत्युपकारकरणे विशेषः कोऽपि नास्ति । यः अपकारं करोति, तस्य उपकारकरणेन उपकर्ता सुजनः इति उच्यते ।

२. सुमते ! शुनकः उत्तमे शुभलग्ने स्वर्णसिंहासने राजभावेन अभिषिक्तः चेदपि स्वस्य पूर्ववर्तनं (पादरक्षाखादनादिकं) न त्यजति ।

३. सुमते ! पिपीलिकाभिः निर्मिताः वल्मीकाः सर्पैः आक्रान्ताः भवन्ति । तथा अज्ञैः सम्पादितं रक्षितं च वित्तं नृपः वशीकरोति ।

४. सुमते ! स्वस्य कोपः एव स्वस्य शत्रुः। स्वस्य शान्तस्वभावः एव स्वस्य रक्षणं करोति । स्वस्य दया एव स्वस्य बन्धुः भवति, स्वस्य सन्तोष एव स्वस्य स्वर्गतुल्यः, स्वस्य दुःखमेव स्वस्य नरकसमानं भवति ।

५. सुमते ! सर्पस्य शिरसि विषं भवति । वृश्चिकस्य पुच्छाग्रे विषं भवति । किन्तु दुष्टस्य शिरसः आरभ्य पादपर्यन्तं सर्वत्र विषं भवति ।

६. अहं बलवान् । मम किमपि कष्टं न भविष्यति इति वदन् बहुभिः शत्रुत्वं न प्राप्नुयात् । सर्पः यद्यपि बलवान् तथापि पिपीलिकानां वशंगतः सन् मरणं प्राप्नोति ।

७. वेम ! विश्वद ! अल्पः जनः सगर्वं भाषणं करोति । किन्तु सज्जनः प्रशान्तः भवति । कांस्यम् उच्चैः शब्दं करोति, स्वर्णं शब्दं न करोति ।

८. विश्वद ! वेम ! कर्पूरस्य लवणस्य च रूपं समानं, तयोः रुचिः तु भिन्ना एव । एवमेव पुण्यकार्यकर्तुः पुरुषस्य पापिनः च रूपं समानं चेदपि कार्ये भिन्नता भवति ।

९. विश्वद ! वेम ! आत्मशुद्धिं विना आचारेण प्रयोजनं नास्ति । चित्तशुद्धिं विना शिवपूजनमपि वृथा एव । पात्रशुद्धिं विना पचनमपि व्यर्थमेव भवति ।

१०. स्वच्छेन मनसा कृतं पुण्यम् अणु चेदपि स्तोतव्यं भवति। न्यग्रोधवृक्षबीजस्य आकारः तु अल्पः । फलरूपः वृक्षः कियान् महान् !

SCERT TELANGANA

**कविपरिचयः**

कलाप्रपूर्ण-आचार्य-श्री.ति.गु. वरदाचार्यमहोदयाः आन्ध्रप्रदेशे कृष्णामण्डले चिट्टिगूडूर इति ग्रामे जन्म प्राप्तवन्तः । एते नारसिंहसंस्कृतकलाशालां संस्थाप्य अनेकेभ्यः जनेभ्यः विद्यादानम् अकुर्वन् । एते विद्वांसः सुप्रसिद्धान् आन्ध्रशतकग्रन्थान् संस्कृतभाषया अनूदितवन्तः। एतेषां ''कुलपतिः'', ''कलाप्रपूर्णः'' इत्यादिबिरुदानि सन्ति ।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) श्लोकानां भावं जानन्तु ।

आ) ''केवलं बलस्यैव प्राधान्यं न, किन्तु बुद्धिबलेनापि कार्याणि कर्तुं शक्यन्ते'' इत्यस्मिन् विषये उदाहरणानि वदन्तु ।

इ) अपकर्तुः अपि उपकारं करोतु इति श्लोके उक्तम् । किमर्थम् ?

ई) पुरुषेषु पुण्यपुरुषाः विशिष्टाः भवन्ति। कैः लक्षणैः तान् अभिज्ञातुं शक्नुमः?

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठे सन्धियुक्तपदानि चित्वा लिखन्तु ।

आ) अधः दत्तान् पद्यपादान् पठित्वा तद्भावबोधकानि संस्कृतवाक्यानि लिखन्तु ।

1 తన కోపమే తన శత్రువు

2. తలనుండు విషము ఫణికిని

3. ఉప్పుకప్పురంబు నొక్క పోలిక నుండు

4. మేడిపండు చూడ మేలిమై యుండును

इ) अधः दत्तं श्लोकं पठन्तु । प्रश्नानां समाधानानि लिखन्तु ।

**वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः ।**
**करणं परोपकरणं येषां केषां न ते वन्द्याः ॥**

१. वदनं कीदृशं भवेत् ?

२. सुधामुचः काः?

३. करणं कथं भवेत् ?

SCERT TELANGANA

### ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. कः सुजनः इति उच्यते ? कथम् ?
२. स्वकीयं दुःखं केन समानं भवति ?
३. कस्य पूर्ववर्तनं न भवति ?
४. अज्ञैः सम्पादितं वित्तं किं भवति ?
५. दुष्टस्य स्वभावः कीदृशः ?
६. पुण्यपापनरेषु को भेदः ?
७. अल्पसज्जनयोः भाषणं कथं भवति ?
८. कीदृशं पुण्यं स्तोतव्यं भवति?कथम् ?

## III. स्वीयरचना

### अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।

१. अस्मिन् पाठे मानवस्वभावः केषु सन्दर्भेषु कैः सह सादृश्यं प्राप्नोति ?
२. "कोपः एव आत्मनः अरिः" एतद्विषये भवतः अभिप्रायं लिखतु ।
३. पिपीलिकाः मिलित्वा बलवन्तं सर्पं मारयन्ति। एतस्मात् भवान् किं ज्ञातवान् ?

## IV. पदजालाभिवृद्धिः

### अ) अधः दत्तानां पदानां समुचितविरुद्धार्थकपदानि विलिख्य तैः वाक्यानि रचयन्तु ।

**उदा** **धर्मः X अधर्मः -** श्रीरामः धर्मपरायणः आसीत् । अधर्मः तस्य परिपालने कुत्रापि नासीत् ।

१ उपकारः X
२. सुजनः X
३. कोपः X
४. विषम् X

### आ) अधः दत्तानां रेखाङ्कितपदानां समानार्थकपदानि विलिख्य सम्पूर्णं वाक्यं लिखन्तु ।

१. ललितादेवी कनकसिंहासने उपविशति ।
२. क्रोधः बाधाकरः भवति ।
३. फणी महेश्वरस्य कण्ठाभरणम् ।
४. अस्माकं चित्तं दयापूर्णं भवेत् ।

### इ) मञ्जूषातः उचितं पदं चित्वा वाक्यानि पूरयन्तु ।

साटोपम्, अरिः, मूर्ध्नि, तुल्यम्

१. कोपः एव आत्मनः ....................
२. विषं स्यात् फणिनः ..................
३. अल्पो वदति .....................
४. कर्पूरक्षारयोः रूपं ....................



SCERT TELANGANA

## V. सर्जनात्मकता

१. कस्यापि एकस्य श्लोकस्य भावम् आधारीकृत्य लघुकथामेकां रचयन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

దశరథుడు అనే రాజు కోసలదేశమును పరిపాలించెను. అతని రాజధాని అయోధ్య. అతనికి నలుగురు కుమారులు ఉండిరి. అందులో పెద్దవాడు శ్రీరాముడు, మిగిలినవారు భరతుడు, లక్ష్మణుడు, శత్రుఘ్నుడు. వారందరు వశిష్ఠుని వద్ద విద్యాభ్యాసము చేసిరి.

## VI. प्रशंसा

पाठस्थपद्यानि तेलुगुभाषातः अनूदितानि । अतः पद्यानां भावमनुसृत्य तेलुगुभाषापद्यानि ज्ञात्वा, तेषां तुलनां कुर्वन्तु ।

## VII. भाषांशाः

अ) सन्धिं कृत्वा सन्धिनाम निर्दिशन्तु ।

| | | |
|---|---|---|
| १. स + आटोपम् | २. तथा + अङ्गैः | ३. पुच्छ + अग्रे |
| ४. पात्र + अशुद्धिः | ५. बहु + अरिः | ६. अणु + अपि |

आ) अधः दत्ते पद्यपादे स्थितानाम् अक्षराणां गुरुलघुचिह्नानि सूचयन्तु ।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया

इ) अधः दत्ते पद्यपादे गुरुलघुनिरूपणं, तेषां गुरुलघूनां विभजनम् अवगच्छन्तु ।

| | | | | | | |
|---|---|---|---|---|---|---|
| U U U | I I U | I U I | I I U | U U I | U U I | U |
| व न्दे श | म्भु मु मा | प तिं सु | र गु रुं | व न्दे ज | ग त्का र | णम् |

- उपरि स्थितस्य पद्यपादस्य गुरुलघून् परिशीलितवन्तः खलु ! तथैव पद्यपादे सर्वत्र त्रयाणाम् अक्षराणां परम् एका रेखा स्थापितेति दृष्टवन्तः खलु !
- गुरुलघुचिह्नितानि त्रीणि अक्षराणि मिलित्वा एकः त्र्यक्षरगणः भवति ।
- अधः पद्यपादस्य त्रयाणां त्रयाणाम् अक्षराणां गुरुलघूनि मिलित्वा गणाः सूच्यन्ते ।

| | | | |
|---|---|---|---|
| U U U | I I U | I U I | |
| वन्देश | म्भुमुमा | पतिंसु | |
| I I U | U U I | U U I | U |
| रगुरुं | वन्देज | गत्कार | णम् |

एवमेव एकाक्षरगणः, द्व्यक्षरगणः, चतुरक्षरगणश्च भवति ।

SCERT TELANGANA

इ) गणानां नामानि ज्ञातुम् अधः दत्तः श्लोकः उपयुज्यते ।

**"आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।**
**यरता लाघवं यान्ति मनौ तु गुरुलाघवम्"।।** इति

**श्लोकार्थः**

१. UII आदिगुरुः - अर्थात् क्रमेण एकः गुरुः, द्वौ लघू भवतः चेत् 'भगणः'।
२. IUI मध्यगुरुः - अर्थात् क्रमेण लघुः गुरुः लघुः भवति चेत् 'जगणः'।
३. IIU अन्त्यगुरुः - अर्थात् क्रमेण द्वौ लघू, एकः गुरुः भवति चेत् 'सगणः'।
४. IUU आदिलघुः - अर्थात् क्रमेण लघुः, द्वौ गुरू भवतः चेत् 'यगणः'।
५. UIU मध्यलघुः - अर्थात् क्रमेण गुरुः, लघुः, गुरुः भवति चेत् 'रगणः' ।
६. UUI अन्त्यलघुः - अर्थात् क्रमेण द्वौ गुरू एकः लघुः भवति चेत् 'तगणः'।
७. UUU त्रयः गुरवः यस्मिन् गणे भवन्ति सः 'मगणः' इत्युच्यते ।
८. III त्रयः लघवः यस्मिन् गणे भवन्ति सः 'नगणः' इत्युच्यते ।

एवं प्रकारेण त्र्यक्षरगणाः अष्टौ ।

ई) अधः दत्तस्य पद्यपादस्य गुरुलघुचिह्नानि स्थापयित्वा गणविभजनं कुर्वन्तु । तेषां गणानां नामानि लिखन्तु ।

**"हंसो यथा राजतपञ्जरस्थः"।**

### परियोजनाकार्यम्

तेलुगु वेमनशतकस्य संस्कृतानुवादात्मकं पुस्तकमेव वेमगीता । तत्पुस्तकं शिक्षकस्य सहयोगेन सङ्गृह्य भवदिष्टानि दशपद्यानि (तेलुगुसंस्कृतभाषयोः) सुन्दराक्षरैः भित्तिपत्रे विलिख्य आनयन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. अहं श्लोकान् श्राव्यतया गातुं शक्नोमि । | | |
| २. अहं पाठे स्थितानां पद्यानां सुमतिवेमनपद्यानां च साम्यं वक्तुं शक्नोमि । | | |
| ३. श्लोकानां भावान् स्वीयवाक्यैः लेखितुं शक्नोमि । | | |
| ४. श्लोकानां भावान् आधारीकृत्य कथामेकां लेखितुं शक्नोमि । | | |

**हितं मनोहारि च दुर्लभं वचः**

SCERT TELANGANA

द्वितीयः भागः

# ५. लौकिकज्ञानम्

## पठन्तु, विचिन्त्य वदन्तु

रमेशः - मित्र ! कुत्र गच्छसि ?
सुरेशः - देवालयम् ।
रमेशः - कस्य देवस्य आलयं गच्छसि ?
सुरेशः - शिवालयं गच्छामि ।
रमेशः - प्रतिदिनं गच्छसि वा ?
सुरेशः - न, प्रतिसप्ताहम् एकवारम् ।
रमेशः - कस्मिन् वासरे ?
सुरेशः - सोमवासरे ।
रमेशः - सोमवासरे शिवालयः गन्तव्यः इति नियमः कः ?
सुरेशः - नियमो नास्ति । परन्तु ईश्वरस्य प्रीतिकरमिति मत्वा गच्छामि । किमेवं यक्षवत् प्रश्नान् पृच्छसि ?
रमेशः - यक्षः सर्वदा प्रश्नान् पृच्छति किम् ?
सुरेशः - न, कदाचित् यक्षः धर्मराजम् अनेकान् प्रश्नान् पृष्टवान् । तेषां प्रश्नानामेव 'यक्षप्रश्नाः' इति नाम अस्ति ।
रमेशः - तर्हि यक्षप्रश्नान् धर्मराजस्य समाधानानि च कथय ।
सुरेशः - अरे ! किमर्थं त्वरा, श्वः वयं लौकिकज्ञानम् इति पाठे यक्षप्रश्नान् पठिष्यामः संस्कृतकक्ष्यायाम् । तदा श्रद्धया शृणु ।
रमेशः - अस्तु ।

### प्रश्नाः

१. संवादः कयोः मध्ये प्रचलति ?
२. रमेशः कथं प्रश्नान् पृच्छति ?
३. यक्षप्रश्नानां विषये भवन्तः किं जानन्ति ?

### उद्देश्यम्

★ जीवनमूल्यानाम् अवगमनम् ।

## पृष्टभूमिः

वनवासकाले द्वैतवने सञ्चरन्तः पाण्डवाः श्रान्ताः पिपासार्ताश्च अभवन् । तदा धर्मराजस्याज्ञया जलमन्विष्य आनेतुं सहदेवादारभ्य क्रमशः चत्वारः गताः। किन्तु ते चिराय नैव प्रत्यागताः। तदा धर्मराजः उत्कण्ठतया स्वसोदरान् गवेषयन् एकत्र सरोवरप्रान्ते मृतान् चतुरःसोदरान् दृष्ट्वा दुःखितो भवति । अत्रान्तरे तत्र स्थितः यक्षः धर्मराजमुद्दिश्य एवमवोचत् । हे राजन् ! ते सोदराः ममाज्ञानुरोधेन मम प्रश्नानां समाधानं वक्तुम् अशक्ताः जलं पीत्वा मृताः इति ।

एतत् श्रुत्वा सः धर्मराजः यक्षं प्रति एवमवोचत् - ''भवतः प्रश्नानां समाधानानि अहं वदिष्यामि, कृपया पृच्छतु'' इति । तदा यक्षः सर्वेषां प्रश्नानां समुचितानि समाधानानि प्रोक्तवन्तं धर्मराजं सन्तोषेण प्रशंस्य अनुगृह्य च मृतान् सोदरान् पुनरुज्जीवितवान् ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

यक्षः - केनस्विच्छ्रोत्रियो भवति केनस्विद्विन्दते महत् ।
केन द्वितीयवान् भवति राजन् केन च बुद्धिमान् ॥१॥

युधिष्ठिरः - श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत् ।
धृत्या द्वितीयवान् भवति बुद्धिमान् वृद्धसेवया ॥

यक्षः - किं स्विद् गुरुतरं भूमेः किं स्विदुच्चतरं च खात् ।
किं स्विच्छीघ्रतरं वायोः किं स्विद् बहुतरं तृणात् ॥२॥

युधिष्ठिरः - माता गुरुतरा भूमेः पिता चोच्चतरश्च खात् ।
मनः शीघ्रतरं वायोः चिन्ता बहुतरी तृणात् ॥

यक्षः - किं स्विदेको विचरते जातः को जायते पुनः ।
किं स्विद्धिमस्य भैषज्यं किं स्विदावपनं महत् ॥३॥

युधिष्ठिरः - सूर्य एको विचरते चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भैषज्यं भूमिरावपनं महत् ॥

यक्षः - किं स्विदात्मा मनुष्यस्य किं स्विद्दैवकृतः सखा ।
उपजीवनं च किं स्विदस्य किमस्य च परायणम् ॥४॥

युधिष्ठिरः - पुत्र आत्मा मनुष्यस्य भार्या दैवकृतः सखा ।
उपजीवनं च पर्जन्यः दानमस्य परायणम् ॥



यक्षः - किं नु हित्वा प्रियो भवति
किं नु हित्वा न शोचति ।
किं नु हित्वाऽर्थवान् भवति
किं नु हित्वा सुखी भवेत् ॥५॥

युधिष्ठिरः - मानं हित्वा प्रियो भवति
क्रोधं हित्वा न शोचति ।
कामं हित्वाऽर्थवान् भवति
लोभं हित्वा सुखी भवेत् ॥

यक्षः - केन स्विदावृतो लोकः
केन स्विन्न प्रकाशते ।
केन त्यजति मित्राणि
केन स्वर्गं न गच्छति ॥६॥

युधिष्ठिरः - अज्ञानेनावृतो लोकः तमसा न प्रकाशते ।
लोभात्त्यजति मित्राणि सङ्गात् स्वर्गं न गच्छति ॥

यक्षः - कोऽहङ्कार इति प्रोक्तः कश्च दम्भः प्रकीर्तितः ।
किं तद्दैवं परं प्रोक्तं किं तत् पैशुन्यमुच्यते ॥७॥

युधिष्ठिरः - महाऽज्ञानमहङ्कारो दम्भो धर्मध्वजोच्छ्रयः ।
दैवं दानफलं प्रोक्तं पैशुन्यं परदूषणम् ॥



SCERT TELANGANA

## भावाः -

१. प्रश्नः - हे युधिष्ठिर ! मानवः केन श्रोत्रियः भवति ? केन महत्त्वं प्राप्नोति ? केन द्वितीयवान् भवति ? केन बुद्धिमान् भवति ?

१. समाधानम् - यक्ष ! वेदाध्ययनेन मानवः श्रोत्रियः भवति । तपश्चर्यया महत्वं प्राप्नोति । धैर्येण द्वितीयवान् भवति । वृद्धानां सेवया बुद्धिमान् भवति ।

२. प्रश्नः - धरण्याः अपेक्षया गुरुतरं किं भवति ? आकाशात् उन्नतं किं भवति ? वायोरपि शीघ्रगामि किं भवति ? तृणात् बहुतरं किं भवति ?

२. समाधानम् - माता धरण्याः अपेक्षया गुरुतरा भवति । आकाशात् उन्नतः पिता भवति । वायोरपेक्षया शीघ्रगामि मनः भवति । तृणादपि बहुतरा चिन्ता भवति ।

३. प्रश्नः - एकाकी सन् कः सञ्चरति ? कः पुनः पुनः जायते ? हिमस्य औषधं किम् ? महत् क्षेत्रं किं भवति ?

३. समाधानम् - सूर्यः एक एव सञ्चरति । चन्द्रः पुनः पुनःजायते । अग्निरेव हिमस्य औषधं भवति। भूमिरेव महत् क्षेत्रं भवति ।

४. प्रश्नः - मानवस्य आत्मा कः भवति ? दैवप्रदत्तः सखा कः? तस्य जीवनाधारः कः? तस्य परं कर्तव्यं किं भवति ?

४. समाधानम् - मानवस्य आत्मा पुत्रः। भार्यैव दैवदत्तः सखा । मेघ एव जीवनाधारः। दानमेव परं कर्तव्यं भवति ।

५. प्रश्नः - मानवः किं त्यक्त्वा प्रियो भवति ? किं त्यक्त्वा दुःखरहितः भवति ? किं त्यक्त्वा अर्थवान् भवति ? किं त्यक्त्वा सुखी भवति ?

५. समाधानम् - अहङ्कारं त्यक्त्वा मानवः सर्वेषां प्रियो भवति । कोपं त्यक्त्वा दुःखरहितः भवति । कामं त्यक्त्वा अर्थवान् भवति लोभं त्यक्त्वा सुखी भवति ।

६. प्रश्नः - सर्वं जगत् केन आवृतं भवति ? केन प्रकाशं न प्राप्नोति ? केन मित्राणि त्यजति ? केन कारणेन मानवः स्वर्गं न प्राप्नोति ?

६. समाधानम् - एतत् जगत् अज्ञानेनावृतं भवति । अन्धकारेण न प्रकाशते । लोभगुणेन मानवः मित्राणि त्यजति । साङ्गत्यात् मानवः स्वर्गं न प्राप्नोति ।

७. प्रश्नः - अहङ्कारो नाम कः भवति ? कः दम्भः इत्युच्यते ? दैवमिति किं वदन्ति ? पैशुन्यमिति किं वदन्ति ?

७. समाधानम् - अज्ञानाधिक्यमेव अहङ्कारो भवति । उन्नतकीर्तिकाम्यापेक्षया क्रियमाणं कर्म दम्भः। दानस्य फलमेव दैवमित्युच्यते । परदूषणमेव पैशुन्यं वदन्ति ।

## कविपरिचयः

धर्मप्रबोधनविषये भारतीयानां भगवान् वेदव्यासः दिव्यो गुरुः इत्युच्यते । अनेन वेदव्यासेन वेदः चतुर्धा विभक्तः। अतः सः वेदव्यासः इति विख्यातः। अपि च सः अष्टादशपुराणानि, उपपुराणानि, ब्रह्मसूत्राणि एवं लोकप्रसिद्धं महाभारतं च विरचितवान् ।

अस्मिन्नेव महाभारते अरण्यपर्वणि त्रिशतत्रयोदशाध्याये (३१३) अयं यक्षप्रश्नघट्टः अस्ति । अयं पाठ्यांशः मानवसम्बन्धिनः अनेकान् ज्ञातव्यान् नित्योपयोगिविषयान् बोधयति ।



SCERT TELANGANA

# एतानि कुर्वन्तु

## I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) यक्षप्रश्नान् ,धर्मराजसमाधानानि श्रुतवन्तः खलु । एवमेव भवत्सु एकः यक्षः इव प्रश्नान् पृच्छतु । अन्यः धर्मराजः इव समाधानानि वदतु ।

आ) मानवः कथं बुद्धिमान् भवेत् ?

इ) वायोः अपेक्षया 'अधिकवेगवत् मनः' इति कथं वक्तुं शक्नोति ?

ई) 'कोपस्य त्यागेन दुःखस्य अभावः' इत्यस्य भावः कः?

उ) ''भूमिः इति एकं महत् क्षेत्रम् ? किमर्थम् ?

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठे प्रश्नार्थकपदानाम् अधः रेखाङ्कनं कुर्वन्तु, लिखन्तु ।

आ) अधः दत्तानि वाक्यानि पठन्तु । तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु ।

1. మానవునికి పుత్రుడు ఆత్మవంటివాడు.
2. లోకము అజ్ఞానము చేత ఆవరించి యున్నది.
3. దానఫలమే దైవముగా చెప్పబడుచున్నది.
4. క్రోధము వదిలిపెడితే దుఃఖముండదు.
5. ఇతరులను దూషించుటయే పైశున్యము.

इ) श्लोकं पठित्वा अधः निर्दिष्टानि रिक्तस्थानानि पूरयन्तु ।

**नरस्याभरणं रूपं रूपस्याभरणं गुणः।**
**गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥**

१. मानवस्य भूषणं.................,

२. रूपस्य भूषणं ............,

३. ............. आभरणं ज्ञानम् ।

४. ज्ञानस्याभरणं..............

SCERT TELANGANA

**ई. पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. अस्य पाठस्य कविः कः?

२. पाठ्यभागः कस्मात् गृहीतः?

३. किं त्यक्त्वा सुखी भवेत् ?

४. लोकः केन आवृतः?

५. हिमस्य भैषज्यं किम् ?

६. मानवः केन श्रोत्रियः भवति ?

## III. स्वीयरचना

**अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. पर्जन्यः जीवनाधारः इति कथं वक्तुं शक्यते ?

२. लोभगुणेन हानयः काः?

३. उत्तमगुणान् अधमगुणाँश्च पट्टिकायां लिखन्तु ।

उदा -

| उत्तमगुणाः | अधमगुणाः |
|---|---|
| विनयः | अहङ्कारः |
| | |

४. भूमेः अपेक्षया माता गुरुतरा । पिता आकाशात् अपि उन्नतः इत्यस्य विश्लेषणं कुर्वन्तु ?

५. वृद्धसेवया बुद्धिमान् भवति इति धर्मराजवचनम् । इतोऽपि बुद्धिमतां लक्षणानि कानि लिखन्तु ।

## IV. पदजालाभिवृद्धिः

**अ) उदाहरणानुसारम् अधः दत्तानि क्रियापदानि उपयुज्य त्रिषु कालेषु वाक्यानि लिखन्तु ।**

| | | | | |
|---|---|---|---|---|
| उदा - (पठ्) | - | बालः पाठं <u>पठति</u> । | बालः पाठं <u>पठिष्यति</u> । | बालः पाठम् <u>अपठत्</u> । |
| (गम्) | - | बालिका विद्यालयं ......... | ........................ | ........................ |
| (क्रीड्) | - | तरुणः कन्दुकेन ......... | ........................ | ........................ |
| (लिख्) | - | चिन्मयी चित्रं ......... | ........................ | ........................ |
| (पा) | - | गोपिका दुग्धं ......... | ........................ | ........................ |



SCERT TELANGANA

### आ) अधः निर्दिष्टपदानि उपयुज्य वाक्यानि लिखन्तु ।

अ. दत्वा     आ. केन     इ. एकः

ई. चिन्ता     उ. प्रकाशते     ऊ. तमसा

### इ) अधः दत्तानि पदानि उपयुज्य प्रश्नार्थकवाक्यानि उदाहरणानुसारं लिखन्तु ।

(कैः सह, कस्मै, के, कस्याः)

**उदा - धर्मराजस्य अनुजः भीमसेनः।**

**प्र. भीमसेनः कस्य अनुजः?**

१. कुन्तीदेव्याः पुत्रः धर्मराजः।

२. पाण्डवाः वनवासं कर्तुम् अगच्छन् ।

३. सञ्जयः धृतराष्ट्राय उपदेशं दत्तवान् ।

४. उपाध्यायः छात्रैः सह सम्भाषणं करोति ।

## V. सर्जनात्मकता

### १. एकैकं श्लोकं पठित्वा सम्भाषणरूपेण परिवर्तयन्तु ।

### २. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

కాశీనగరంలో ఒక పండితుడు నివసిస్తున్నాడు. పండితుడి దగ్గరకు ఒక శిష్యుడు వచ్చి "ఆచార్య ! నేను విద్యాభ్యాసం కొరకు వచ్చాను" అన్నాడు. పండితుడు శిష్యుణ్ణి పరీక్షించడానికి "కుమారా ! దేవుడు ఎక్కడ ఉన్నాడు" అని అడిగాడు. శిష్యుడు "గురువుగారూ! దేవుడు సర్వవ్యాపి కదా" అని సమాధానమిచ్చాడు. సంతుష్టుడైన గురువు గారు "నీవు బుద్ధిమంతుడవు నాయనా ! అందువల్ల విద్యాభ్యాసం కొరకై నా దగ్గరే ఉండు" అన్నాడు.

## VI. प्रशंसा

### भवतः कक्ष्यायां क्लिष्टप्रश्नानां समाधानं यः ददाति तं भवान् कथमभिनन्दति ?

## VII. भाषांशाः

### अ) अधः दत्तानां पद्यपादानां गुरुलघुचिह्नानि, गणविभजनं, तेषां गणानां नामान्यपि अवगच्छन्तु ।

| | | |
|---|---|---|
| U U | I I I U | U U |
| मा ता | गुरु त रा | भू मेः |
| I U | U I I U I | U |
| पिता | चोच्चतरश्च | खात् । |
| I U | U I I U | U U |
| मनः | शीघ्रतरं | वायोः |
| U U | I I I U | I U |
| चि न्ता | ब हु त री | तृ णात् । |

★ उपरि विद्यमानश्लोके चतुर्षु पादेषु अपि पञ्चमाक्षरं लघु भवति ।

★ द्वितीय पादे, चतुर्थपादे सप्तमाक्षरं लघु भवति ।

★ प्रथमे तृतीये च पादे सप्तमाक्षरं गुरु भवति ।

★ षष्ठाक्षरं सर्वेषु पादेषु गुरु भवति ।

★ प्रतिपादम् अष्टौ अक्षराणि भवन्ति ।

★ चत्वारः पादाः भवन्ति ।

★ एतानि लक्षणानि यस्य वर्तन्ते तस्य **'अनुष्टुप्'** इति नाम ।

**अनुष्टुभः लक्षणम् -**

**पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।**
**गुरुषट्कं च सर्वेषाम् अनुष्टुभिति गीयते ॥**

**आ) अधः दत्तस्य श्लोकस्य गुरुलघुविभागं कृत्वा अनुष्टुभः लक्षणानि प्रदर्शयन्तु।**

**कर्पूरक्षारयोः रूपं तुल्यं भिन्नस्तु तद्रसः।**
**पुण्यपापनरेष्वेवं श्रूयतां वेम विश्वद ॥**

**इ) एवमन्यं श्लोकम् अन्विष्य गुरुलघुविभागं कृत्वा अनुष्टुभः लक्षणानि प्रदर्शयन्तु ।**

## परियोजनाकार्यम्

विद्यालये अस्माभिः कथं वर्तितव्यम् इति विषयम् अधिकृत्य प्रश्नोत्तररूपेण एकं भित्तिपत्रं रचयित्वा विद्यालये स्थापयन्तु ।

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. पाठस्थश्लोकान् धारालतया पठितुं शक्नोमि । | | |
| २. संस्कृतभाषया प्रश्नान् प्रष्टुं शक्नोमि । | | |
| ३. यक्षप्रश्नानां भावं संस्कृतेन वक्तुं शक्नोमि । | | |
| ४. पाठस्थश्लोकान् सम्भाषणरूपेण परिवर्तयितुं शक्नोमि । | | |

**सुखं हि दुःखान्यनुभूय शोभते ।**

SCERT TELANGANA

द्वितीयः भागः

# ६. सिंहदिलीपयोः संवादः

## पठन्तु, विचिन्त्य वदन्तु

एकदा सप्तवर्षीयः एकः बालकः मार्गे गच्छति स्म । तस्मिन् एव समये एकः धूर्तः पवित्रां गोमातरं प्रग्रहेण बद्ध्वा, तां भृशं ताडयन् बलात् आकृष्य गच्छति स्म । तदा एषः बालकः तत् दृष्ट्वा तां गोः व्यथाम् असहमानः खड्गेन गोहिंसकं भाययित्वा गोमातरं रक्षितवान् । स एव बालशिवाजी ।

**प्रश्नाः**

१. गोः वैशिष्ट्यं किम् ?

२. शिवाजी गां कथं रक्षितवान् ?

३. अनेन अनुच्छेदेन किं ज्ञायते ?

**उद्देश्यम्**

★काव्यरसानुभूतिसम्पादनम् ।

★ स्वकर्तव्यपालनबुद्धेः विकासः ।

## पृष्ठभूमिः

सूर्यवंशे दिलीपः इति नाम राजा आसीत् । तस्य भार्या सुदक्षिणा । तयोः बहुकाले गतेऽपि सन्ततिः नासीत् । अनेन दुःखितौ तौ स्वकुलगुरोः वसिष्ठस्य आश्रमं गतौ ।

वसिष्ठः सुदक्षिणादिलीपदम्पत्योः कृते आशिषं दत्वा, सन्ततिप्रतिबन्धकं कारणं योगबलेन ज्ञात्वा एवमादिष्टवान् । "हे राजन् ! कामधेनोः पुत्री नन्दिनी मम आश्रमे प्रतिवसति । तस्याः सपर्यां कुरु, सपर्यया प्रसन्ना सा ते मनोरथं पूरयिष्यति" इति ।

राजा दिलीपः गुरूपदेशविधिना नन्दिनीं छायेव सिषेवे । एकस्मिन् दिने व्रतधारिणः राज्ञः भक्तिभावं ज्ञातुं सा नन्दिनी हिमालयगुहां प्राविशत् । तत्र दिलीपः पर्वतसौन्दर्येण परवशः अभवत् । अत्रान्तरे नन्दिनीधेनोः आक्रन्दनं श्रुतवान् । तदा तत्र एकः सिंहः नन्दिनीधेनुं हन्तुमिच्छति स्म । तं दृष्ट्वा बाणप्रयोगेण सिंहं हन्तुं प्रयतितवान् दिलीपः। किन्तु तस्य दिव्यसिंहस्य प्रभावेण राजा निष्क्रियः चित्रार्पितस्तम्भ इव अवतस्थे। तदा सिंहदिलीपयोः मध्ये सम्भाषणं प्रवृत्तम् । स एवांशः एतत्पाठ्यांशः वर्तते ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु। अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



★ अलं महीपाल ! तव श्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः
शिलोच्चये मूर्छति मारुतस्य ॥ १ ॥

★ कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥ २ ॥

★ कण्डूयमानेन कटं कदाचित्
वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः ॥ ३ ॥

★ तदाप्रभृत्येव वनद्विपानां
त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय
सिंहत्वमङ्कागतसत्त्ववृत्तिः ॥ ४ ॥

★ स त्वं निवर्तस्व विहाय लज्जां
गुरोर्भवान् दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं
न तद्यशः शस्त्रभृतां क्षिणोति ॥
॥ ५ ॥

तदा दिलीपः धेनोः रक्षणाय आत्मानम् एव अर्पयितुं सिद्धोऽभवत् । हे सिंह! कृपया मम शरीरं स्वीकरोतु, धेनुं विसर्जयतु इति तदा सिंहः उच्चैर्विहस्य एवमवदत् ।



★ एकातपत्रं जगतः प्रभुत्वं
नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोः बहु हातुमिच्छन्
विचारमूढः प्रतिभासि मे त्वम् ॥ ६ ॥

★ तद्रक्ष कल्याणपरम्पराणां
भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नं
ऋद्धं हि राज्यं पदमैन्द्रमाहुः ॥ ७ ॥



तदा दयालुः राजा दिलीपः सकातरं निरीक्षन्तीं धेनुं दृष्ट्वा सिंहं प्रति उवाच ।

★ क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्वा ॥ ८ ॥

★ सेयं स्वदेहार्पणनिष्क्रयेण
युक्ता मया मोचयितुं भवत्तः?
न पारणा स्याद्विहता तवैवं
भवेदलुप्तश्च मुनेः क्रियार्थः ॥ ९ ॥

SCERT TELANGANA

दिलीपस्य निश्चयः न परिवर्तयितुं शक्यत इति तस्य शरीरम् आहाररूपेण ग्रहीतुं सिंहः उद्युक्तः । तदा राजा तस्य पुरः जान्वोरुपरि स्थित्वा स्पन्दितबाहुः सिंहाय देहार्पणाय उद्युक्तः अभवत् ।







तस्मिन् क्षणे पालयितुः प्रजानां
उत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः
पपात विद्याधरहस्तमुक्ता ॥ १० ॥



एवं दिलीपस्य भक्त्या प्रसन्ना नन्दिनीधेनुः मम दुग्धप्राशनेन वाञ्छित - पुत्रोत्पत्तिः ते भविष्यतीति वरमदात् । एवं गोसेवाप्रभावेण सुदक्षिणादिलीपयोः पुत्रः सञ्जातः ।

SCERT TELANGANA

**भावाः -**

१. हे राजन् ! त्वया प्रयुक्तमपि अस्त्रं मयि वृथा भविष्यति । यथा वृक्षोत्पाटनसमर्थोऽपि वायोः वेगः पर्वतोत्पाटने विफलो भवति तथैव । अतः तव श्रमेण अलम् ।

२. प्रत्यहं वृषभम् आरोढुम् इच्छोः शिवस्य चरणन्यासेन पूतं पृष्ठभागं शिवभक्तेन निकुम्भेन समं मित्र मां कुम्भोदराख्यं विद्धि ।

३. कश्चित् वन्यगजः एकदा अस्य देवदारुवृक्षस्य समीपमागत्य स्वगात्रस्य कण्डूतिनिवारणार्थं घर्षणम् अकरोत् । तेन देवदारोः चर्म पीडितमभवत् । तत् दृष्ट्वा पार्वती राक्षसास्त्रैः क्षतं स्कन्दं दृष्ट्वा यथा शुशोच तथा दुःखमवाप ।

४. देवदारुवृक्षवल्कलोत्पाटनकालादारभ्य एव तद्रक्षणार्थं शिवः वनगजान् भाययितुम् अस्यां गुहायां मां नियोजयामास। यः कश्चन जन्तुः अस्य समीपम् आगच्छति चेत् स एव मम आहारः भविता । अयमेवात्र मम व्यापारः अस्ति ।

५. हे राजन् ! बाहुप्रतिष्ठम्भेन मम मारणे असमर्थः त्वं लज्जां विहाय स्वाश्रमं गच्छ । यतः यत् पालनीयं वस्तु शस्त्रेण रक्षितुं न पारयति तद्वस्तु नष्टम् अपि शस्त्रभृतां यशः न नाशयति । अतः तव परावर्तने न कोऽपि दोषः।

६. हे राजन् ! एकस्याः धेनोः रक्षणार्थं चक्रवर्तित्वं नवयौवनसुखं देवतुल्यम् इदं शरीरञ्च त्यक्तुम् इच्छसि तन्मे त्वं सर्वथा विवेकरहितः प्रतिभासि ।

७. हे राजन् ! त्वमुत्तरोत्तरं शुभानां सुखानां च भोक्तारं स्वदेहं पालय, यतो हि केवलभूतलस्पर्शमात्रभेदसहितं समृद्धम् इदं तव राज्यमेव इन्द्रराज्यं भावयन्ति विद्वांसः।

८. आपन्नं घातात् यः रक्षति स एव क्षत्रियः इति रूढिरस्ति । अतः स्वधर्माचरणरहितस्य क्षत्रियस्य राज्यं जीवनञ्च व्यर्थमेव ।

९. सेयं नन्दिनी मया स्वशरीरप्रदाननियमेन त्वत्तः मोचयितुं युक्ता, एवं सति बुभुक्षितस्य तव पारणा अपि सिद्ध्यति । मम गुरोः वसिष्ठस्य होमादिविधिः रक्षितो भवेत् ।

१०. तदनन्तरं सिंहस्य आक्रमणं तर्कयति कृतप्रतिज्ञे राज्ञि दिलीपे विद्याधराणां हस्तैः मुक्ता पुष्पवृष्टिः अपतत् ।

## कविपरिचयः

कविकुलगुरुः कालिदासः संस्कृतसाहित्ये अतिविशिष्टं स्थानमलङ्करोति । अस्य उपमालङ्कारप्रयोगकौशलम् आसक्तिं च जानन्तः साहित्यकाः 'उपमा कालिदासस्य' इति तं प्रशंसन्ति ।

अयं महाकविः रघुवंशकुमारसम्भवाख्ये द्वे महाकाव्ये, ऋतुसंहारमेघसन्देशाख्ये द्वे खण्डकाव्ये, मालविकाग्निमित्र-अभिज्ञानशाकुन्तल-विक्रमोर्वशीयाख्यानि त्रीणि नाटकानि विरचितावान् ।

(प्रस्तुतपाठ्यांशः कालिदासविरचितरघुवंशमहाकाव्ये द्वितीयसर्गात् स्वीकृतः ।)

SCERT TELANGANA

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) दिलीपः कीदृशः?

आ) सिंहः दिलीपं किमर्थम् अवरुद्धवान् ?

इ) कविकुलगुरुः कालिदासमुद्दिश्य वदन्तु ।

ई) कथामेनां स्वमातृभाषया वदन्तु ।

उ) श्लोकान् स्पष्टतया गायन्तु ।

### II. पठन्तु,अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) श्लोकेषु विद्यमानक्रियापदानि चित्वा लिखन्तु ।

आ) अधः दत्तश्लोकपादं पठन्तु । कः कम् उक्तवान् इति सूचयन्तु ।

१. प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।

२. वन्यद्विपेनोन्मथिता त्वगस्य ।

३. महीतलस्पर्शनमात्रभिन्नम् ।

४. क्षत्रस्य शब्दो भुवनेषु रूढः ।

५. व्यापारितः शूलभृता विधाय ।

इ) अधः दत्तानां वाक्यानां ससन्दर्भं भावं लिखन्तु ।

१. अल्पस्य हेतोर्बहुहातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ।

२. क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।

ई) अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

**मातेव रक्षति पितेव हिते नियुङ्क्ते**
**कान्तेव चाभिरमयत्यपनीय खेदम् ।**
**लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिम्**
**किं किं न साधयति कल्पलतेव विद्या ।**

१. पिता इव का कुत्र नियुङ्क्ते ?

२. विद्या का इव खेदम् अपनयति ?

३. दिक्षु कां वितनोति ?



SCERT TELANGANA

४. विद्या कीदृशी ?

५. अस्य श्लोकस्य शीर्षिकां लिखन्तु ।

**उ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. शिवः कम् आरोढुमिच्छति ?

२. शस्त्रभृतां किं न नाशयति ?

३. कस्य अर्पणेन राजा सिंहात् गां मोचयितुम् इच्छति ?

४. पुष्पवृष्टिः कथम् अपतत् ?

५. सिंहः दिलीपं प्रलोभयितुं किं किमुक्तवान् ?

## III. स्वीयरचना

**अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. सिंहः कीदृशः ?

२. क्षत्रियः कथं भवितुमर्हति ?

३. "न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्छति मारुतस्य" इति कवेः वर्णनेन किं ज्ञातवन्तः? स्वीयवाक्यैः लिखन्तु ।

४. दिलीपस्य गोसेवां ज्ञातवन्तः खलु ! एवं जनाः कान् कान् पूजयन्ति? कथं पूजयन्ति ? लिखन्तु ।

**आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. दिलीपस्य सेवाधर्मम् अधिकृत्य स्वीयवाक्यैः लिखन्तु ।

२. कथामेनां स्वीयवाक्यैः लिखन्तु ।

## IV. पदजालाभिवृद्धिः

**अ) अधः दत्तपदानां पर्यायशब्दैः नूतनवाक्यानि रचयन्तु ।**

१. भूपालः

२. पञ्चास्यः

३. धेनुः

४. गिरिः

५. ऋषिः

**उदा** - भूपालः - अयोध्यायां दशरथो नाम महीपालः आसीत् ।

SCERT TELANGANA

आ) अधः दत्तानाम् उदाहरणानाम् आधारेण नूतनवाक्यानि रचयन्तु ।

१. यः द्वारे अस्ति सः मम अग्रजः ।

२. या दीर्घवेणी सा मम सखी गीता ।

३. यत् पत्रं प्राप्तं तत् मम पितुः पत्रम् ।

## V. सर्जनात्मकता

अ) सिंहदिलीपयोः संवादकथां नाटकरूपेण प्रदर्शयन्तु ।

आ) अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

భారతీయులకు ఆవు పవిత్రమైనది మరియు పరమపూజనీయమైనది. గోమయము, గోమూత్రము, గోక్షీరము, గోదధి, గోఘృతము వీటిని పంచగవ్యములు అని అంటారు. వీటిని మన భారతీయులు పరమపవిత్రముగా పూజాదులయందు ఉపయోగిస్తారు. మరియు ఈ పంచగవ్యమును ఔషధనిర్మాణములో తగురీతిగా ఉపయోగిస్తారు.

## VI. प्रशंसा

१. धेनोः महिमानं पवित्रतां च वर्णयन्तु ।

२. गुरोः आज्ञापालने दिलीपस्य कर्तव्यनिष्ठां विशदयन्तु ।

## VII. भाषांशाः

अ) अधः दत्तानि वाक्यानि पठन्तु, अवगच्छन्तु ।

**१. रामरावणयोः युद्धं रामरावणयोरिव ।**

**२. इन्दुरिन्दुरिव ।**

- अत्र वाक्यद्वये कयोः मध्ये तुलना अस्ति इति अवलोकयन्तु ।
- प्रथमवाक्ये रामरावणयोः युद्धस्य रामरावणयोः युद्धेन सह तुलना क्रियते ।
- द्वितीयवाक्ये इन्दोः इन्दुना सह तुलना क्रियते ।

★ **यत्र एकस्यैव उपमानोपमेयत्वं प्रतिभाति, तत्र अनन्वयालङ्कारः भवति ।**

आ) अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।

**गगनं गगनाकारं सागरः सागरोपमः ।**

## परियोजनाकार्यम्

**पञ्चमहाकाव्यान्यधिकृत्य अधो लिखितानुसारं पट्टिकां संरच्य कक्ष्यायां प्रदर्शयन्तु ।**

| कविः | कालः | काव्यम् | इतिवृत्तम् |
|---|---|---|---|
| | | | |

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. सिंहदिलीपयोः कथां वक्तुं शक्नोमि । | ☐ | ☐ |
| २. कठिनपदानि वाक्येषु प्रयोक्तुं शक्नोमि । | ☐ | ☐ |
| ३. कथां स्वीयवाक्यैः लेखितुं शक्नोमि । | ☐ | ☐ |
| ४. सिंहदिलीपयोः संवादं नाटकरूपेण प्रदर्शयितुं शक्नोमि । | ☐ | ☐ |

**न शीलतुल्यं शुभमन्यदस्ति ।**

SCERT TELANGANA

पठन्तु - नन्दन्तु

# चित्रकारस्य बुद्धिविशेषता

द्वितीयः भागः

कोरियादेशे एकस्मिन् नगरे एकः चित्रकारः आसीत् । सः अत्यद्भुततया चित्राणि रचयतीति परितः प्रान्तेष्वपि कीर्तिं सम्पादितवान् । तस्मिन्नेव नगरे एकः लुब्धः वणिक् श्रेष्ठः आसीत् । सः चित्रकारस्य कलानैपुण्यं श्रुत्वा, तस्य गृहं गत्वा, स्वीयचित्रं लिखतु इति तं पृष्टवान् । सः चित्रकारः 'सहस्रं पौण्ड्स्' धनं ददाति चेत् तव चित्रं लेखिष्यामि इत्युक्तवान् । तथैव इति धनिकः वणिक् अङ्गीकृतवान् ।

कतिपयदिनानन्तरं चित्रकारः चित्रं पूरयित्वा वणिजः सम्मुखे प्रदर्शितवान् । स्वप्रतिरूपमिव स्थितं चित्रं दृष्ट्वा यदा आनन्दमनुभवति तदा तत्कृते सहस्रं पौण्ड्स् धनं देयमिति विषयः स्मृतिपथे आगच्छत् । यथा कथञ्चित् तद्धनं न ददामि इति मनसि निश्चित्य ''इदं चित्रं न मम । मम मुखसाम्यमेव नास्ति । अतः एतत् चित्रम् मम कृते मास्तु'' इत्युक्तवान् ।




चित्रकारः तस्य लुब्धत्वं ज्ञात्वा केनापि उपायेन तस्य वक्रबुद्धिं सरलीकरिष्यामि इति मत्वा एतत् चित्रं भवतः नास्ति खलु ! इति पृष्टवान् । तदा वणिक् चित्रकारः मम वाक्यम् सत्यमिति भावयति । सः एतत् चित्रं नीत्वा किं करिष्यति? मह्यमेव दास्यतीति चिन्तयित्वा भवतु नाम । ''चित्रकार! मदर्थं लिखितं मह्यमेव ददातु । द्विशतं पौण्ड्स् दास्यामि'' इति कपटम् उदारत्वं प्रकटितवान् ।

तदा चित्रकारः ''एवं मास्तु । एतत् चित्रम् न मम इति लिखित्वा ददातु तदेव अलम्'' इति उक्त्वा लिखितपूर्वकाभिप्रायं स्वीकृतवान् ।

अन्यस्मिन् दिने तस्य गृहसमीपे चतुष्पथे जनाः मिलित्वा कोलाहलं कुर्वन्तः हसितवन्तः । वणिक् तत् किमिति समीपं गत्वा पश्यति चेत् स्वीयचित्रमेव । चित्रस्य अधः एषः महान् मूर्खः इति लिखितमस्ति। सः महाक्रोधेन चित्रकारस्य समीपं गत्वा एतद्विषयं पृष्टवान् ।

तदा चित्रकारः एतत् तु कश्चित् मूर्खस्य चित्रम् । भवतः चित्रम् कथं भवति?'' ''एतत् चित्रं न मम'' इति लिखित्वा दत्तवान् खलु इत्युक्तवान् । सः वणिक्'' सहस्रं पौण्ड्स् दास्यामि । एतत् चित्रं मह्यमेव ददातु'' इत्यवदत् । तदा चित्रकारः ''विहस्य इदानीं दशसहस्रपौण्ड्स् यः ददाति तस्य कृते एव चित्रं दास्यामि'' इत्युक्तवान् । तदा वणिक् स्वलोभगुणेन अधिकं मूल्यं दातव्यम् आपतितम् इति चिन्तयन् धनं दत्वा तत् चित्रं स्वीकृतवान् ।

SCERT TELANGANA

तृतीयः भागः

# ७. तस्मै श्रीगुरवे नमः

## पठन्तु, विचिन्त्य वदन्तु

लास्या - हे लते अद्य सायम् आपणं गमिष्यावः किम् ?
लता - किमर्थम् आपणगमनम् ? को विशेषः ?
लास्या - पुष्पाणि, फलानि, पूजाद्रव्याणि आनेतव्यानि खलु !
लता - तानि आनीय किं करोति सखि !
लास्या - न जानाति किं ? विद्यालये श्वः विशेषपूजा भविष्यति ।
लता - का पूजा ? अहं न स्मरामि ।
लास्या - आदौ वदतु - मातृदेवो भव, पितृदेवो भव इति तदनन्तरं किमस्ति ?
लता - आचार्यदेवो भव । अस्य वाक्यस्य पूजायाः मध्ये कः सम्बन्धः ?
लास्या - तत्रैव अस्ति विशेषः । श्वः व्यासपूर्णिमा । स्मरति इदानीम् ।
लता - अस्तु । तर्हि किम् ।
लास्या - व्यासपूर्णिमाम् एव गुरुपूर्णिमारूपेण आचरामः ।
लता - एवं तर्हि श्वः गुरुपूजा भविष्यति ।

(द्वे बालिके गुरुमहत्वप्रतिपादकान् श्लोकान् पठतः)

## प्रश्नाः

१. लास्या किमर्थं लताम् आपणं नेतुम् इच्छति ?
२. लता कदा गुरुपूजोत्सवः अस्तीति ज्ञातवती ?
३. लतालास्ययोः सम्भाषणेन भवन्तः किम् अवगतवन्तः?
४. लतालास्ये कान् पठतः ?

### उद्देश्यम्

* गुरोः महत्वज्ञापनम् ।
* गुरौ श्रद्धाभक्त्योः विकासः ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



सौम्यस्सत्त्वगुणोपेतः सदाचारप्रवर्तकः ।
शास्त्रज्ञः कृतकृत्यो यः तस्मै श्रीगुरवे नमः ॥ १ ॥
प्राज्ञश्च देशकालज्ञः भक्तिमान् देशदेवयोः ।
शिष्यवात्सल्यपूर्णो यः तस्मै श्रीगुरवे नमः ॥ २ ॥
सुस्वरश्शुभवाग्बुद्धिः सदा सत्कृतिमानितः ।
नानासद्ग्रन्थवेत्ता यः तस्मै श्रीगुरवे नमः ॥ ३ ॥
नाना नीतिकथाभिज्ञः निपुणः पद्यबोधने ।
कथाकथनविज्ञो यः तस्मै श्रीगुरवे नमः ॥ ४ ॥



कर्मणा मनसा वाचा शिष्यश्रेयोऽभिवर्धकः ।
सुवेषश्च सुभाषो यः तस्मै श्रीगुरवे नमः ॥ ५ ॥
भाषणे लेखने पाठे क्रीडने गाननाट्ययोः ।
निपुणान् कुर्वते शिष्यान् तस्मै श्रीगुरवे नमः ॥ ६ ॥
हास्यप्रियो हास्यवक्ता समयोचितभाषणः ।
आनन्दनस्सदानन्दः तस्मै श्रीगुरवे नमः ॥ ७ ॥



सप्रयोगं सुपाठ्यांशं शास्त्रीयं ज्ञानदायकम् ।
प्रबोधयति शिष्यान् यः तस्मै श्रीगुरवे नमः ॥ ८ ॥
प्राङ्गणे पाठशालायाः श्यामलं बालपादपैः ।
उद्यानं पोष्यते येन तस्मै श्रीगुरवे नमः ॥ ९ ॥
ताडनैः पीडनैश्शिक्षां न करोति कदाचन ।
सद्बोधपद्धतिर्यस्य तस्मै श्रीगुरवे नमः ॥ १० ॥



शिष्यायां चैव शिष्ये च मध्यमे चोत्तमेऽपि वा ।
निष्पक्षपातः सर्वत्र तस्मै श्रीगुरवे नमः ॥ ११ ॥
**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**
**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ १२ ॥**

SCERT TELANGANA

**भावाः -**

१. सौम्यः, सत्वगुणेन युक्तः, सदाचारस्य प्रवर्तयिता, शास्त्रज्ञः, सत्कार्यनिर्वहणसमर्थः यः गुरुः अस्ति तस्मै नमः।

२. भूतवर्तमानभाविकालविषयान् ऊहितुं समर्थः, देशकालविषयज्ञः, देवभक्तिदेशभक्तियुतः स्वशिष्येषु सम्पूर्णवात्सल्यवान् यः गुरुः तस्मै नमः।

३. मृदुमधुरकण्ठस्वरः, शोभनवाक्, सद्विचारशीलः, सदा सत्कार्यकरणेन पूजनीयः, विविधानाम् उत्तमानां ग्रन्थानां (विषयाणां) वेत्ता यः गुरुः तस्मै नमः।

४. नीतिकथाकथने कुशलः, पद्यानां बोधने समर्थः, कथागद्यपद्यात्मकपाठप्रवचने उत्साही यः गुरुः तस्मै नमः।

५. मनोवाक्कायकर्मभिः शिष्याणां श्रेयसे कृतकटिबद्धः, उत्तमवेषभाषावान् यः गुरुः, तस्मै नमः।

६. यः गुरुः स्वशिष्यान् सम्भाषणे, लेखने, क्रीडासु, गाने, अभिनये च समर्थान् कारयति तस्मै नमः।

७. समयसन्दर्भौ अनुसृत्य सम्भाषणशीलः शिष्याणां मानसिकोल्लासकारकः विद्याविज्ञानाभ्यां स्वयं तुष्टः यः गुरुः तस्मै नमः।

८. शिक्षणपद्धतिमनुसृत्य प्रायोगिककार्येषु छात्रान् प्रेरयित्वा शास्त्रीयविज्ञानं यः ददाति तस्मै गुरवे नमः।

९. उद्यानमाली यथा प्राङ्गणं लतापुष्पादीनां पादपानां वर्धनेन सुन्दरं करोति तथा बालान् संरक्षन् विद्यालयप्राङ्गणं रम्यं सम्पादयति यः गुरुः तस्मै गुरवे नमः।

१०. कटुवचनैः ताडनैः वा छात्राणां पीडनम् अकृत्वा उत्तमपद्धतिभिः यः पाठान् बोधयति तस्मै गुरवे नमः।

११. सर्वेषु समानरूपेण व्यवहरति यः गुरुः तस्मै गुरवे नमः।

१२. अज्ञानमेव तमः। तेन विज्ञानं प्रकाशं द्रष्टुं यः अयोग्यो भवति, तस्य शिष्यस्य चक्षुषः ज्ञानाञ्जनशलाकया उन्मीलनं यः करोति तस्मै श्रीगुरवे नमः।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

**अ) पाठस्य श्लोकाः कं विषयं बोधयन्ति?**

**आ) एकः छात्रः श्लोकम्, अपरः भावं च वदतु ।**

**इ) गुरुः कीदृशः स्यात्?**

**ई) गुरोः आवश्यकता का?**

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

**अ) श्लोकेषु विद्यमानानां विसर्गान्तपदानाम् अधः रेखाङ्कनं कुर्वन्तु, लिखन्तु ।**

**आ) अधः दत्तानि भावयुक्तवाक्यानि पाठात् चित्वा लिखन्तु ।**

१. यः शास्त्रं जानाति, यः उत्तमकार्याणि कृतवान् तस्मै श्रीगुरवे नमः।

२. यः विविधाः नीतिकथाः जानाति यः पद्यपठने निपुणः, तस्मै श्रीगुरवे नमः।

३. यः उत्तमवेषं धरति, यस्य भाषा उत्तमा तस्मै श्रीगुरवे नमः।



SCERT TELANGANA

**इ) अधः दत्तं परिच्छेदं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

प्रातःकालः अतिसुखकरः भवति । तदा खगाः मधुरं कूजन्ति । उद्यानेषु पुष्पाणि विकसन्ति । पवनः सुगन्धः, शुद्धः च भवति । एकस्मिन् समये जनाः भ्रमणाय, व्यायामाय वा गच्छन्ति । यदा सूर्यः उदेति तदा प्रकृतेः शोभा दर्शनीया भवति । प्रातः सर्वे जनाः स्वस्वकार्यमुल्लासेन कुर्वन्ति । छात्राः प्रसन्नमुखाः विद्यालयं पठनार्थं गच्छन्ति । सर्वे स्वजीवनम् अभिनवम् इव अनुभवन्ति ।

१. प्रातःकालः कीदृशः भवति ?
२. के मधुरं कूजन्ति ?
३. पवनः कथम् अस्ति ?
४. जनाः किमर्थं गच्छन्ति ?
५. सर्वे किम् अनुभवन्ति ?
६. छात्राः कुत्र गच्छन्ति ?

**ई) पाठ्यांशं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. 'सुस्वरश्शुभवाग्बुद्धिः' इत्यस्य श्लोकस्य भावं लिखन्तु ।
२. श्लोकेषु वर्णितान् गुरोः गुणगणान् लिखन्तु ।
३. गुरुः शिष्यान् केषु विषयेषु समर्थान् करोति ?

## III. स्वीयरचना

**अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. देशे देशे च भक्तिः कथं प्रदर्शनीया ?
२. गुरुः शिष्यश्रेयोऽभिवर्धकः इत्युक्तम् - कथम् ?
३. गुरुः विद्यालयप्राङ्गणं कथं रम्यं करोति ?
४. आदर्शगुरुः कथं भवेत् - स्वीयवाक्यैः लिखन्तु ।

## IV. पदजालाभिवृद्धिः

**अ) अधः दत्तेषु वाक्येषु स्थितानि रेखाङ्कितपदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।**

१. तस्मै श्रीगुरवे नमः।
२. मम प्रियमित्रम् अत्यन्तं हास्यप्रियः।
३. भक्तिमान् देवं सदा स्तौति ।
४. मानवाः समयोचितभाषणेन गौरवं यान्ति ।
५. सभासु सद्ग्रन्थवेत्ता कदाऽपि न बिभेति ।
६. सदाचारप्रवर्तकः उन्नतव्यक्तित्वं प्राप्नोति ।

**आ) अधः दत्तानि रिक्तस्थानानि पाठ्यांशश्लोकैः पूरयन्तु ।**

१. हास्यप्रियो हास्यवक्ता..........................................
२. ................................शिष्यश्रेयोऽभिवर्धकः ।



SCERT TELANGANA

३. ............................शास्त्रीयं ज्ञानदायकम् ।

४. भाषणे, लेखने, पाठे..................................

५. अज्ञानतिमिरान्धस्य ....................................

### इ) अधः दत्तयोः श्लोकयोः पादान् क्रमेण लिखन्तु ।

१. न करोति कदाचन सद्बोधपद्धतिर्यस्य ।
तस्मै श्रीगुरवे नमः ताडनैः पीडनैश्शिक्षाम् ॥

२. शिष्यश्रेयोऽभिवर्धकः सुवेषश्च सुभाषो यः।
तस्मै श्रीगुरवे नमः कर्मणा मनसा वाचा ॥

### ई) चतुर्थीविभक्तिपदानि उपयुज्य रिक्तस्थानानि पूरयन्तु ।

**अदा -** तस्मै श्रीगुरवे नमः

१. तस्मै श्री............(शम्भु) नमः।

२. तस्यै श्री............(मातृ) नमः।

३. तस्मै श्री............(आचार्य) नमः।

४. तस्मै श्री............(पितृ) नमः।

५. तस्मै श्री............(राम) नमः।

६. तस्यै श्री............(गौरी) नमः।

### उ) अधः दत्तेषु वाक्येषु रेखाङ्कितपदानां पर्यायपदानि लिखन्तु ।

**उदा** -गुरुः शिष्यान् प्रबोधयति ।
शिष्यः, छात्रः, अन्तेवासी

१. तस्मै श्रीगुरवे नमः।

२. उद्याने पादपाः छायां यच्छन्ति ।

३. आर्यभटः सुप्रसिद्धः शास्त्रज्ञः।

४. गुरुः पद्यबोधने निपुणः।

## V. सर्जनात्मकता

### १) 'शिष्यवात्सल्यपूर्णः गुरुः' - इत्यंशमाधारीकृत्य एकां कथां लिखन्तु ।

### २) पाठस्य श्लोकानामाधारेण सम्बद्धानि नीतिवाक्यानि लिखन्तु ।



SCERT TELANGANA

३. अधः दत्तम् अनुच्छेदं संस्कृतेन अनुवदन्तु ।

గురువే బ్రహ్మ. గురువే విష్ణువు. గురువే మహేశ్వరుడు. గురువే సాక్షాత్ పరబ్రహ్మ స్వరూపుడు. అటువంటి త్రిమూర్తి స్వరూపుడైన గురువుకు నమస్కారము.

ఆదియు, అనాదియు గురువే. గురువే పరమదైవము. గురువును మించిన దైవము లేదు. అటువంటి గురువునకు నమస్కారము.

## VI. प्रशंसा

१. भवतः उपाध्यायमधिकृत्य वदन्तु ।

२. भवन्तः स्वगुरून् प्रति श्रद्धां कथं दर्शयन्तीति वदन्तु ।

## VII. भाषांशाः

(अ) अधः दत्तं वाक्यद्वयं पठन्तु । विवरणम् अवगच्छन्तु ।

**१. अस्माकमध्यापकः बुद्धौ बृहस्पतिः ।**

**२. अयं हि धूर्जटिः साक्षात्, येन दग्धा पुरः क्षणात् ।**

★ प्रथमवाक्ये अध्यापकस्य बृहस्पतेश्च अभेदः दर्शितः, द्वितीयवाक्ये राज्ञः शिवस्य च अभेदः दर्शितः।

★ **यत्र उपमानोपमेययोः अभेदः उच्यते तत्र रूपकालङ्कारः भवति ।**

(आ) अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।

★ **अयमास्ते विना शम्भुः तार्तीयीकं विलोचनम् ।**

### परियोजनाकार्यम्

१. गुरोः विषये अन्यान् पञ्चश्लोकान् सङ्गृह्य लिखन्तु । भित्तिपत्रे प्रदर्शयन्तु । **(अथवा)**

२. भारतीयसंस्कृतिमनुसृत्य आदर्शगुरुणां नामानि सङ्गृह्य लिखन्तु । **(अथवा)**

३. एकां गुरुकथां सङ्गृह्य लिखन्तु । भित्तिपत्रे प्रदर्शयन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. गुरोः महत्वं वक्तुं शक्नोमि । | ☐ | ☐ |
| २. पाठ्यांशश्लोकानां सारं लेखितुं शक्नोमि । | ☐ | ☐ |
| ३. गुरुः अज्ञानं निर्मूल्य ज्ञानं कथं प्रयच्छतीति वक्तुं शक्नोमि । | ☐ | ☐ |
| ४. गुरोः महत्वम् आधारीकृत्य एकां कथां लेखितुं वक्तुं च शक्नोमि । | ☐ | ☐ |

**अकृत्यं नैव कर्तव्यं प्राणत्यागेऽपि संस्थिते ।**

SCERT TELANGANA

तृतीयः भागः

# ८. भूमिरियं बलिदानस्य

## पठन्तु, विचिन्त्य वदन्तु

| | | |
|---|---|---|
| अध्यापकः | - | शङ्कर ! अस्माकं भारतदेशे कीदृशाः महापुरुषाः सञ्जाताः ? |
| शङ्करः | - | आचार्य ! आजादचन्द्रशेखरः, महात्मागान्धीसदृशाः बहवः महापुरुषाः जन्म प्राप्तवन्तः। |
| अध्यापकः | - | उत्तमं शङ्कर ! नरसिंह ! भवान् वदतु - कर्मभूमौ अस्माकं देशे कीदृशाः वीराः सञ्जाताः। |
| नरसिंहः | - | आचार्य ! शिवाजी, अल्लूरि सीतारामरायः, झान्सी लक्ष्मीबाई इत्यादयः। |
| अध्यापकः | - | उत्तमम्। लते ! भारतदेशस्य संस्कृतिसम्बद्धं गीतमेकं गायतु |
| लता | - | जय जय जय प्रियभारतजनयित्रि दिव्यधात्रि................। |
| अध्यापकः | - | सम्यक् गीतवती । इदानीम् एतादृशं देशभक्तिगीतं गायामः वा ? |
| छात्राः | - | अवश्यं महोदय ! |

## प्रश्नाः

१. अध्यापकः कं विषयमधिकृत्य प्रश्नान् पृच्छति ?

२. महापुरुषाः इत्युक्ते के ?

३. किमपि देशभक्तिगीतं गायन्तु ।

### उद्देश्यम्

* भारतीयक्षेत्रवैभवस्य ज्ञापनम् ।
* वीरपुरुषाणां त्यागमूर्तीनां च चरितस्य बोधनेन छात्रेषु देशभक्तेः जागरणम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

एत बालकाः दर्शयामि वस्तेजो
हिन्दुस्थानस्य तेजो भारतवर्षस्य ।
अस्य मृत्तिका शिरसा वन्द्या भूमिरियं
बलिदानस्य वन्दे मातरम्, वन्दे मातरम् ॥



उत्तरभागे रक्षणकर्ता नगाधिराजो विख्यातः
दक्षिणदेशे पदक्षालको महासागरः प्रख्यातः।
पश्यत गङ्गायमुनातीरं परं पावनं भूलोके
स्थाने स्थाने यद् दिव्यत्वं नैव सुराणामपि नाके
एकमेव तत् स्थानं चैतत् देवानामवतारस्य ॥

॥अस्य॥



रजपूतानामेतत् स्थानं खड्गे येषाम् अभिमानः
धर्मरक्षणे युद्धे मरणं यैर्मन्यते सम्मानः।
अत्रैवासीत् प्रतापवीरो विश्वेऽस्मिन् यो बहुमान्यः
शीलरक्षणे भस्मीभूताः अत्रासङ्ख्याः पद्मिन्यः
रजः सुपूतं वीरपदाब्जैः स्थानं चैतद्देशस्य ॥

॥अस्य॥

भक्तिमानयं दक्षिणदेशो गोदाकृष्णापरिपुष्टः
गगनस्पर्धित-शिल्पकलान्वित-गोपुर-जालैर्विभूषितः।
अत्र विद्यते सुजनस्थानं सीतापतिपदपरिपूतम्
अत्र शङ्कराचार्याः वन्द्याः केरलभागे सम्भूताः
विजयनगरसाम्राज्यमिहासीत् ख्यातं हिन्दूधर्मस्य ॥

॥अस्य॥

## सारांशः

१. हे बालकाः! आगच्छन्तु । अहमस्माकं भारतदेशस्य हिन्दूस्थानमिति विख्यातस्य दिव्यकान्तिं दर्शयामि । मातृभूमियोगक्षेमार्थं प्राणानपि बलिदानरूपेण त्यक्तवतः वीरनारीजनस्य अद्वितीयस्थानरूपा इयं भारतभूमिः विलसति । अस्याः भारतभूमेः मृत्तिका शिरसा धार्या, आदरणीया च । एतादृशीं भरतमातरं नमस्करोमि ।

२. उत्तरदिशि पर्वतराजः हिमालयः शत्रुदुर्गमतया देशरक्षणं करोति । दक्षिणदिशि कन्याकुमारीप्रान्ते हिन्दूमहासमुद्रः भारतमातुः पादक्षालनं करोतीव विराजते । (भारतमात्रे प्रशान्ततां ददातीत्यर्थः।) गङ्गा - यमुनाख्यमहानद्योः मध्यतीरप्रान्ते भूलोके एव परमपावना भारतभूमिः। किञ्च भारतदेशे प्रतिस्थानमपि दिव्यवैभवशालि वर्तते। एतादृश - दिव्यस्थानं स्वर्गे देवानामपि दुर्लभम्। हरिहरादयः सुराः अपि एतत्प्रेम्णा अत्रैव रामकृष्णज्योतिर्लिङ्गादिरूपेण अवतीर्णाः।



३. इयं भारतभूमिः महापराक्रमशालिनां दुष्टशिक्षणशिष्टरक्षणव्रतानां खड्गाभिमानिनां राजपुत्राणां निरुपमानं स्थानम् । ये च इमे वीराः धर्मरक्षणार्थके युद्धे मरणमपि सम्मानमिव भावयन्ति । तदीयदेशभक्तिः तादृशी । प्रपञ्चगौरवभाग्यभाक् राणाप्रतापसिंहः अत्रैव भारतभूमौ आसीत् । एवं च अत्रत्याः अनेकाः पद्मिनीस्त्रियः स्वीयगौरवरक्षणार्थम् अग्निज्वालासु आत्मदाहं कृतवत्यः भस्मीभूताः अभवन् । एतादृशवीरनरनारीचरणसरोजस्पर्शेन अस्माकम् भारतभूमौ सर्वत्र रजः महापवित्रं वर्तते।

४. भारतभूमेः दक्षिणप्रान्तः गोदावरी-कृष्णवेणीजलसंवर्धितः धनधान्यादिभिः समृद्धश्च विलसति । दक्षिणदेशे तिरुपति-श्रीशैल-मधुरै-श्रीरङ्गादिदेवालयगोपुराणि औन्नत्येन आध्यात्मिकमहत्त्वं प्रकटयन्ति। अन्यच्चायं दक्षिणप्रान्तः श्रीमहाविष्णोरवताररूपेण श्रीसीतारामचन्द्रेण दण्डकारण्यस्थानत्वेन सञ्चारपूतः अस्ति । धर्मप्रवर्तकाः अध्यात्मविद्याबोधकाः जीवब्रह्मैक्यवादिनः आदिशङ्कराचार्याः अत्रैव केरलदेशे कालटी प्रान्ते सञ्जाताः। विद्यारण्यस्थापितं हिन्दूधर्मविराजितं विजयनगरसाम्राज्यमिहैव आसीत् ।

हे बालकाः ! एतादृशं वैभवशालिनीं भारतमातरं वन्दन्ताम् ।

एतस्य भारतवर्षस्य वैभवं पश्यन्तु, नमस्कुर्वन्तु ।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) भवद्भिः अधीतं देशभक्तिगीतमेकं रागयुक्तं गायन्तु ।

आ) हिमालयः भारतस्य रक्षणकर्ता कथं भवतीति वदन्तु ।

इ) अधुनातनकाले जनेषु देशभक्तिः कथमस्तीति चर्चां कुर्वन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठस्थानां षष्ठीविभक्तिपदानाम् अधः रेखाङ्कनं कुर्वन्तु, लिखन्तु ।

आ) अधः दत्तानि वाक्यनि पठन्तु । गीते तदर्थकवाक्यानि अन्विष्य लिखन्तु ।

१. भारतस्य उत्तरभागे हिमालयः भारतस्य रक्षणाय विराजते ।

२. देवानामुद्भवाय भारतमेकमेव स्थानम् ।

३. दक्षिणप्रान्तः पुण्यगोदावरी-कृष्णानदीजलैः पावितः।

४. केरलदेशे उद्भूताः शङ्कराचार्याः अत्र वन्द्याः।

इ) अधः दत्तम् अनुच्छेदं पठित्वा रिक्तस्थानानि पूरयन्तु । प्रश्नानां समाधानानि अपि लिखन्तु ।

अस्माकं देशः प्रतिभासम्पन्नः वर्तते । ज्ञानस्य उदयः सर्वप्रथमम् अस्य देशस्य भूमौ एव अभवत् । चिकित्साशास्त्रे आयुर्वेदस्य चरकसंहिता इति ग्रन्थः प्राचीनतमः इति मन्यते। अस्य चिकित्सापद्धतिः अद्य यावत् सर्वत्र प्रतिष्ठां लभते। सुविख्यातः गणितज्ञः आर्यभटः अनेकवर्षपूर्वं गणनायां शून्यस्य कल्पनाम् अकरोत्। वेदे एव ''पूर्णमदः पूर्णमिदम्'' इति मन्त्रे सा सङ्ख्या अस्तीति सः ज्ञातवान् । प्राचीनकाले पराशरमहर्षिणा वृक्षायुर्वेदे प्रतिपादितं यत् पादपेषु अपि जीवनं वर्तते। तेऽपि सुखदुःखे अनुभवन्ति इति । विज्ञानक्षेत्रे महत्त्वपूर्णा उपलब्धिः इयम् इति पाश्चात्याः अपि स्वीकुर्वन्ति ।

**रिक्तस्थानानि -**

१. अस्माकं देशः ................ ।

२. .................पराशरमहर्षिणा विरचितः ।

३. चिकित्साशास्त्रे .................. अति प्राचीनतमा रचना ।



SCERT TELANGANA

४. ............. शून्यस्य कल्पनां कृतवान् ।

५. .............. सुखदुःखे अनुभवन्ति ।

**प्रश्नाः -**

१. विज्ञानक्षेत्रे महत्त्वपूर्णा उपलब्धिः का ?

२. पराशरेण किं प्रतिपादितम् ?

३. भारतदेशमहत्त्वस्य विषये पञ्चवाक्यानि लिखन्तु ।

### ई) अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. अस्मिन् गीते वर्णितानां नदीनां नामानि लिखन्तु ।

२. शङ्कराचार्यः कीदृशः ? सः कुत्र जन्म प्राप्तवान् ?

३. भारतदेशस्य दक्षिणदिशि विख्यातः कः? कीदृशः ?

४. गीते वर्णितानां वीरपुरुषाणां नामानि लिखन्तु ।

५. हिन्दूधर्मस्य ख्यातं साम्राज्यं किम् ?

## III. स्वीयरचना

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. गीते अनुक्तानां भवतां परिचितानां वीरपुरुषाणां पञ्चानां नामानि लिखन्तु ।

२. गीतमिदं प्रबोधात्मकं भवतीति समर्थयन्तः पञ्चवाक्यानि लिखन्तु ।

३. अस्माकं देशः कथं महान् इति विषयं लिखन्तु ।

४. भारतदेशस्थनदीनां प्राशस्त्यं लिखन्तु ।

५. हिमालयः नगाधिराजः इति प्रसिद्धः । हिमालयस्य वैशिष्ट्यं सङ्क्षेपेण लिखन्तु ।

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. गीतसारांशं स्वीयवाक्यैः लिखन्तु ।

२. देशभक्तिः इति अंशमुद्दिश्य निबन्धमेकं लिखन्तु ।

SCERT TELANGANA

## IV. पदजालाभिवृद्धिः

### अ) अधः दत्तानि वाक्यानि पठित्वा रेखाङ्कितपादानां समानार्थकपदानि लिखन्तु ।

१. नगाधिराजः हिमालयः भारतस्य उत्तरदिशि विराजते ।

२. दक्षिणभारते प्रख्यातः सागरः अस्ति ।

३. भारतदेशे जन्म सुराणामपि दुर्लभम् ।

४. अनेकाः नार्यः देशार्थं प्राणान् त्यक्तवत्यः।

५. दिवा सूर्यः प्रकाशते ।

### आ) गीतं पठित्वा यथोचितं योजयन्तु ।

| | |
|---|---|
| १. हिमालयः | नाकः |
| २. महासागरः | शीलरक्षणे |
| ३. सुराणां निवासः | बहुमान्यः |
| ४. भस्मीभूताः | पदक्षालकः |
| ५. प्रतापवीरः | नगाधिराजः |

### इ) अधः दत्तानि पदानि उपयुज्य वाक्यानि लिखन्तु ।

१. विख्यातः　　२. पावनं

३. स्थाने स्थाने　　४. बहुमानः

५. भूषितः　　६. वन्याः

## V. सर्जनात्मकता

### १. भारतदेशचित्रं भारतमात्रा सह रचयन्तु ।

### २. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

భారతదేశం కృషిప్రధానమైన దేశం. ఇక్కడ అనేకమంది జనులు గ్రామాలలో నివసిస్తున్నారు. రైతులు వ్యవసాయం చేసి ధాన్యాన్ని ఉత్పత్తి చేస్తున్నారు. ఆహారం లేకుండా జీవించుటెట్లు? వ్యవసాయం లేకుండా ధాన్యం ఎలా వస్తుంది? అందువలన వ్యవసాయం ప్రధానమైనది. వ్యవసాయం చేయు రైతులు ఎక్కువగా గ్రామాలలోనే నివసిస్తున్నారు. అందువలన గ్రామాలు ప్రధానమైనవి. గ్రామసౌభాగ్యమే దేశసౌభాగ్యం.

SCERT TELANGANA

## VI. प्रशंसा

**भारतदेशस्य गौरवं वर्धयितुं भवन्तः किं कर्तुं शक्नुवन्ति ?**

## VII. भाषांशाः

**अ) अधः दत्ते अनुच्छेदे रेखाङ्कितपदानि अवगच्छन्तु ।**

वृक्षच्छायान्विते प्राङ्गणे स्थितं देवालयं प्रति देवदर्शनार्थं सर्वमहान् राजपुरुषः यदा आगतः तदा देवपूजकेन बहुविधपूजासामग्र्या देवम् अर्चयित्वा तस्मै राजकुमाराय आशीर्वादः दत्तः। तत्र स्थिताः नगरवासिनः राजपुत्रस्य दर्शनेन देवदर्शनेन च सन्तुष्टाः।

**आ) उपर्युक्तगद्यांशे रेखाङ्कितानां समस्तपदानां विग्रहवाक्यानि एवं विद्यन्ते ।**

| समासपदम् | विग्रहवाक्यम् |
|---|---|
| देवालयः | देवस्य आलयः |
| सर्वमहान् | सर्वेषां महान् |
| राजपुरुषः | राज्ञः पुरुषः |
| देवपूजकेन | देवस्य पूजकेन |
| राजकुमारः | राज्ञः कुमारः |
| राजपुत्रः | राज्ञः पुत्रः |
| देवदर्शनम् | देवस्य दर्शनम् |

★ **एतेषु सर्वेषु उत्तरपदार्थः प्रधानः । यस्मिन् उत्तरपदार्थः प्रधानः भवति सः तत्पुरुषसमासः।**

**उदाहरणम् - 'वृक्षमूलम्' इति समासपदम् ।**

- अस्य पदस्य विग्रहवाक्यं वृक्षस्य मूलम् इति भवति ।
- अस्मिन् समासपदे उत्तरपदस्य मूलपदस्यैव प्राधान्यं वर्तते ।
- अतः एषः तत्पुरुषसमासः।

तत्पुरुषसमासप्रभेदेषु एकः प्रभेदः षष्ठीतत्पुरुषसमासः।

**ययोः पदयोः षष्ठीविभक्तिप्रत्ययाः लुप्ताः भवन्ति स समासः षष्ठीतत्पुरुषसमासः भवति ।**

SCERT TELANGANA

इ) एवमेव समस्तपदानां विग्रहवाक्यानि वचनभेदेनापि ससन्दर्भं परिवर्तयितुं शक्यन्ते ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **उदाहरणम्** - | देवस्य दर्शनम् | देवयोः दर्शनम् | देवानां दर्शनम् |

ई) अधः दत्तानां समस्तपदानां विग्रहवाक्यानि लिखन्तु ।

१. पूजासामाग्री
२. ग्रन्थालयः
३. गुरुदया
४. चरणसन्निधिः
५. ज्ञानशक्तिः

उ) अधः दत्तानां विग्रहवाक्यानां समासपदानि लिखन्तु ।

१. प्रतिमानाम् आराधनम्
२. आर्षस्य धर्मः
३. बुद्धेः मान्द्यम्
४. दशरथस्य तनयः
५. आर्याणाम् आशीर्वादः

## परियोजनाकार्यम्

**एतादृशानि देशभक्तिगीतानि सङ्गृह्य भित्तिपत्रे सुन्दरैः वर्णाक्षरैः लिखित्वा दर्शयन्तु ।**

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. एकं देशभक्तिगीतं सुस्वरं गातुं शक्नोमि । | ☐ | ☐ |
| २. सर्वेषां कठिनशब्दानामर्थः ज्ञातः। तान् शब्दान् स्वभाषायामुपयोक्तुं शक्नोमि । | ☐ | ☐ |
| ३. भारतदेशस्य विषये दशवाक्यानि लेखितुं शक्नोमि । | ☐ | ☐ |
| ४. भारतदेशचित्रं रचयितुं शक्नोमि । | ☐ | ☐ |

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।**

SCERT TELANGANA

तृतीयः भागः

# ९. चिन्तयन्तु, साधयन्तु

## पठन्तु, विचिन्त्य वदन्तु

एकस्मिन् गृहे विवाहोत्सवः प्रचलति । गृहस्थः उत्सवे बन्धुमित्राणि आहूतवान् । विवाहानन्तरं बन्धुमित्रेषु केचन भुक्त्वा निर्गच्छन्ति । केचन भोक्तुम् आगच्छन्ति। तान् जनान् दृष्ट्वा कश्चन पण्डितः स्वमित्रं प्रति चमत्कारश्लोकमेनम् अवदत् -

**भोजने तत्र वार्ता का ? वार्ताकास्तत्र भोजने ।**
**न सन्ति यदि वार्ताका वार्ता का तत्र भोजने ।।**

भोजने कः विशेषः? वार्ताकाः एव विशेषाः। यदि वार्ताकाः न सन्ति तर्हि भोजने विशेषः नास्तीति भावः। (तत्र स्थिता एका बालिका पितरं पृष्टवती ... )

पुत्री - जनक ! तं श्लोकं सः किमर्थम् उक्तवान् ?

जनकः - आन्ध्रजनानां भोजने वार्ताकः नास्ति चेत् तद्भोजनं भोजनमेव न भवतीति प्रवादः अस्ति । एनमंशं जानन् कश्चन कविः वार्ताकमहत्त्वं चमत्कारेण वर्णितवान् ।

पुत्री - समीचीनम् । एतादृशश्लोकाः मह्यमतीव रोचन्ते । कृपया तादृशान् कतिपयश्लोकान् वदतु ।

जनकः - अस्तु । एताः प्रहेलिकाः इत्युच्यन्ते । ताः शृणोतु ।

### प्रश्नाः

१. पण्डितः कीदृशं श्लोकम् उक्तवान् ?
२. भवतः भोजने इष्टकरः पदार्थः कः ?
३. पुत्री स्वजनकात् किं ज्ञातुम् उत्साहं दर्शयति ?
४. अस्मात् सम्भाषणात् भवन्तः किं ज्ञातवन्तः?

### उद्देश्यम्

* संस्कृताध्ययने अभिरुचिसम्पादनम् ।
* साहित्याध्ययनेन मनोविनोदः।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



भोजनान्ते च किं पेयं ?
जयन्तः कस्य वै सुतः?
कथं विष्णुपदं प्रोक्तं ?
तक्रं शक्रस्य दुर्लभम् ॥ १ ॥



कुलालस्य गृहे ह्यर्धं
तदर्धं हस्तिनापुरे ।
द्वयं मिलित्वा लङ्कायां यो
जानाति स पण्डितः ॥ २ ॥



किं नरः कुरुते गानं ?
कं कं पुष्णाति जाङ्गलम् ?
काऽमितार्थप्रदा देवगवी?
किं शुकवद्धनम् ? ॥ ३ ॥



कोविदो निधिराख्यातः?
कोऽपकृष्टो भवेत्पुमान् ?
इति प्रश्नेऽनुरूपं
यदुत्तरं तदुदीर्यताम् ॥ ४ ॥



कं संजघान कृष्णः?
का शीतलवाहिनी गङ्गा ?
के दारपोषणरताः?
कं बलवन्तं न बाधते शीतम् ? ॥ ५ ॥

SCERT TELANGANA

कस्मिन् वसन्ति वद मीनगणाः? विकल्पं
किं वा पदं वदति ? किं कुरुते विवस्वान् ?
विद्युल्लतावलयवान् पथिकाङ्गनानाम्
उद्वेजको भवति कःखलु ? वारिवाहः ॥ ६ ॥





आनन्दयति कोऽत्यर्थं
सज्जनानेव भूतले ?
प्रबोधयति पद्मानि
तमांसि च निहन्ति कः? ॥ ७ ॥



य एवाद्यः स एवान्तः
मध्यमो मध्य एव च ।
य एतान्न विजानाति
तृणं चापि न वेत्ति सः ॥ ८ ॥



सन्तश्च लुब्धाश्च महर्षिसङ्घा
विप्राः कृषिस्थाः खलु माननीयाः।
किं किं समिच्छन्ति तथैव सर्वे
नेच्छन्ति किं माधवदाघयानम् ॥ ९ ॥

SCERT TELANGANA

## विवरणम् -

१. भोजनस्य अन्ते किं पेयम् ? कस्य पुत्रः जयन्तः? विष्णुपदं कीदृशम् ? एतेषां प्रश्नानामुत्तराणि श्लोके एव सन्ति । अन्विष्यन्तु ।

२. एतस्य समाधानं तु श्लोके साक्षान्न लभ्यते । परन्तु एकैकस्य वाक्यस्य अर्थज्ञानेन तत् प्राप्तुं शक्यते ।

३. प्रश्नेष्वेव उत्तराणि सन्ति । अन्विष्यन्तु ।

४. विदः निधिः कः? अपकृष्टः कः? अत्र वर्णानां योजनमात्रेण उत्तराणि प्राप्यन्ते ।

५. अत्र व्यस्तवर्णानां योजनेन, योजितवर्णानां विघटनेन च उत्तराणि प्राप्नुमः।

६. अत्र प्रश्नचतुष्टयमस्ति । प्रश्नानामुत्तराणि वारिवाहः इत्यस्मिन् पदे सन्ति। साधयन्तु ।

७. अस्मिन् श्लोके प्रश्नत्रयमस्ति । समाधानं तु नास्ति । सज्जनानां महानन्दाय, पद्मानां विकासाय अन्धकारविनाशाय च कारकः एकः एव । तं चिन्तयन्तु ।

८. वर्णमालाधारेण अस्याः प्रहेलिकायाः समाधानं लभेरन् ।

९. अस्मिन् श्लोके सप्तप्रश्नाः सन्ति । सज्जनाः किमिच्छन्ति ? लुब्धाः, महर्षिसङ्घाः, विप्राः, कृषिस्थाः, माननीयाः, च किं किमिच्छन्ति ? सर्वे किं नेच्छन्ति ? इति समाधानानि सर्वाणि माधवदाघयानम् इत्यस्मिन् पदे निगूढानि सन्ति । चिन्तयन्तु, समाधानानि साधयन्तु च ।

## समाधानानि

१. तक्रं, शक्रस्य, दुर्लभम्

२. कुम्भकर्णः

३. किन्नरः, कंकं (गृध्रम्), कामितार्थप्रदा, किंशुकवद्वनम्

४. कोविदः, कोपकृष्टः

५. कंसं जघान, काशीतलवाहिनी, केदारपोषणरताः, कम्बलवन्तम्

६. वारि, वा, अहः, वारिवाहः

७. मित्रोदयः

८. यवसः

९. मानम्, धनम्, वनम्, दानम्, घनम्, यानम् (तीर्थयात्रां) माधवदाघयानम्

### प्रक्रिया -

प्रहेलिकाः प्रश्नोत्तररूपेण, समस्यापूरणरूपेण च इति विविधप्रकाराः भवन्ति । ताः प्रहेलिकाः ऐतिहासिकपौराणिकादीन् अंशान् मानवजीवशैलीश्च वर्णयन्ति ।

प्रश्नोत्तरश्लोकेषु वर्णभेदः, अर्थभेदः, पर्यायभेदः पर्यायशब्दाः, नानार्थशब्दाः तथा च वर्णस्थानपरिवर्तनम् इत्यादयः निगूढतया भवन्ति ।

संस्कृतसुभाषितरत्नभाण्डागारः इति पुस्तके ईदृशाः श्लोकाः उपलभ्यन्ते ।

SCERT TELANGANA

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) कक्ष्यायां छात्राः गणद्वये विभक्ताः भवेयुः। प्रथमगणीयाः छात्राः प्रहेलिकाः पृच्छन्ति । द्वितीयगणीयाः समाधानं वदन्ति ।

आ) प्रहेलिकाः छात्राणां कृते कथमुपकुर्वन्ति ?

इ) कतिपयप्रहेलिकाः वदन्तु ।

ई) एताः प्रहेलिकाः श्रुतवन्तः खलु ! कीदृशीम् अनुभूतिं प्राप्तवन्तः? वदन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठं पठित्वा प्रश्नवाचकपदानामधः रेखाङ्कनं कुर्वन्तु, लिखन्तु ।

आ) अधः दत्तानि पदानि दृष्ट्वा तत्सम्बद्धश्लोकान् पठन्तु । तेषां भावं वदन्तु ।

१. वारिवाहः
२. दारपोषणरताः
३. अपकृष्टः
४. जाङ्गलम्
५. महर्षिसङ्घाः

इ) वारिवाहः इति पदेन सम्बद्धान् प्रश्नान् लिखन्तु ।

ई) अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

**न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।**
**अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान् ॥**

१. कार्याणि कदा करणीयानि भवन्ति ?
२. श्वस्तनं कार्यं कदा करणीयम् ?
३. बुद्धिमान् कार्याणि कदा करोति ?
४. श्लोकस्य मुख्योद्देशः कः?

उ) अधः दत्तानां प्रश्नानां समाधानानि पाठे अन्विष्य लिखन्तु ।

१. अपकृष्टः कः भवति ?
२. शीतं कं न बाधते ?
३. भोजनान्ते किं पेयम् ?
४. माधवदाग्रयानं के इच्छन्ति । ते एव किं नेच्छन्ति ?
५. श्लोकेभ्यः चमत्कारपदानि चित्वा लिखन्तु ।

SCERT TELANGANA

## III. स्वीयरचना

**अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. माधवदाघयानम् इत्यस्मिन् पदे सज्जनाः किम् इच्छन्ति ? किं नेच्छन्ति इति वर्णितम् । तान् इष्टान् अनिष्टान् च अंशान् सूचीकुर्वन्तु ।

२. प्रहेलिकाभिः के उपयोगाः भवन्तीति दशवाक्यैः लिखन्तु ।

३. चमत्कारश्लोकानां पठनेन मनः कीदृशीम् अनुभूतिं प्राप्नोतीति लिखन्तु ।

४. सामान्यश्लोकानां, प्रहेलिकानां मध्ये को भेदः इति लिखन्तु ।

## IV. पदजालाभिवृद्धिः

### अ) अधः दत्तं परिच्छेदं पठन्तु

एकस्मिन् ग्रामे एकः विप्रः आसीत् । सः भूसुरः प्रतिदिनं दैवाराधनं करोति स्म । ब्राह्मणः अयं शास्त्राध्ययनमपि कृतवान् । तदा ग्रामजनाः तम् उत्तमः द्विजः इति प्रशंसितवन्तः।

**उपरि रेखाङ्कितानि पदानि परिशीलयन्तु । तान्येव पर्यायपदानि ।**

यथा **विप्रः** इति पदस्य **भूसुरः, ब्राह्मणः, द्विजः** इति ।

**एवमेव अधः कानिचन पदानि दत्तानि सन्ति । तेषां पर्यायपदानि लिखन्तु ।**

१. विवस्वान्

२. वारिवाहः

३. गङ्गा

४. पद्मम्

५. तमः

६. नरः

७. तृणम्

### आ) अधः दत्तानि रेखाङ्कितानि पदानि उपयुज्य स्वीयवाक्यानि रचयन्तु ।

१. यदि अम्बा वदति तर्हि शिशुः शृणोति ।

२. पयोहिमं शीतं भवति ।

३. रामस्य सुतः लवः।

४. जले मीनाः तरन्ति ।

### इ) यथोचितं योजयन्तु ।

| | |
|---|---|
| १. आनन्दयति कोऽत्यर्थम् | विप्राः कृषिस्थाः खलु माननीयाः |
| २. सन्तश्च लुब्धाश्च महर्षिसङ्घाः | कोऽपकृष्टो भवेत्पुमान् |
| ३. भोजनान्ते च किं पेयं | सज्जनानां भूतले |
| ४. कोविदो निधिराख्यातः | तक्रं शक्रस्य दुर्लभम् |
| ५. कथं विष्णुपदं प्रोक्तम् | जयन्तः कस्य वै सुतः |



SCERT TELANGANA

## V. सर्जनात्मकता

अ) अधः दत्ताः प्रहेलिकाः संस्कृतभाषया अनुवदन्तु । समाधानानि लिखन्तु ।

1. అడవిలో పుట్టింది, అడవిలో పెరిగింది,
   మా యింటికి వచ్చింది, తైతక్కలాడింది.
2. అమ్మ అంటే కలుస్తాయి, నాన్న అంటే కలవవు.

आ) भवद्भिः ज्ञाताः प्रहेलिकाः लिखन्तु ।

## VI. प्रशंसा

१. यदि भवतः मित्रं नूतनप्रहेलिकानां समाधानानि वदति तर्हि भवान् तमुद्दिश्य कथं प्रतिस्पन्दते ?

२. भवान् प्रहेलिकारचयितॄणां रचनासामर्थ्यं कथं प्रशंसति ?

## VII. भाषांशाः

(१) (अ) अधः दत्ते वाक्ये रेखाङ्कितपदानि अवगच्छन्तु ।

त्रेतायुगद्वापरयुगयोः सूर्यचन्द्रयोः वंशसमुद्भवौ रामकृष्णौ । ताभ्यां पराक्रमेण रावणकंसौ निहतौ ।

उपर्युक्तवाक्ये रेखाङ्कितपदानां विग्रहवाक्यानि एवं भवन्ति ।

| | | |
|---|---|---|
| त्रेतायुगद्वापरयुगौ | - | त्रेतायुगश्च द्वापरयुगश्च |
| सूर्यचन्द्रौ | - | सूर्यः च चन्द्रः च |
| रामकृष्णौ | - | रामश्च कृष्णश्च |
| रावणकंसौ | - | रावणश्च कंसश्च |

★ **यस्मिन् समासे उभयोरपि पूर्वोत्तरयोः पदार्थयोः प्राधान्यं भवति सः द्वन्द्वसमासः भवति । अर्थात् अत्र पूर्वपदस्य, उत्तरपदस्यापि समानप्राधान्यं भवति ।**

★ **द्वन्द्वसमासपदेषु प्रायः नामवाचकान्येव भवन्ति ।**

**उदाहरणम्** - शिवपार्वत्यौ

शिवश्च पार्वती च इति विग्रहवाक्ये शिवः, पार्वती इति द्वे पदे अपि नामवाचके ।

(आ) अधः दत्तम् उदाहरणं पश्यन्तु ।

**धर्मार्थकाममोक्षाः**

अस्य विग्रहवाक्यं धर्मश्च अर्थश्च कामश्च मोक्षश्च इति ।

★ **इत्थं यत्र बहूनां मिलितानां पदानाम् एकस्मिन् क्रियापदे अन्वयः भवति तत्र इतरेतरद्वन्द्वसमासो भवति ।**

SCERT TELANGANA

**(इ) अधः दत्तानां समासपदानां विग्रहवाक्यानि लिखन्तु ।**

१. कष्टसुखे　　२. शीतोष्णौ　　३. हरिहरगुरवः
४. मातापितरौ　५. पार्वतीपरमेश्वरौ

**(ई) अधः दत्तानां विग्रहवाक्यानां समासपदानि लिखन्तु ।**

१. शान्तिश्च अहिंसा च

२. वृक्षश्च पर्वतश्च

३. सुखं च दुःखं च

४. रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्च

५. गङ्गा च यमुना च

**(२)**

**अ) पठन्तु, अवगच्छन्तु ।**

**१) श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।**

**२) सकलकलामोदलहरी ।**

- प्रथमवाक्ये मकारस्य हकारस्य, श्रीकारस्य च आवृत्तिः जायते ।
- द्वितीयवाक्ये ककारलकारयोः आवृत्तिः जायते ।

★ **यत्र वर्णानां पुनरावृत्तिः श्राव्यतया भवति, तत्र वृत्त्यनुप्रासालङ्कारः भवति ।**

**आ) अधः दत्तस्य वाक्यस्य अलङ्कारलक्षणं सूचयन्तु ।**

**विविधमन्त्रप्रगतिसिद्धे विविधयन्त्रप्रगतिसिद्धे ।**

## परियोजनाकार्यम्

नूतनतया पञ्च संस्कृतप्रहेलिकाः सङ्गृह्य आनयन्तु, कक्ष्यायां श्रावयन्तु ।

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. पाठिताः प्रहेलिकाः अवगन्तुं शक्नोमि । | ☐ | ☐ |
| २. पाठितप्रहेलिकासु स्थितं निगूढार्थं वक्तुं शक्नोमि । | ☐ | ☐ |
| ३. प्रहेलिकाः प्रष्टुं शक्नोमि । | ☐ | ☐ |
| ४. प्रहेलिकानां वैशिष्ट्यं लेखितुं शक्नोमि । | ☐ | ☐ |

SCERT TELANGANA

तृतीयः भागः

# १०. चलद्वाणी

## पठन्तु, विचिन्त्य वदन्तु

पुत्रः - पितः! केन सह चलद्वाण्या सम्भाषणं करोति ?

पिता - अहं कार्यालयाध्यक्षेण सह कार्यालयकर्मचारिभिः सह च सम्भाषणं करोमि ।

पुत्रः - एकवारमेव बहुभिः सह सम्भाषणं कर्तुं शक्यते वा ?

पिता - सत्यम् । तद्गोष्ठीसम्भाषणमित्युच्यते । **(conference call)**

पुत्रः - चलद्वाण्यां तादृशव्यवस्था अपि अस्ति वा ?

पिता - आम् । एतावदेव न, एतेन चलद्वाणीयन्त्रेण बहूनि अन्यानि प्रयोजनानि सन्ति । हानयः अपि सन्ति ।

पुत्रः - कानि तानि प्रयोजनानि ? काः च हानयः?

पिता - अस्तु । शृणु ..............।

### प्रश्नाः

१. पितापुत्रयोः सम्भाषणं कमंशमुद्दिश्य प्रचलति ?

२. पिता चलद्वाण्याः उपयोगं किमर्थं करोति ?

३. चलद्वाण्या अन्यानि प्रयोजनानि कानि ?

**उद्देश्यम्**

★ धारया दोषरहितशैल्या संस्कृतपठनकौशलस्य विकासः।

★वस्तुनः उपयोगदुरुपयोगयोः निरूपणेन तस्य सदुपयोगकरणे अभिरुचेः विकासः।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



## (हे चलद्वाणि !)

जय जय चलद्वाणि ! जय जय सदा वाणि !

जय मनुजसम्पर्कसंवर्धिके ! बालवृद्धादिपाण्यन्तरावासिके! खण्डखण्डान्तराऽखण्डताऽऽपादिके ! चारुवैचित्र्यरूपातिसंशोभिते! स्पर्शमात्रेण कैङ्कर्यसम्पादिके ! नित्यसन्धानविद्युत्प्रवाहोत्थकार्यान्विते ! पूर्वसम्पादितद्रव्यनाशादिसम्बोधिके !

व्यस्तसिद्धादिवाग्जालकैरुत्तराभाषिवैमुख्यवैफल्यसंसूचिके ! मानसाभीष्टचित्रग्रहे ! तस्य रक्षाकृतौ चापि नैपुण्यसन्दर्शिके ! स्वान्तवेगानुसम्प्राप्तसन्देशसल्लापलीलाविनोदान्विते !

एवमष्टादशावश्यकार्योपकृत्यौघसंशोभिते! सर्वलोकेषु संव्यापि-वाणिज्यशास्त्रीयविज्ञानवार्तार्पणानन्दसन्धायिके !

मर्त्यमर्त्यान्तराबद्धपारस्परोल्लाससम्बन्धसाकल्यविध्वंसिके ! नीतिसन्मार्गविश्लेषिके ! व्याधिजालाऽधिदौर्गत्यसम्पोषिके ! चित्त-संशोषिके ! पारवश्योत्थवाचालताव्यर्थसम्भाषणादोषसन्दूषणोत्पादिके ! वाग्मितोत्सादिके ! पावनोदारगङ्गाम्बुनिक्षिप्तसम्बन्धक्लृप्तोक्तिके ! लोकपर्यावृतिध्वंसिके !

सर्वसौधस्थिते ! सर्वराज्यस्थिते ! सर्वदेशस्थिते ! सर्वलोकस्थिते! वक्त्रकर्णान्विते ! देहपीडाकृते ! सर्वगे ! पाहि मां, पाहि मां, पाहि मां, ते नमस्ते नमस्ते नमस्ते नमः ।।



SCERT TELANGANA

## सारांशः

हे चलद्वाणि ! त्वं जयं प्राप्नुहि सर्वदा जयं प्राप्नुहि । चलद्वाणी मानवानां मध्ये सम्बन्धं वर्धयति । यूनां वृद्धानां हस्तेषु भवति । भौगोलिकखण्डानां खण्डान्तराणां मध्ये अखण्डतां कल्पयति। सुन्दरैः विचित्रैः विविधैः रुपैः सा शोभते । स्पर्शमात्रेण सेविका इव कार्यं करोति । विद्युत्प्रवाहयोजनेनैव कार्यं कर्तुं सिद्धा भवति । तस्यां पूर्वमेव योजितं धनं क्रमशः क्षीणं भवति । कार्यमग्नाः सन्ति - भवताम् आह्वानमस्माकम् अत्यन्तं मूल्यवत् - वयं सिद्धाः इत्यादिवचनैः प्रतिवचनदातृणां वैमुख्यं, वैफल्यम् अङ्गीकारञ्च सा सूचयति । मनोहराणि दृश्यानि स्वीकरोति रक्षति च । मनोवेगेन सन्देशान्, संलापान् च प्राप्नोति । क्रीडाः इत्यादीनां ज्ञानं च प्राप्नोति । इमानि महत्तरप्रयोजनानि अनया सिद्ध्यन्ति । एवं विनूत्नानां विशिष्टानाम् अष्टादशकार्याणाञ्च उपयोगाय योग्यः साधनसमूहः एतस्यां भवति । लोके सर्वत्र व्याप्तानां वाणिज्य-विज्ञान-वार्तानां प्रदाने समर्था एषा चलद्वाणी ।

अपि च इयं चलद्वाणी अत्युपयोगेन, वक्रविनियोगेन च मानवानां मध्ये सम्बन्धान् नाशयति । नीतिमार्गम्, उत्तममार्गमपि नाशयति एषा । रोगसमूहं मनोव्याधिं दुर्गतिं च वर्धयति । मनः शोषयति । शरीरं विस्मारयति । तेन जल्पिता, कालयापनवचनानीत्यादिदुष्टलक्षणानि भवन्ति। सम्यग्भाषणमिति लक्षणं नाशयति । मितभाषणं नश्यति । किं च लोके पर्यावरणप्रशान्ततां नाशयति ।

एषा चलद्वाणी सर्वभवनेषु भवति । सर्वराज्येषु, देशेषु, लोकेषु स्थिता एषा । एतस्याः मुखं कर्णः अपि भवतः। एषा शरीरं बाधयति । सर्वत्र स्थिते हे चलद्वाणि ! मां रक्ष, रक्ष, रक्ष, वारं वारं त्वां नमस्करोमि ।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) पूर्वं पठितानां पाठानाम् अपेक्षया अस्मिन् पाठे कः विशेषः/भेदः विद्यते ?

आ) चलद्वाण्याः प्रयोजनानि कानि ?

इ) चलद्वाण्याः गुणान् वदन्तु ।

ई) चलद्वाण्याः दोषान् वदन्तु ।

उ) चलद्वाणी मानवानां / प्राणिनां जीवनं कथं प्रभावयति ?

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठस्थानां सम्बोधनार्थकपदानाम् अधः रेखाङ्कनं कुर्वन्तु, लिखन्तु ।

आ) अधः दत्तानि वाक्यानि पठन्तु, तत्सम्बद्धवाक्यानि पाठात् चित्वा लिखन्तु ।

१. बालवृद्धादीनां हस्तेषु विद्यमाने ! २. पूर्वयोजितधननाशनसुदर्शिके !

३. नीतिसन्मार्गाणां नाशिका ! ४. मानवयोर्मध्ये सम्बन्धवर्धिके !

५. रोगसमूह-मनोव्याधिदुर्गतिसंवर्धिके !

SCERT TELANGANA

### इ) अधः दत्तानां पदानां स्वीयभाषया अर्थान् लिखन्तु ।

१. सर्वसौधस्थिते !
२. देहपीडाकृते !
३. नीतिसन्मार्गविश्लेषिके
४. कैङ्कर्यसम्पादिके !
५. पाण्यन्तरावासिके !
६. लोकपर्यावृत्तिध्वंसिके !
७. वाग्मितोत्सादिके !
८. वक्त्रकर्णान्विते !

### ई) अधः दत्तम् अनुच्छेदं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

आधुनिककाले वैज्ञानिकाविष्कारेषु दूरदर्शनयन्त्रस्य विशिष्टस्थानं वर्तते। दूरदर्शनयन्त्रस्य टि.वि इति सूक्ष्मनाम्ना व्यवहारः। टेलि इत्युक्ते दूरस्थम् इति, विजन् इत्युक्ते 'दर्शकम्' इति च अर्थं स्वीकृत्य आङ्ग्लभाषायां टेलिविजन् इति पदेन सम्बुद्ध्यते इदम् । क्रीस्ताब्दे १९२२ तमे वर्षे स्काट्ल्याण्ड्देशीयेन जान् लूगी वेयाई् महोदयेन अविष्कृतम् एतत् ।

१. दूरदर्शनस्य आविष्कारः केन कृतः?
२. टि.वि इत्यस्य अर्थं लिखन्तु ।
३. अनुच्छेदस्य शीर्षिकां रचयन्तु ।

### उ) अधः दत्तानां प्रश्नानां समाधानानि पाठात् चित्वा लिखन्तु ।

१. चलद्वाणी कथं कार्यं करोति ?
२. चलद्वाणी किं किं दूरीकरोति ?
३. चलद्वाणी कीदृशरोगान् जनयति ?
४. चलद्वाणी कीदृशवार्ताः दत्त्वा आनन्दं जनयति ?
५. चलद्वाणी कीदृशनैपुण्यं दर्शयति ?

## III. स्वीयरचना

### (अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. प्रतिहस्तं चलद्वाणी भवेत् इत्यत्र भवताम् अभिप्रायः कः?
२. चलद्वाणी कानि कानि सौकर्याणि यच्छति ?
३. आधुनिककाले चटकादयः लघुपक्षिणः अधिकतया न दृश्यन्ते । किमर्थमिति भवन्तः ऊहितुं शक्नुवन्ति ?
४. सर्वकारीयपाठशालासु चलद्वाणी निषिद्धा किमर्थमिति भवान् चिन्तयति ?

SCERT TELANGANA

**(आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. चलद्वाणीं विना जीवनं कथं भवति? स्वीयवाक्यैः लिखन्तु ।

२. चलद्वाण्याः लाभहानीः उद्दिश्य स्वीयवाक्यैः लिखन्तु ।

## IV. पदजालाभिवृद्धिः

**अधः दत्तवाक्यानि पठन्तु । रेखाङ्कितपदमुपयुज्य पुनः वाक्यं लिखन्तु ।**

१. क्रीडनेन मानसिकोल्लासः भवति ।

२. चारुवैचित्र्यरूपादिभिः चलद्वाणी शोभते ।

३. चलद्वाणी मनसा अभीष्टचित्रस्य ग्रहणे रक्षणे च नैपुण्यं प्रदर्शयति ।

४. चलद्वाणी चित्तसंशोषिका अस्ति ।

५. चलद्वाणी लोके पर्यावरणस्य ध्वंसं करोति ।

## V. सर्जनात्मकता

**अ) चलद्वाणी कथमुपयोक्तव्या इति विषयमधिकृत्य मित्राय लेखमेकं लिखन्तु।**

**आ) अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।**

సంగణక యంత్రానికి ప్రస్తుత కాలంలో చాలా ప్రాముఖ్యం ఉంది. సంగణక యంత్రం లేని కార్యక్షేత్రాలు లేవు. ఇది వైద్య, విద్యా, శాస్త్రసాంకేతిక రంగాలలో ప్రముఖస్థానాన్ని ఆక్రమించింది. సంగణక యంత్రానికి ముఖ్యంగా మూడు లక్షణాలున్నాయి. అతి వేగము, నిర్దిష్టత, విషయాలను రక్షించడం మరియు తెలపడం.

## VI. प्रशंसा

**प्रसारसाधनानाम् अभिवृद्धौ उपग्रहाः प्रमुखं स्थानं वहन्ति । तेषां निर्माणे शास्त्रज्ञानां प्रयत्नं वर्णयन्तु ।**

## VII. भाषांशाः

**(१)** **अ) पठन्तु, अवगच्छन्तु ।**

| | | |
|---|---|---|
| पञ्चानां पात्राणां समाहारः | - | पञ्चपात्रम् |
| पञ्चानां गवां समाहारः | - | पञ्चगवम् |
| पञ्चानां वटानां समाहारः | - | पञ्चवटी |
| त्रयाणां लोकानां समाहारः | - | त्रिलोकी |

★ **उपरि सर्वेषु समस्तपदेषु पूर्वपदं सङ्ख्यावाचकमेव भवति । पश्यन्तु । एवं प्रकारेण पूर्वपदं सङ्ख्यावाचकं भवति चेत् द्विगुसमासः भवति ।**

**द्विगुसमासविषये अधः दत्ताः नियमाः वर्तन्ते -**

१. एतेषु सर्वत्र पूर्वं पदं सङ्ख्यावाचकं भवति ।

२. समस्तपदानि समाहारस्य द्योतकानि ।

३. समाहारद्विगुः एकवचनान्तः भवति ।

SCERT TELANGANA

**आ) अधः दत्तैः समस्तपदैः विग्रहवाक्यानि मेलयन्तु ।**

| | | |
|---|---|---|
| १. शताब्दी | - | चतुर्णां पथां समाहारः |
| २. त्रिपथम् | - | पञ्चानां नदीनां समाहरः |
| ३. चतुष्पथम् | - | सप्तानाम् अह्नां समाहारः |
| ४. पञ्चनदम् | - | शतस्य अब्दानां समाहारः |
| ५. सप्ताहः | - | त्रयाणां पथानां समाहारः |

**(२)**

**अ) पठन्तु, अवगच्छन्तु ।**

**वनान्तशय्या कठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।**
**कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥**

- अस्मिन् श्लोके अगजौ गजौ, संयमौ यमौ कठिनीकृताकृती इति अव्यवधानेन प्रयुक्तानि । किन्तु अत्र अर्थभेदः तात्पर्यभेदः दृश्यते ।

★ **इत्थं यत्र अक्षरसमुदायस्य आवृत्तिः अर्थभेदेन, तात्पर्यभेदेन च दृश्यते तत्र यमकालङ्कारः भवति ।**

**आ) अधः दत्तस्य वाक्यस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

**मध्यं तनुत्वादविभाव्यमानम् आकाशमासीदसितायताक्ष्याः।**
**गर्भोदये विष्णुपदापदेशात् कार्श्यं विहायापि विहाय एव ॥**

१. अस्मिन् श्लोके द्विवारमागतं पदं किम् ?

२. पूर्वपदस्य उत्तरपदस्य च अर्थः कः?

**इ) अधः दत्तस्य श्लोकपादस्य अलङ्कारनिरूपणं कुर्वन्तु ।**

श्रीकृष्णदर्शनेन विस्मिताः स्मिताननाः।

**परियोजनाकार्यम्**

एकस्य प्रसारसाधनस्य चित्रं सङ्गृह्य तस्य वैशिष्ट्यं लिखित्वा आनयन्तु, प्रदर्शयन्तु ।

**स्वीयमूल्याङ्कनम्**

| | आम् | न |
|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | |
| २. चलद्वाण्याः लाभान् , हानीः च लेखितुं शक्नोमि । | | |
| ३. चलद्वाण्याः उपयोगः कदा कथं करणीयः इति मित्रं प्रति लेखं लेखितुं शक्नोमि । | | |
| ४. दण्डकशैलीम् अवगन्तुं शक्नोमि । | | |
| ५. चलद्वाणीं विना जीवनं कथं भवतीति लेखितुं शक्नोमि । | | |

SCERT TELANGANA

पठन्तु - नन्दन्तु

# मूर्खवैद्ये

तृतीयः भागः

(मार्गः। द्वे वैद्ये परस्परं मिलतः।)

रमा - हरिः ओं गीते ।

गीता - हरिः ओं रमे !

रमा - अहो ! चिरात् दर्शनं भवत्याः।

गीता - भवत्याः अपि । इदानीं भवती किं करोति ?

रमा - (गर्वेण) अहम् एं,बि.बि.एस्. पठितवती खलु ! इदानीं वैद्या अस्मि। भवती किं करोति ?

गीता - (गर्वेण) अहमपि वैद्यकीयमेव पठितवती, इदानीम् आयुर्वेदवैद्या अस्मि ।



SCERT TELANGANA

रमा - एवं वा ? अहम् अस्थिविशेषज्ञा अस्मि ।

गीता - अहं चर्मरोगविशेषज्ञा अस्मि ।

रमा - (गर्वेण) अपि जानाति भवती, अहं रोगिणः स्पर्शम् अकृत्वा एव तस्य कः रोगः इति वक्तुं शक्नोमि ।

गीता - अहमपि रोगिणं दूरतः दृष्ट्वा एव तस्य कः रोगः इति वक्तुं शक्नोमि ।

रमा - एवं वा ? (कश्चन पथिकः दूरतः आगच्छति । तं दृष्ट्वा) तर्हि तत्र पश्यतु, कश्चन आगच्छन् अस्ति । सः चलने कष्टम् अनुभवन् अस्ति । तस्य कः रोगः इति भवती वदतु ।

गीता - (दृष्ट्वा) भवती एव प्रथमं वदतु ।

रमा - अस्तु, अहमेव वदामि । तस्य पादे अस्थिभङ्गः जातः अस्ति । अतः सः तथा चलति ।

गीता - नैव । तस्य पादे कश्चन चर्मरोगः अस्ति । अतः तथा चलति ।

रमा - नहि नहि । तस्य अस्थिभङ्गः एव जातः अस्ति ।

गीता - नहि नहि । तस्य चर्मरोगः एव ।

रमा - किमर्थं वृथा विवादः। तमेव पृच्छावः (द्वेऽपि तस्य समीपं गच्छतः)

रमा - (तस्य वामभुजं गृहीत्वा) भोः, भवतः पादे अस्थिभङ्गः जातः किल ?

गीता - (तस्य दक्षिणभुजं गृहीत्वा) भोः भवतः पादे चर्मरोगः अस्ति किल ?

रमा - (तम् आकर्षन्ती) वदतु, अस्थिभङ्गः किल ?

गीता - (तम् आकर्षन्ती) वदतु, चर्मरोगः किल ?

रमा - (उच्चैः) अस्थिभङ्गः किल ?

गीता - (उच्चैः) चर्मरोगः किल ?

पथिकः - (कोपेन हस्तौ मोचयित्वा) नैव नैव भोः। सम्यक् श्रूयताम् - मम अस्थिभङ्गः अपि नास्ति, चर्मरोगः अपि नास्ति । मम पादरक्षा छिन्ना अस्ति, तावदेव ........। (छिन्नां पादरक्षाम् उद्धृत्य दर्शयति । द्वेऽपि वैद्ये स्वशिरः अवनमयतः।)

* * *

SCERT TELANGANA

# गद्यभागः

SCERT TELANGANA




SCERT TELANGANA

प्रथमः भागः

# १. भगीरथः

## पठन्तु , विचिन्त्य वदन्तु

**उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।**
**न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥**

### प्रश्नाः

१. अस्मिन् सुभाषिते किं वर्णितमस्ति ?
२. कार्याणि केन सिद्ध्यन्ति ?
३. सुप्तस्य सिंहस्य मुखे मृगाः किमर्थं न प्रविशन्ति?
४. उद्यमः इति शब्देन किम् अवगच्छन्ति ?

### उद्देश्यम्

★ संस्कृतकथाभिः अपूर्वदेशीयसाहित्यस्य परिचयप्रदानम् ।
★ कथाभिः नैतिकमूल्यानां परिचयपुरस्सरम् आचरणाय प्रेरणादानम् ।

## पृष्ठभूमिः

सूर्यवंशीयः सगरो नाम राजा विश्वकल्याणाय अश्वमेधयागम् आरब्धवान् । तेन भीतः देवेन्द्रः यागाश्वं चोरयित्वा पाताले कपिलमहर्षेः आश्रमे गोपितवान् । सगरस्य पुत्राः पातालं गत्वा कपिलमहर्षिम् अश्वहर्तारं मत्वा अनिन्दन् । तेषां निन्दनेन क्रुद्धस्य तस्य शापेन ते सर्वेऽपि भस्मराशयः अभवन्।

अनन्तरकाले सूर्यवंशोत्पन्नः अंशुमान् दिलीपश्च मृतान् सगरपुत्रान् पवित्रान् कर्तुं स्वर्गलोकतः गङ्गामानेतुं प्रयत्नं कृत्वा विफलो जातः। तदनन्तरकथा प्रस्तुतपाठ्यांशस्य विषयः।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

अथ भगीरथो नाम दिलीपस्य पुत्रः स्वर्गङ्गायाः आनयने स्वपितुः असफलं परिश्रमं ज्ञातवान्। कपिलमहर्षेः आग्रहेण अकालमरणं प्राप्य दुर्गतिमनुभवतः स्वपितामहान् पवित्रीकर्तुं कृतदृढसङ्कल्पः भगीरथः सकलदेवसन्निधानं गोकर्णक्षेत्रमवाप। स तत्र चतुर्मुखमुद्दिश्य कठिनं तपश्चकार। तेन सन्तुष्टो ब्रह्मदेवस्तमुपेत्य "दृढसङ्कल्प ! भगीरथ ! तव अभीष्ट-सिद्धिर्भवत्येव। त्वं तु लोकपावनीं सुरगङ्गामाराधय" इत्युक्त्वा निरगात्। वचनैस्तैः प्रेरितो भगीरथः सुरगङ्गामुद्दिश्य तस्याः अनुग्रहार्थं दिव्यं तपः आचरत्। प्रसन्ना गङ्गादेव्यपि तमेवमवोचत् "महाप्रयत्न ! महता ते तपसा सन्तुष्टाऽस्मि नितराम्। पूरयामि च तवाभीष्टम् किन्तु स्वर्गलोकतो भूलोकं समुत्पतन्तीं मां धर्तुं जटाजूटधरं भक्तवशङ्करं शङ्करं विना नान्यो देवस्समर्थः। अतस्त्वं तदनुग्रहमाप्नुहि" इत्यनुगृह्य त्रिदिवं जगाम।



बहुकालतः तपश्चरणेन जर्जरीभूतशरीरोऽपि सः महादेवस्य नामस्मरणेन पुनरवाप्तचैतन्यः परमशिवमुद्दिश्य महोग्रं तपश्चकार । निराहारस्य, निर्णिद्रस्य, निर्विरामस्य तस्य बहुवर्षाण्यतीतानीत्यपि ज्ञानं नासीत् । तस्य तीव्रेण तपसा सन्तुष्टः परमशिवः दृग्गोचरो भूत्वा "हे दृढदीक्ष ! भगीरथ ! पूर्वजानां सद्गतये निर्विरामोऽयं ते प्रयत्नः अनुपमः । शुभतरङ्गिणीं गङ्गां धर्तुमहं संसिद्धोऽस्मि" इत्यकथयत् ।

तदा पुनर्भगीरथस्य प्रार्थनया सुरगङ्गा महता वेगेन, प्रवहन्ती पार्वतीरमणस्य गहनं जटारण्यमाविवेश। ततो महादेवेन यथायोग्यं विनिर्मुक्ता सा मन्दाकिनी हिमनगस्थं बिन्दुसरोवरमाश्रित्य अग्रतो भगीरथेन सविनयं निर्दिश्यमानमार्गा तदानन्दाश्रुभिः पूतं मार्गमनुसृत्य वसुधां पावयितुमुपचक्रमे ।

एवमप्रतिहतोत्तुङ्गमङ्गलतरङ्गनर्तनैः अवनीवासिनोऽनुगृह्णती सा तरङ्गिणी तपोधनस्य जह्नुमहर्षेः यज्ञवाटिकामाक्रान्तवती स्वीयसलिलौघैः । तेन क्रोधाग्निदग्धः जह्नुमहर्षिस्सरितां तां चुलुकीकृत्य निपीतवान्। तदा भगीरथस्तपोनिधिं तं बहुधा संस्तुत्य सान्त्वयामास ।

ततस्तेन मुनिवरेण स्वदक्षिणकर्णतः विमुक्ता सती सा 'जाह्नवीति' 'जह्नुकन्येति' नाम धरन्ती धरित्रीमनुसरन्ती पातालं प्रविवेश ।

ततस्सा गङ्गा कपिलमहर्षेः कोपाग्निदग्धानां भूपतिपुत्राणां भस्मराशीनाविश्य तान् पवित्रचरित्रान् कृत्वा विष्णुसायुज्यं प्रापयामास । भगीरथस्य महाप्रयत्नेन भूलोकं पातालञ्च प्रविष्टा सा सुरगङ्गा ततो भागीरथीति विख्याता ।

एवं वज्रदृढसङ्कल्पः भगीरथः
बहुदेवताप्रसादानवाप्य
स्वपितामहान् पुण्यलोकान् प्रैषयत् ।

**"विघ्नैर्मुहुर्मुहुरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमजना न परित्यजन्ति"**



# एतानि कुर्वन्तु

## I. श्रुण्वन्तु, विचिन्त्य वदन्तु ।

१. भगीरथस्य कार्यदीक्षां स्वीयवाक्यैः वदन्तु ।

२. प्रयत्नेन किमपि वा साधयितुं शक्यते इत्यंशं समर्थयन्तु ।

३. विद्यार्थिनः केषु विषयेषु दृढसङ्कल्पाः भवेयुः ?

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) अधः दत्तानि पदानि पाठे कस्मिन् अनुच्छेदे सन्तीति ज्ञात्वा तस्य सङ्ख्यां पदानां पार्श्वे लिखन्तु ।

१. दृढसङ्कल्पः  २. समुत्पतन्तीम्  ३. जर्जरीभूतशरीरः

४. सद्गतये  ५. भुवनपावनीम्  ६. शुभतरङ्गिणी

७. जाह्नवी  ८. भस्मराशीन्

आ) अधः दत्तानि वाक्यानि पठन्तु । तेषां समानार्थकानि वाक्यानि पाठात् चित्वा लिखन्तु ।

१. हे महाप्रयत्न ! भवतः तपसा अहं नितरां प्रमुदिता अस्मि ।

२. भवान् लोकपावनीं स्वर्गङ्गाम् आराधय ।

३. शुभदायिनीं गङ्गां धर्तुम् अहं सिद्धः अस्मि ।

४. तेन कारणेन सा स्वर्णदी भागीरथीति प्रसिद्धिं प्राप ।

इ) अधः दत्तां पट्टिकां पाठाधारेण पूरयन्तु ।

| क्र.सं | कृतं कार्यम् | तस्य फलम् |
|---|---|---|
| उदा | ब्रह्माणमुद्दिश्य तपः | गङ्गां प्रति प्रार्थनार्थं निर्देशः । |
| १. | गङ्गामुद्दिश्य तपः | |
| | २. | जह्नुमहर्षेः वाटिकाक्रमणम् |
| ३. | शिवमुद्दिश्य तपः | |

SCERT TELANGANA

### ई) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

अरिः नाम शत्रुः इत्यर्थः। मानवानां दुर्गुणाः षट् भवन्ति । तानेव ''अरिषड्वर्गः'' इति वदन्ति । ते च काम - क्रोध - लोभ - मोह - मद - मात्सर्याः । अरिषड्वर्गः त्यक्तव्य इति धर्मविदः वदन्ति । एतेषां परित्यागः दुष्करः एव । परं श्रीकृष्णेन गीतायामुक्तम् यदेते अभ्यासेन, साधनेन, सत्साङ्गत्येन परित्यक्तुं शक्यन्ते । प्रत्येकमपि दुर्गुणः यावज्जीवं मानवम् अधः पातयति ।

१. मानवानां दुर्गुणाः कति ? ते के ?

२. षट् दुर्गुणाः केन नाम्ना व्यवह्रियन्ते ?

३. मानवाः षट् रिपून् कथं परित्यजेयुः ? एतत् कुत्र उक्तम् ?

४. अस्य अनुच्छेदस्य शीर्षिकां सूचयन्तु ।

### उ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. भगीरथः कुत्र तपः कृतवान् ?

२. तपसा सन्तुष्टः परमेश्वरः किमवदत् ?

३. जह्नुमहर्षिः किमर्थं गङ्गां पीतवान् ?

४. भगीरथः शिवमुद्दिश्य तपः किमर्थं कृतवान् ?

## III. स्वीयरचना

### अ) अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।

१. स्वर्गतः पतन्तीं गङ्गां धर्तुं शिवः किमर्थं समर्थः?

२. जह्नुमहर्षिः गङ्गायै किमर्थं कुपितः अभवत् ?

३. भगीरथस्य तपः आचरणीयमिति चिन्तनं किमर्थमभवत् ?

४. गङ्गायाः पवित्रतां स्वीयवाक्यैः लिखन्तु ।

५. महता वेगेन प्रवहमाना स्वर्णदी शिवस्य जटाजूटात् विनिर्मुक्ता । यदि शिवः गङ्गाप्रवाहवेगस्य नियन्त्रणं न अकरिष्यत् तर्हि किमभविष्यत् ?

६. ब्रह्मा भगीरथं दृढसङ्कल्प ! इति सम्बोधनं कृतवान् । दृढसङ्कल्पस्य के गुणाः भवन्ति इति लिखन्तु ।

SCERT TELANGANA

## आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. पाठस्य सारांशं स्वीयवाक्यैः लिखन्तु ।

२. बहुविधप्रयत्नान् विधाय सफलतां प्राप्तवन्तम् उद्दिश्य ''भगीरथप्रयत्नं'' कृतवान् इति वदन्ति, किमर्थं तथा वदन्ति?

# IV. पदजालाभिवृद्धिः

## अ) अधः दत्तानां पदानां समानार्थकपदानि लिखन्तु ।

१. शिवः ________ ________ ________

२. गङ्गा ________ ________ ________

३. ऋषिः ________ ________ ________

## आ) अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।

१. भगीरथः स्वपितामहान् पवित्रान् कर्तुं दृढसङ्कल्पं कृतवान् ।

२. देशभक्ताः निर्विरामं श्रमं कृत्वा स्वातन्त्र्यं साधितवन्तः ।

३. चित्रकः महता वेगेन धावति ।

४. मधुमक्षिकाः मधुसङ्ग्रहणाय मुहुर्मुहुः सञ्चरन्ति ।

## इ) अधः दत्तानि पदानि पठन्तु । तत्सम्बद्धपदानि लिखन्तु ।

१. नदी -

२. लोकः -

३. हिमालयः -

४. आश्रमः -

## ई) अधः दत्तानि वाक्यानि पठन्तु । तानि समानार्थकपदैः योजयन्तु ।

| | |
|---|---|
| १. जह्नोः अपत्यं स्त्री | सागरः |
| २. जनकस्य अपत्यं स्त्री | शङ्करः |
| ३. दशरथस्य अपत्यं पुमान् | जाह्नवी |
| ४. भगीरथस्य इयम् | जानकी |
| ५. सगरेभ्यः उद्भूतः इति | भागीरथी |
| ६. शं करोति इति | दाशरथिः |

## V. सर्जनात्मकता

१. ब्रह्मा भगीरथस्य तपसा सन्तुष्टस्सन् तं गङ्गामाराधय इति आदिष्टवान् ।

अमुम् सन्दर्भं सम्भाषणरूपेण लिखन्तु ।

**उदा** - भगीरथः - नमस्कारः!

ब्रह्मा - दृढसङ्कल्प ! अहं सन्तुष्टोऽस्मि ।

भगीरथः - ..................

ब्रह्मा - ................

२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

మానవ జీవితంలో బాల్యం ప్రధానమైనది. బాల్యం నుండి విద్యాసక్తి కలిగినవాడు, దానికోసం ప్రయత్నించేవాడు, విద్యను సాధించేవాడు, విశ్వశ్రేయస్సుకై తాను గడించిన విద్యను ప్రయోగించేవాడు ఉత్తమ విద్యార్థి.

## VI. प्रशंसा

भगीरथः दृढदीक्षया पुनः पुनः प्रयत्नं कृत्वा कार्यसिद्धिं प्राप्तवान् ।

एवं प्रकारेण दृढदीक्षया कार्याणि साधितवतः काँश्चन महात्मनः अधिकृत्य वदन्तु ।

## VII. भाषांशाः

अ) अधः दत्तानि वाक्यानि पठन्तु ।

१. यागरक्षणसमये रामः बालोऽपि राक्षसीं ताटकां हतवान् ।

२. राक्षसः बलिष्ठोऽपि भीत्या पलायनं कृतवान् ।

३. मया सह अग्रजोऽपि आपणम् आगतवान् ।

४. ह्रस्वोऽपि वृक्षः छायां यच्छति ।

**उपरिदत्तेषु वाक्येषु सन्धिपदानि परिशीलयन्तु ।**

| | | | | | | |
|---|---|---|---|---|---|---|
| बालः+ अपि | = | बाल+उ+अपि | = | बालोऽपि | (अः+अ=ओ) |
| बलिष्ठः+ अपि | = | बलिष्ठ+उ+अपि | = | बलिष्ठोऽपि | (अः+अ=ओ) |
| अग्रजः+ अपि | = | अग्रज+उ+अपि | = | अग्रजोऽपि | (अः+अ=ओ) |
| ह्रस्वः+ अपि | = | ह्रस्व+उ+अपि | = | ह्रस्वोऽपि | (अः+अ=ओ) |

**अ + : +अ = उ**

★ **अत्र विसर्गसहितस्य ह्रस्वाकारस्य अकारे परे विसर्गस्य स्थाने उकारः भवति । उकारे कृते गुणसन्धिरवश्यं करणीयः । अकारे परे गुणानन्तरं पूर्वरूपसन्धिरपि कर्तव्यः ।**

★ **अयं च कश्चन विसर्गसन्धेः भेदः ।**

**आ) उपर्युक्तरीत्या अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।**

१. कः + अपि ............................

२. सः + अपि ............................

३. रामः + अपि ............................

४. हंसोऽपि ............................

५. वानरोऽपि ............................

६. अनुजोऽपि ............................

**परियोजनाकार्यम्**

अस्माकं राज्ये कृष्णागोदावरीत्यादिनद्यः सन्ति । तासामुपरि जलबन्धाः निर्मितास्सन्ति । तेषु एकमुद्दिश्य स्फोरकपत्रं लिखन्तु ।

**स्वीयमूल्याङ्कनम्**

| | आम् | न |
|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | ☐ | ☐ |
| २. पाठस्य सारं स्वीयवाक्यैः वक्तुं लेखितुं च शक्नोमि । | ☐ | ☐ |
| ३. भगीरथसदृशान् जनान् उद्दिश्य लेखितुं शक्नोमि । | ☐ | ☐ |
| ४. पाठं सम्भाषणरूपेण लेखितुं शक्नोमि । | ☐ | ☐ |

**अल्पाक्षररमणीयं यः कथयति निश्चितं स वै वाग्मी ।**

SCERT TELANGANA

प्रथमः भागः

# २. आवेदनम्

## पठन्तु, विचिन्त्य वदन्तु

युवकः - हे मित्राणि ! अस्माकम् अपेक्षाः पूरयितुम् वयं बहुवारं संस्थां प्रति विज्ञापनं कृतवन्तः खलु !

मित्राणि - आम् । विज्ञापनपत्राणि, करपत्राणि च अयच्छाम । किन्तु प्रतिस्पन्दः नास्ति ।

युवकः - तर्हि वयमेकमान्दोलनं कुर्मः ।

मित्राणि - कीदृशमान्दोलनम् ?

युवकः - अस्माकं प्रान्ते वाहनानि कान्यपि न चलन्तु । सर्वाण्यपि वाहनानि स्थगयित्वा किमपि कोलाहलं कुर्मः। अस्तु वा ...?

### प्रश्नाः

१. सम्भाषणं कयोः मध्ये चलति?

२. कस्मिन् विषये सम्भाषणं कुर्वन्ति?

३. 'तेषां निर्णयः उचितः न'

इति अहं वदामि भवन्तः किं वदन्ति?

### उद्देश्यम्

★समाजे प्रचलमानस्य प्रमुखविषयस्य प्रस्तुतीकरणेन उचितानुचितनिर्णयाय अवसरप्रदानम् ।

★सर्वकारधनं नाम प्रजाधनमिति तस्य सदुपयोगः करणीयः इति विषये अभिबोधनम् ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



(अमलापुरं नाम ग्रामः । रथ्यायाः समीपे अश्वत्थवृक्षच्छायायां ग्रामाधिकारी अन्ये त्रिचतुराः जनाः उपविष्टाः सन्ति । अत्रान्तरे बस्‌यानचालकः तत्र आगत्य पत्रमेकं ग्रामाधिकारिणः हस्ते निक्षिप्य गतवान् । तदा कश्चन पौरः ग्रामाधिकारिणं तत्पत्रं किमिति पृष्टवान् । ग्रामाधिकारी च 'इदं करपत्रम्' इत्युक्तवान् । तदा तत्रस्थजनाः 'उच्चैः पठन्तु' इति पृष्टवन्तः । ग्रामाधिकारी करपत्रम् पठितुमारब्धवान् ।)

*************



हे जनाः! मां स्मरन्ति वा । भवताम् इतरग्रामान् प्रति नयनम्, अन्यप्रदेशेभ्यः अत्र आनयनम् इत्यादि कर्म अहमेव करोमि । भवताम् अपत्यानां पाठशालाः प्रति कलाशालाः च प्रति नयनम्, आनयनम् , ज्वरार्तानां जनानां चिकित्सालयं प्रति नयनं, स्वस्थानं प्रति पुनरानयनं मया एव क्रियते । सर्वकालसर्वावस्थासु च मम उपकारः भवद्भिः सर्वैः स्वीक्रियते । मां स्मरन्ति वा ? अहमेव बस्यानम् ।

किन्तु मम वेदना युष्माभिः न ज्ञायते । यदा विद्यार्थिनाम् उद्योगिनां श्रामिकाणां च सर्वकारं प्रति असन्तुष्टिः जायते तदा भवन्तः सर्वे मम ध्वंसं कर्तुं प्रयतन्ते । कदाचित् मां दग्धमपि कुर्वन्ति । मया कृतं पापं किम् ? मत्कारणात् भवतां न कापि हानिः भवति । अहम् अङ्कितभावेन निर्विरामं मम कार्यं करोमि । मां दृष्ट्वा भवतां मनसि किमर्थं द्वेषः सञ्जायते ?

अन्यच्च मां दग्ध्वा मम काचफलकानि नाशयित्वा भवद्भिः अनुभूयमानः आनन्दः क्षणिकः एव । मम विध्वंसनेन, दाहेन च या आर्थिकहानिः भवति सा भवद्भिरेव पूरणीया खलु ! मम दाहेन जाताम् आर्थिकहानिं पूरयितुं भवतां यात्रामूल्यम् अधिकतरम्, अधिकतमं च क्रियते । मम सेवाकार्यमपि स्थगितं भवति । मम विनाशनेन भवताम् उद्यमस्य साफल्यं न सिद्ध्यति ।

अतः हे पौराः! मम रक्षणेन भवतामपि रक्षणं भवति । चिन्तयन्तु, कृपया मां दग्धुं यत्नान् मा कुर्वन्तु । भवतां कृते सहस्रनमस्काराः ।

**इत्थम् अश्रुनयानाभ्यां,**
**भवदीयं बस्यानम्,**
**राज्यपरिवहनसंस्था, तेलंगाण ।**

बस् यानस्य करपत्रं पठित्वा ते चिन्तामग्नाः, परस्परं चर्चामग्नाः च अभवन् । अन्ततः ग्रामाधिकारी तान् सान्त्वयन् इत्थम् उक्तवान् । "अस्माकं मतानुसारेण इतः परं यः कोऽपि बस्यानस्य ध्वंसनं, दहनं कर्तुं वा प्रयत्नं मा करोतु । नोचेत् अस्माकं क्लेशाः अधिकाः भवन्ति । यथा वृक्षः अस्माभिः रक्षणीयः तथा तैलवाहनमपि । अन्यच्च, यदा अस्माभिः स्थगनबन्धनरूपेण उद्यमः क्रियते, तदा सामान्यजीवनं स्थगितं भवति । कर्मचारिणाम् उपाध्यवकाशाः लुप्ताः भवन्ति । शिलाशकलैः गृहाणां, कार्यालयानां कर्मागाराणाञ्च ताडनेन ते भ्रष्टाः भवन्ति । जनजीवनं विघटितं भवति । प्रयोजनं तु किमपि न भवति । उद्यमाः शान्तियुक्ताः भवेयुः । जनाः कोपवशाः न भवेयुः । एते विषयाः सर्वैरपि ज्ञातव्याः।"

सर्वे ग्रामाधिकारिणा उक्तान् अंशान् अङ्गीकुर्वन्तः "वयमितः परं बस्यानस्य ध्वंसनं न कुर्मः अपि तु रक्षणं कुर्मः" इति प्रतिज्ञां विधाय सर्वत्र एतस्य विषयस्य प्रचारः करणीयः इति निश्चितवन्तः।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) जनव्यवहारे करपत्रमतिरिच्य विद्यमानान् प्रचारमाध्यमान् उद्दिश्य वदन्तु ।

आ) छात्रैः कृतैः विध्वंसकार्यैः सर्वकारधनहानिः अतीव भवति खलु । तन्निवारणाय किं करणीयमिति वदन्तु ।

इ) करपत्रप्रसारेण प्रयोजनानि वदन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठे विद्यमानानां सर्वनामशब्दरूपाणामधः रेखाङ्कनं कुर्वन्तु ।

आ) अधः दत्तानां वाक्यानां समानार्थकानि वाक्यानि पाठे अन्विष्य लिखन्तु ।

౧. ఓ జనులారా ! నన్ను స్మరించుచున్నారా !

౨. సర్వకాలసర్వావస్థలయందు నా సేవలను మీరు స్వీకరించుచున్నారు.

౩. ఎల్లప్పుడు అంకితభావంతో పనిచేయుచున్నాను.

౪. నన్ను నాశనం చేయడం ద్వారా మీ ఉద్యమాలు ఫలించవు.

౫. నన్ను తగులబెట్టుటకు ప్రయత్నించవద్దు.



SCERT TELANGANA

### इ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

अहमस्मि मार्गः । मम आपदां का गणना ? मम उपरि मोटर् यानानि, बस् यानानि, द्विचक्रिकाः, त्रिचक्रिकाः, अपराणि च विविधानि वाहनानि यान्ति, आयान्ति च । कथं ते ममोपरि प्रहारं कुर्वन्ति ? माम् उभयतः स्थिताः वृक्षाः वाहनानां धूमेन क्लेशम् अनुभवन्ति । एतत् वीक्ष्य ममापि दुःखं भवति । तेषां कष्टं मम कष्टमेव ।

१. एतानि वेदनापूर्णवचनानि कस्य ?

२. वाहनानि कस्य उपरि यान्ति ?

३. वृक्षाः केन क्लेशम् अनुभवन्ति ?

४. कानि कानि वाहनानि मार्गस्य उपरि प्रहारं कुर्वन्ति ?

५. किं वीक्ष्य मार्गः दुःखम् अनुभवति ?

### ई) अधः दत्तानि पदानि क्रमशः संयोज्य पूर्णं वाक्यं लिखन्तु ।

१. आगत्य, एकम्, ग्रामाधिकारिणः, गतवान्, पत्रम्, हस्ते, बस्यानचालकः, निक्षिप्य

२. अधिकं, दहति, युष्माकं, तदा, यत्, भविष्यति, प्रयाणे, स्वीक्रियते, मूल्यं, यदा, तत्, माम्

### उ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. कः कस्मै करपत्रं दत्तवान् ?

२. करपत्रे कः विषयः वर्तते ?

३. बस्यानं पौरानुद्दिश्य किमवोचत् ?

४. बस्यानं स्वकृत्यं कथं निर्वहति ?

५. बस्यानं कान् उपकरोति ?

६. बस्यानस्य क्लेशः कः?

## III. स्वीयरचना

### अ) अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।

१. करपत्रस्य विशेषतां लिखन्तु ।

२. भवन्तः बस्यानेन प्रयाणं कृतवन्तः स्युः। प्रयाणस्य एकमनुभवं स्वीयवाक्यैः लिखन्तु ।

३. बस्यानस्य रक्षणविषये द्वित्राः सूचनाः लिखन्तु ।



SCERT TELANGANA

## आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. लोके बस्यानस्य अभावे जनजीवनं कीदृशं भवतीति लिखन्तु ।

२. बस्यानस्य वेदनायाः विषये भवदीयम् अभिप्रायं दशवाक्यैः लिखन्तु ।

# IV. पदजालाभिवृद्धिः

## अ) जलस्थलवायुमार्गाणां यातायातसाधनानां नामानि पट्टिकारूपेण लिखन्तु ।

| जलमार्गः | स्थलमार्गः | वायुमार्गः |
|---|---|---|
| | | |

## आ) यथोचितं योजयन्तु ।

| | |
|---|---|
| स्लेड्ज् | युद्धरङ्गे, जनानां यातायातार्थम् । |
| उष्ट्रः | वस्त्रक्षालनस्थानं प्रति भारवाहनार्थम् । |
| गर्दभः | क्षेत्रकर्षणार्थम् । |
| अश्वः | मरुभूमौ यातायातार्थम् । |
| वृषभः | हिमप्रान्ते प्रयाणार्थम् । |

## इ) अधः दत्ते पदे प्रयुज्य स्वीयवाक्यानि रचयन्तु ।

१. ग्रामाधिकारी, जनसेवा

२. धनं, प्रवेशपत्रसङ्ग्राहकः

३. ग्रामः, कृषिक्षेत्राणि

४. विषयविनिमयः, करपत्रम्

५. अनारोग्यं, वेदना

# V. सर्जनात्मकता

## १. रेल् यानस्य विषये करपत्रमेकं लिखन्तु ।

## २. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

మత్స్యదేశమునకు రాజు విరాటుడు. పాండవులు అజ్ఞాతవాససమయమందు విరాటరాజు యొక్క ఆస్థానమందు మారువేషములలో నివసించిరి. త్రిగర్తదేశము యొక్క రాజు సుశర్మ విరాటరాజు యొక్క గోసంపదను అపహరించుటకు అక్కడకు వచ్చెను. విరాటుడు యుద్ధమునకు సన్నద్ధుడయ్యెను.

SCERT TELANGANA

## VI. प्रशंसा

**एतादृशं करपत्रं समाजे प्रेरकरूपेण भवति । समाजे प्रेरणा कैः भवतीति सूचयन्तु ।**

## VII. भाषांशाः

**अ) अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितानि पदानि अवगच्छन्तु ।**

१. छात्रः पाठं लिखति, भावं चिन्तयति ।
छात्रः पाठं लिखन् भावं चिन्तयति ।

२. वृद्धः मार्गं पश्यति, दण्डसाहाय्येन गच्छति ।
वृद्धः मार्गं पश्यन् दण्डसाहाय्येन गच्छति ।

३. नर्तकी नृत्यति, गीतं गायति ।
नर्तकी नृत्यन्ती गीतं गायति ।

४. विजया गायति अभिनयं करोति ।
विजया गायन्ती अभिनयं करोति ।

५. विमानं गच्छति, शब्दं करोति ।
विमानं गच्छत् शब्दं करोति ।

६. यन्त्रं चलति, कार्यं करोति ।
यन्त्रं चलत् कार्यं करोति ।

**एतेषु वाक्येषु रेखाङ्कितानि पदानि लिखन्, पश्यन्, नृत्यन्ती, गायन्ती, गच्छत्, चलत् इति पदानि शतृप्रत्ययान्तानि ।**

★ **वर्तमानकालार्थे परस्मैपदिधातूनां शतृप्रत्ययः भवति । शतृ इत्यत्र अत् इति भागः अवशिष्यते ।**

**आ) उपरितनानाम् उदाहरणानाम् अनुसारं शतृप्रत्ययान्तरूपाणि उपयुज्य अधः दत्तानि वाक्यानि परिवर्तयन्तु ।**

१. शुनकः भषति, वेगेन धावति ।

२. युवकः धावति, इतस्ततः पश्यति ।

३. भक्तः डमरुकं वादयति, वेदिकायां नृत्यति ।

४. महिला मालां रचयति, संस्कृतसम्भाषणं करोति ।

५. ललिता श्लोकान् पठति, श्रद्धया देवं नमति ।

SCERT TELANGANA

## इ. शतृप्रत्ययान्तस्य रूपाणि त्रिषु लिङ्गेषु लिखन्तु ।

| | | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| उदा- | शृणोति | शृण्वन् | शृण्वती | शृण्वत् |
| | पश्यति | | | |
| | त्यजति | | | |
| | पृच्छति | | | |
| | चिन्तयति | | | |
| | नमति | | | |

### परियोजनाकार्यम्

आन्ध्रप्रदेशसर्वकारस्य परिवहनव्यवस्था अस्ति । तत्र डीलक्स्, एक्स्प्रेस्, आर्डिनरि इति बहुविधाः बस्यानप्रकाराः सन्ति । बस्यानानां प्रकारान्, तेषु उपलभ्यमानानि सौविध्यानि च पट्टिकारूपेण लिखन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | ☐ | ☐ |
| २. बस्यानस्य उपयोगाः ज्ञाताः। तेषां विध्वंसनेन जायमानाः हानीः वक्तुं शक्नोमि । | ☐ | ☐ |
| ३. मया सर्वेषां शब्दानाम् अर्थाः ज्ञाताः। तान् उपयोक्तुं शक्नोमि । | ☐ | ☐ |
| ४. मया करपत्रलेखनक्रमः ज्ञातः, एकं करपत्रं लेखितुं शक्नोमि । | ☐ | ☐ |

**सोत्साहानां नास्त्यसाध्यं नराणाम् ।**

SCERT TELANGANA

प्रथमः भागः

# ३. प्रतिमाराधनम्

## पठन्तु, विचिन्त्य वदन्तु

ललिता - सतीश ! ह्यः मम पिता श्रीकृष्णमुद्दिश्य एकं श्लोकं पठितवान् । सः श्लोकः मम कण्ठस्थः अभवत् ।

सतीशः - कः सः श्लोकः? पठतु ।

ललिता - **करारविन्देन पदारविन्दं, मुखारविन्दे विनिवेशयन्तम् ।**
**वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥**

सतीशः - अद्भुतोऽयं श्लोकः। किन्तु अस्मिन् श्लोके किं वर्णितमस्ति ?

ललिता - अस्मिन् बालकृष्णस्वरूपं वर्णितमस्ति ।

सतीशः - मम सन्देहस्तु प्रतिमासु भगवान् विद्यते वा न वा इति ?

ललिता - एतस्मिन् विषये एव अद्य अध्यापकः पाठं बोधयिष्यति ।

## प्रश्नाः

१. श्रीकृष्णः कीदृशः भवति ?
२. श्रीकृष्णः एवं प्रकारेण भवतीति कथं जानन्ति ?
३. देवालये देवः केन रूपेण भवति ?

### उद्देश्यम्

* छात्रेषु संस्कृतसम्भाषणकौशलस्य विकासः ।
* महापुरुषाणां जीवनेषु घटिताभिः वास्तविकघटनाभिः प्रेरणम् ।
* साकारे भगवति विश्वासजननम्, रूपतोऽपि भगवन्तं प्रार्थयेत् इति वैखर्याः विकासः।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

(मैसूरुनगरम् । आल्वार् महाराजस्य संस्थानम् । महाराजः, मन्त्री च राजास्थाने उपविष्टौ आस्ताम् । तस्मिन् समये एकः भटः आगतः।)

भटः - (प्रविश्य) जयतु जयतु महाराजः।

अमात्यः - (भटमुद्दिश्य) किमर्थमागतोऽसि ?

भटः - (सविनयं) मन्त्रिवर्य ! एकः काषायाम्बरधारी, स्फुरद्रूपी, प्रसन्नवदनश्च योगिवर्यः द्वारे तिष्ठति । आज्ञा दीयते चेत् अन्तः प्रवेशयामि ।

अमात्यः - (साश्चर्यं, ससम्भ्रमं च) योगिवर्यः आगतः? अहं स्वयमेव तस्य आह्वानं करोमि । (इत्युक्त्वा बहिः गत्वा योगिना सह अन्तः प्राविशत्) स्वागतमार्षधर्मप्रचारकेभ्यः, श्रीरामकृष्णपरमहंसशिष्याग्रगण्येभ्यः, परिव्राजकाचार्येभ्यः श्रीविवेकानन्दमहोदयेभ्यः।

विवेकानन्दः - शुभाशीः। (राजानमुद्दिश्य) राजन् ! अपि कुशलं तव ?

राजा - कुशलम् भोः! भवान् अधीतशास्त्रः, दृढकायः, महाबलवानिव दृश्यते । किं भिक्षार्थम् आगतोऽसि ?

विवेकानन्दः - राजन् ! नाहं भिक्षार्थमागतः। मम तु तृणं, मेरुश्च समानौ। अहं धनार्थं च न आगतवान्। समाजश्रेयः राज्ञः कर्तव्यम् । राजानः यदा स्वस्वकर्मसु विमूढाः भवन्ति, तदा तेषां सन्मार्गे प्रवर्तनम् अस्माकं कार्यम् ।



अमात्यः - योगिवर्यः साक्षात् भगवत्स्वरूपः खलु !

राजा - "भगवान् निराकारः इति शास्त्रेषु विद्यते। जनाः मूर्खतया प्रतिमां पूजयन्ति, पत्रपुष्पफलतोयादीनि नाशयन्ति । एतत् मह्यं न रोचते । निर्गुणस्य, निराकारस्य च तस्य कुतः आराधनम् ? यदि देवः विद्यते तर्हि सः स्वयमेव प्रत्यक्षो भवति । प्रत्यक्षः न भवति चेत् सः नास्तीत्येवार्थः"।

विवेकानन्दः - राजन् ! भवता कालिदासरचितकालिकास्तुतिपरकः 'चतुर्भुजे चन्द्रकलावतंसे' इति श्लोकः ज्ञायते वा ।

राजा - मया श्रुतः।

विवेकानन्दः - समीचीनम् । तथैव महेश्वरस्तुतिरूपः 'नागेन्द्रहाराय त्रिलोचनाय' इति श्लोकः, श्रीमहाविष्णोः स्तुतिरूपः 'सशङ्खचक्रं सकिरीटकुण्डलम्' इति श्लोकश्च ज्ञायते इति मन्ये ।

राजा - श्रीमहाविष्णुस्तुतिपरः श्लोकः गीतायां विद्यते। अहं सम्यक् जानामि ।

विवेकानन्दः - तर्हि ते श्लोकाः किं सूचयन्ति ?

राजा - भगवान् साकारः इति सूचयन्ति । अथ किम् ?



SCERT TELANGANA

विवेकानन्दः - शिल्पी, चित्रकारश्च प्रथमतः शिल्पं, चित्रं वा दृष्ट्वा चित्रीकरोति । एषा प्रथमदशा। अनन्तरम् ऊहानुगुणं शिल्पानि चित्राणि वा चित्रीकुर्वन्ति । पश्चात् अनुभवम् आधारीकृत्य स्वयमेव अद्भुतानि शिल्पानि, चित्राणि च निर्मान्ति । तथैव प्रतिमाराधनम् इति प्राथमिकदशाम् उत्तीर्य, सर्वासु प्रतिमासु स्थिताः देवताः दृष्ट्वा तासु इष्टदेवतास्वरूपज्ञानप्राप्तिः इति द्वितीयदशां प्राप्नुवन्ति भक्ताः। अनन्तरं भगवतः निराकारस्वरूपज्ञानम् अस्माकम् आवश्यकं भवति । एतादृशी भावना प्रत्येकं व्यक्तेः साधनस्तरम् आधारीकृत्य तिष्ठति ।

राजा - अस्ति नास्तीति विचिकित्सायां मनः डोलायमानं भवति । मम सन्देहस्तु मृत्, कर्गदं, पाषाणः काष्ठं च कथं भगवान् भवतीति ?

विवेकानन्दः - (भित्तिकायां चित्रं दृष्ट्वा) राजन् ! तत् कस्य चित्रम् ?

राजा - तत् ममैव ।

विवेकानन्दः - अत्यन्तं सुन्दरम् अस्ति । (भृत्यमुद्दिश्य) तत् आनीयताम् । (भटः तत् चित्रं विवेकानन्दस्य समीपम् आनयति) अस्मिन् निष्ठीवनं कुरु । (भटः भयं प्रकटयति)

राजा - (साक्रोशं) किम् उच्यते भवता ?

विवेकानन्दः - अस्मिन् कागदे निष्ठीवनं कुरु इति ।

राजा - एतत् तु न कागदम् । मम प्रतिरूपम् ।

विवेकानन्दः - राजन् ! चित्रपटस्य प्राणाः न सन्ति, तथाऽपि भवतां सेवकाः एतत् चित्रं गन्धमाल्यादिभिः पूजयन्ति । भवतां प्रतिरूपमिति भावयन्ति । 'यादृशी भावना यस्य सिद्धिर्भवति तादृशी' इति उक्तिः भवता ज्ञायते खलु ! जनाः भगवन्तं मूर्तिमन्तं भावयन्ति, पूजयन्ति च । मृत्, कागदं, काष्ठं, वृक्षः,पाषाणः वा सर्वेऽपि भगवतः स्वरूपाः एव । एतत् ज्ञापयितुमेव तव चित्रपटम् आनायितम् ।

राजा - क्षम्यतां मम अपराधः। अज्ञानान्धकारेण मया दैवदूषणं कृतम् । भगवान् तु सर्वत्र विद्यते । इतः परं भगवद्भक्तिप्रचारेण जन्मसार्थक्यं प्राप्नोमि ।

विवेकानन्दः - शुभं भूयात् । अहं गमिष्यामि । (इत्युक्त्वा बहिः निर्गच्छति ।)

SCERT TELANGANA

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) भगवन्तं केन प्रकारेण आराधयितुं शक्नुमः ।

आ) दैवाराधनं नाम किम्?

इ) भवान् कीदृशं देवम् इच्छति ? किमर्थम् ?

ई) एतादृशवास्तविक्यः अविस्मरणीयघटनाः भवतः जीवने प्रवृत्ताः चेत् वदन्तु ?

उ) "प्रतिमाराधनम्" उचितं वा ? न वा ? इति अंशमुद्दिश्य चर्चां कुर्वन्तु ?

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठस्थानां सन्धिपदानामधः रेखाङ्कनं कुर्वन्तु ।

आ) अधः दत्तानां वाक्यानां समानार्थकवाक्यानि पाठात् चित्वा लिखन्तु ।

1. ఎందుకు వచ్చితివి?
2. నాకు గడ్డి, మేరుపర్వతము రెండూ సమానమే.
3. మహావిష్ణువును స్తుతించు ఈ శ్లోకము గీతలో ఉన్నది.
4. ఈ చిత్రము ఎవరిది ?
5. ఇది కాగితము కాదు. నా ప్రతిరూపమే.

इ) अधः दत्तेषु वाक्येषु दोषान् ज्ञात्वा शुद्धीकुर्वन्तु ।

१. महाराजस्य संस्थानं विजयनगरम् ।
२. योगिवर्यः क्रोधवदनः आसीत् ।
३. अमात्यः अधीतशास्त्रज्ञः।
४. भगवान् निराकारः इति भटस्य अभिप्रायः आसीत् ।
५. भटः चित्रपटे निष्ठीवनं कृतवान् ।

ई) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

'महाशिवरात्रिः' भगवतः ईश्वरस्य अत्यन्तं प्रीतिकरः दिवसः। शैवपर्वदिनेषु शिवरात्रिः अन्यतमा, विशिष्टा च। साकारनिराकारयोः चिह्नमेव शिवलिङ्गम्। महता तेजसा भासमानं शिवलिङ्गं जगत्सर्वं स्वस्मिन् लीनं करोति । महादेवः शिवः माघकृष्णचतुर्दश्याम् अर्धरात्रे लिङ्गरूपेण आविरभूत् । समस्तलोकानां मङ्गलकरी सा रात्रिः महाशिवरात्रिरूपेण पुरस्क्रियते । भक्ताः अनन्यचित्तास्सन्तः अस्मिन् पर्वदिने शिवलिङ्गं पूजयन्ति ।

१. कस्य महाशिवरात्रिः अत्यन्तं प्रीतिकरी ?

२. कदा महाशिवरात्रिपर्वदिनम् आयोज्यते ?

३. कयोः चिह्नं शिवलिङ्गम् ?

४. समस्तलोकानां कीदृशी महाशिवरात्रिः ?

**उ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. राज्ञः नाम किम् ?

२. साधूनामावश्यकता कदा भवति ?

३. अमात्यः विवेकानन्दं कैः शब्दैः सम्बोधितवान् ?

४. राज्ञः मनः परिवर्तनं कथमभवत् ?

५. विवेकानन्दः भटं किम् आदिष्टवान् ? किमर्थम् ?

## III. स्वीयरचना

**अ) अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. साधूनां वस्त्रधारणं कथं भवतीति लिखन्तु ।

२. भक्ताः देवान् कैः वस्तुभिः पूजयन्तीति लिखन्तु ।

३. विवेकानन्दम् उद्दिश्य त्रीणि वाक्यानि लिखन्तु ।

४. ''मम तु तृणः मेरुश्च समानौ इति'' विवेकानन्दः उक्तवान् खलु ! अस्य वाक्यस्य भावं लिखन्तु ।

**आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. कथायाः सारांशं स्वीयवाक्यैः लिखन्तु ।

२. जनाः किमर्थं देवालयं गच्छन्ति, किमर्थञ्च देवान् पूजयन्ति ?

## IV. पदजालाभिवृद्धिः

**अ) अधः दत्तानां पदानां विरुद्धार्थकानि पदानि पाठात् चित्वा वाक्यानि लिखन्तु ।**

| | | | |
|---|---|---|---|
| क्रुद्धः | X | शान्तः | **उदा** - रामः शान्तस्वरूपः। |
| प्रसन्नः | X | | .............................. |
| बहिः | X | | .............................. |
| बलवान् | X | | .............................. |
| समानः | X | | .............................. |

**आ) अधः दत्तानां पदानां समानार्थकपदानि पाठात् चित्वा तानि उपयुज्य वाक्यानि लिखन्तु।**

**उदा** - योगिवर्यः - अरविन्दः कश्चन योगिवर्यः।

| | | |
|---|---|---|
| १. मन्त्री | २. सेवकः | ३. जलं |
| ४. पिता | ५. शिला | ६. दोषः |



SCERT TELANGANA

इ) अधः दत्तानि पदानि उपयुज्य रिक्तस्थानानि पूरयन्तु ।

| तृणं | निराकारः | प्रतिरूपं | स्फुरद्रूपी |
|---|---|---|---|

अ. योगिवर्यः ...............

आ. मम तु ..................मेरुश्च समानौ एव ।

इ. भगवान् ................ इति शास्त्रेषु विद्यते ।

ई. एतत् कर्गदं नास्ति मम......... एव ।

## V. सर्जनात्मकता

अ) पाठं कथारूपेण लिखन्तु ।

आ) अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु

వివేకానందుని అసలుపేరు నరేంద్రుడు. తల్లి భువనేశ్వరీ దేవి. అతడు తల్లి దగ్గర రామాయణ-మహాభారతభాగవతకథలు నేర్చుకొనెను. శ్రీరామకృష్ణపరమహంస వంటి యోగిపుంగవుని సాంగత్యం వివేకానందునికి లభించెను. అతనికి శిష్యుడిగా ఉండి వివేకానందుడు భగవత్-సాక్షాత్కారమును పొందెను. తదుపరి అమెరికాదేశమున హిందుప్రచారము చేసెను.

## VI. प्रशंसा

"साधूनां दर्शनं पुण्यं, तीर्थभूतानि साधवः" इति ज्ञात्वा तेषां महत्त्वं वदन्तु ।

## VII. भाषांशाः

अ) अधः दत्तेषु वाक्येषु रेखाङ्कितपदानि पठन्तु । अवगच्छन्तु ।

१. तदा त्वं कुत्र गतोऽसि ?

२. त्वं कदा आगतोऽसि ?

३. एषः कदा मिलितः?

४. अहं सर्वदा सत्यं वदामि ।

५. भारती एकदा नृत्यं कृतवती ।

६. अहं तस्याः नृत्यं न दृष्टवान् ?

७. कदापि असत्यं मा वद ।

★ उपरि दत्तानि रेखाङ्कितानि पदानि तदा, कदा, सर्वदा, एकदा, न, मा इत्यादीनि त्रिषु लिङ्गेषु, सर्वासु विभक्तिषु, सर्वेषु वचनेषु समानरूपाणि । एतानि एव **अव्ययपदानि ।**

SCERT TELANGANA

अधः दत्तं श्लोकं पठन्तु । अव्ययं नाम किमिति अवगच्छन्तु ।

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**
**वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥**

★ त्रिषु लिङ्गेषु, सप्तविभक्तिषु, त्रिषु वचनेषु यत् परिवर्तनं न प्राप्नोति तत् अव्ययम् ।

आ) कोष्ठकस्थानि अव्ययपदानि प्रयुज्य रिक्तस्थानानि पूरयन्तु ।

| |
|---|
| अद्यप्रभृति |
| प्रातः |
| उपरि |
| न |
| एव |
| ह्यः |

१. ..................... अहं पाठम् अपठम् ।

२. सीता ................ आपणं गतवती ।

३. सिंहः ................ मृगराजः इति प्रकीर्त्यते ।

४. अहं ......... परिहासं ............करोमि ।

५. षण्मुखः वृक्षस्य ............वर्तते ।

(२) अ. अथः दत्तानि वाक्यानि पठन्तु ।

१. वाल्मीकिः महाकविरिति प्रसिद्धः ।

२. मम गृहे मिष्टान्नम् अतिथिभिर्भक्षितम् ।

३. भानुरयं लोकाय तेजः ददाति ।

४. प्रतिदिनं मम गृहसमीपं धेनुरागच्छति ।

उपरि दत्तेषु वाक्येषु रेखाङ्कितपदानि परिशीलयन्तु ।

१. महाकविः + इति = महाकविरिति । (इः+इ) (ः = र्)

- अस्मिन् वाक्ये विसर्गसहितस्य इकारान्तपदस्य इकारे परे (इः+ इ) विसर्गस्य स्थाने रेफः भवति ।

★ **अनेन ज्ञायते यत् अ आ इत्येतौ स्वरौ वर्जयित्वा स्वरात् परस्य विसर्गस्य अन्ये अचि परे रेफादेशो भवतीति ।**

२. अतिथिभिः + भक्षितं = अतिथिभिर्भक्षितम् (इः + भ) (ः = र्)

- अस्मिन् वाक्ये विसर्गसहितस्य इकारान्तपदस्य मृदुव्यञ्जने परे (इः+ भ) विसर्गस्य स्थाने रेफः भवति ।

**अ आ इत्येतौ विना स्वराः + ः + (स्वराः मृदुव्यञ्जनानि) = र्**

★ **अयं च कश्चन विसर्गसन्धेः भेदः ।**



SCERT TELANGANA

३. भानुः + अयम् = भानुरयम् ।  (उः + अ) (ः = र् )

४. धेनुः + आगच्छति = धेनुरागच्छति । (उः + आ) (ः = र् )

★ **उपरि उदाहरणयोः अ, आ स्वरौ परावपि रेफादेशः भवति ।**

★ **अव्ययस्य विसर्गस्य स्वरे परे मृदुव्यञ्जनेषु परेषु च रेफादेशः भवति ।**

| | | | | | |
|---|---|---|---|---|---|
| **उदा** - | पुनः | + | अत्र | = | पुनरत्र |
| | प्रातः | + | एव | = | प्रातरेव |
| | प्रातः | + | गच्छति | = | प्रातर्गच्छति |

## आ) अधः दत्तानि सन्धिकार्याणि कुर्वन्तु ।

### १) सन्धिं कुर्वन्तु ।

भानुः + असौ =

एतैः + भक्षितम् =

मुनिः + इति =

पुनः + अपि =

### २) विसन्धिं कुर्वन्तु ।

१. पितुरिति ________

२. तैरागतम् ________

३. भानुरिति ________

४. शत्रुरिति ________

**परियोजनाकार्यम्**

रामकृष्णपरमहंसः, विवेकानन्दः, इत्यनयोः जीवनचरितं पृष्ठद्वयेन विलिख्य प्रदर्शयन्तु ।

**स्वीयमूल्याङ्कनम्**

| | आम् | न |
|---|---|---|
| १. पाठ्यांशं स्वीयवक्यैः वक्तुं शक्नोमि । | | |
| २. कठिनशब्दानामर्थाः ज्ञाताः। तान् प्रयोक्तुं शक्नोमि । | | |
| ३. विवेकानन्दस्य विषये दशवाक्यानि लेखितुं शक्नोमि । | | |
| ४. पाठं कथारूपेण लेखितुं शक्नोमि । | | |

**अनिर्वेदः श्रियो मूलं लाभस्य च शुभस्य च ।**

SCERT TELANGANA

पठन्तु - नन्दन्तु

# वाचः व्रणः

प्रथमः भागः

रामदासः कश्चन निर्धनः। कदाचित् तस्य पुत्र्याः विवाहनिर्वर्तनार्थं रामदासस्य समीपे अल्पमपि धनं न असीत् । कदाचित् सः नगरमार्गेण गच्छन् श्रान्तः सन् कस्यचित् सरोवरस्य तटे शयनं कृतवान् । अचिरात् एव कश्चन सिंहः तत्समीपम् आगतवान् । तं सिंह दृष्ट्वा रामदासः नितरां भीतः।

तदा सिंहः अवदत् - ''भोः अलं भयेन । अहं भवतः कमपि अपकारं न करिष्यामि । भवतः मुखं किमर्थं म्लानम् अस्ति ?'' इति ।



रामदासः किञ्चित् धैर्यं प्राप्य अश्रूणि स्रावयन् एव स्वव्यथां श्रावितवान् । तदा सिंहः तस्मै प्रभूतं धनं यच्छन् उक्तवान् - ''भवान् एतेन धनेन पुत्र्याः विवाहं वैभवेन निर्वर्तयतु । विवाहाय मामपि निमन्त्रयतु । विवाहदिने अहम् उपस्थितः भविष्यामि'' इति ।

ग्रामं गतः रामदासः विवाहमुहूर्तं निश्चित्य सिंहं निमन्त्रितवान् । विवाहदिने सिंहः उपस्थितः। वरयात्रा आगता । वरपक्षीयाः गृहपरिसरे कमपि दुर्गन्धम् अनुभूय रामदासं दुर्गन्धस्य कारणम् अपृच्छन् । तदा रामदासः उक्तवान् - ''गृहे कश्चन मूषकः मृतः अस्ति इति भाति'' इति ।

एतत् सम्भाषणं श्रुत्वा सिंहः महत् दुःखं प्राप्तवान् । विवाहः निर्विघ्नं सम्पन्नः। सिंहः यदा प्रस्थितः तदा रामदासः उक्तवान् - ''आर्य ! भवता महान् एव उपकारः कृतः । एतस्मात् ऋणात् मुक्तिः कथम् इत्येव मया न ज्ञायते'' इति ।

तदा सिंहः अवदत् - ''भोः मम शरीरे कुठारेण प्रहारं करोतु, येन एषः दिवसः मम स्मरणयोग्यः भवेत्'' इति ।

''उपकृतवन्तं भवन्तं कथम् अहं कुठारेण प्रहर्तुम् अर्हेयम् ?'' इति आश्चर्येण अपृच्छत् रामदासः ।

''भवता कुठारेण प्रहारः करणीयः एव । यदि भवान् कुठारेण प्रहारं न कुर्यात् तर्हि, अहं भवन्तं खादिष्यामि'' इति अवदत् सिंहः। रामदासः अनन्यगतिकः भूत्वा सिंहस्य स्कन्धे कुठारेण आघातं कृतवान् । सिंह ततः निर्गतः।

अग्रे कदाचित् रामदासः पुनरपि धनस्य आवश्यकताम् अनुभवन् तस्य एव सरोवरस्य तटे उपविष्टवान् । किञ्चित्कालानन्तरं सिंहः जलं पातुं सरोवरतटं प्रति आगच्छत् । तदा रामदासः पुनः स्वस्य व्यथां तं श्रावितवान्, साहाय्यं प्रार्थितवान् च । सिंहः अवदत् - ''भोः रामदास ! त्वं यत्र कुठारेण आघातं कृतवान् आसीः तत्र किम् इदानीम् आघातचिह्नं दृश्यते ? कृपया दृष्ट्वा वद'' इति ।

रामदासेन सिंहस्य शरीरं परीक्षितम् । किन्तु कुत्रापि क्षतचिह्नं न दृष्टम् । तदा सिंहः उक्तवान् - ''भोः! मनसि जातम् आघातचिह्नं तु समयेन अपगतं न भविष्यति । त्वं स्वपुत्रीविवाहदिने मां मृतं मूषकम् उक्त्वा मम अपमानं कृतवान् आसीः। त्वं मैत्रीयोग्यः न । अतः अहं तव साहाय्यं न करिष्यामि। निर्गच्छ इतः'' इति ।

द्वितीयः भागः

# ४. विश्वेश्वरय्यः

## पठन्तु, विचिन्त्य वदन्तु

भारतदेशे बहुत्र जलाभावः अस्ति । क्वचित् नदीजलं समुद्रे मेलनेन वृथैव भवति । जलस्य रक्षणाभावेन जलसमस्या तीव्रतरा भविष्यति । जलाभावेन बहुविधसमस्याः उत्पन्नाः भविष्यन्ति । विद्युतः पेयजलस्य च अभावः भविष्यति । कृषिकार्यार्थं जलस्य न्यूनता च भविष्यति । अतः विविधोपायैः जलं संरक्षणीयं तस्य सद्विनियोगश्च करणीयः ।

## प्रश्नाः

१. उपरि दत्तः अनुच्छेदः किमुद्दिश्य वदति ?

२. जलसमस्या किमर्थं भवति ?

३. जलं व्यर्थं न स्यात् । तदर्थं किं करणीयम् ?

### उद्देश्यम्

* महतां पुरुषाणां जीवनशैल्याः अवगमनपुरस्सरम् आदर्शचरित्रनिर्माणाय प्रेरणाप्रदानम् ।
* विश्वेश्वरय्यस्य चरित्रवैशिष्ट्यस्य अभिबोधनम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



आङ्ग्लेयानां पालने अस्माकं भारतदेशस्य स्थितिः दुर्भरा आसीत्। जात्यहङ्कारपूरिताः ते अस्मान् सर्वदा, सर्वथा च पीडयन्ति स्म । अस्माकं तु वृत्तिविद्यासु प्रवेशः एव दुर्लभः आसीत् । एतादृशविपरीतपरिणामेष्वपि स्वप्रयत्नतः वृत्तिविद्यायां नैपुण्यं प्राप्य अभियन्ता भूत्वा आङ्ग्लेयपालकेभ्योऽपि प्रशंसां लब्धवान् 'सर् मोक्षगुण्डं विश्वेश्वरय्यः'।

अयं बेङ्गलूरुसमीपे 'मुद्दिनेहल्लि' इति ग्रामे १८६० तमे संवत्सरे सेप्टेम्बर् मासे १५ दिनाङ्के जातः। पिता श्रीनिवासशास्त्री प्रख्यातसंस्कृतपण्डितः अनुशासनयुतश्च। माता च वेङ्कायम्मा दैवभक्तिपरायणा आसीत् । पुत्रस्य विकासे तस्याः पात्रम् अतीव विद्यते इति एकस्मिन् सन्दर्भे स्वयं विश्वेश्वरय्येण कथितम् । तस्य माता न केवलं माता एव, किन्तु तस्य मित्रं, मार्गदर्शिका च। विश्वेश्वरय्यस्य प्राथमिकविद्या 'चिक्कबल्लापुर्' ग्रामे समाप्ता । ततस्सः बेङ्गलूरु केन्द्रीयकलाशालायां बी.ए., पुण्यपत्तने बी.ई. च अधीतवान् । तस्य विद्याभ्यसने तस्य मातुलस्य रामय्यस्य गुरोः नादमुनिनायुडुवर्यस्य योगदानमधिकमासीत् । प्रथमतःविश्वेश्वरय्यः मुम्बय्यां वृत्तिं प्राप्तवान् । तस्य नगरस्य विकासार्थं महान्तं प्रयत्नमकरोत् । ततः सःनैजांप्रभोः आह्वानानुसारं भाग्यनगरमागत्य तत्र जलरक्षणार्थं रक्षितसरोवरान् (Reservoirs) भूगर्भव्यर्थजलप्रवहणव्यवस्थां (underground drainage system) च निर्मितवान् । मैसूर् नगरेऽपि अनेकानि निर्माणात्मककार्याणि सम्पाद्य १९१२ तमे वर्षे सः मैसूरराज्यस्य 'दिवान्' इति पदमलङ्कृतवान् । दिवसे अष्टादशघण्टाः अविरतं कार्यं कुर्वन् सः मनसा, वाचा, कर्मणा च देशस्य सर्वतोमुखविकासाय प्रायतत ।

विश्वेश्वरय्यस्य कार्यालये लेखनीद्वयं भवति स्म । एका च कार्यालयसम्बद्धा, अन्या च व्यक्तिगतेति। सः सर्वकारकार्याय एव कार्यालयलेखनीं स्वकार्यार्थं व्यक्तिगतलेखनीञ्च नियततया उपयुङ्क्ते स्मेति अंशः तस्य प्रजाधनोपयोगविषये अनन्यसामान्यां निबद्धतां सूचयति। १९१८ तमे वर्षे राजास्थानात् कार्यनिवृत्यनन्तरं

SCERT TELANGANA



कृष्णराजसागरः

सः कृष्णसागरसेतुनिर्माणं, मैसूरुविश्वविद्यालयस्थापनं, मैसूरुवित्तकोशस्थापनं च अकरोत् । स्वकर्तव्यमेव दैवमिति मत्वा देशस्य सर्वतोमुखविकासाय अहर्निशं कार्यं कृतवतः तस्य असाधारणं योगदानं पुरस्कृत्य भारतसर्वकारः तं 'भारतरत्नमिति' सर्वोन्नतबिरुदेन व्यभूषयत् ।

एवं समाजोपयोगिकार्याणां निर्वहणे स्वजीवनं समर्प्य कृतकृत्यस्सन् श्रीविश्वेश्वरय्यः १९६२ वत्सरे एप्रिल् मासस्य १४ दिनाङ्के दिवङ्गतः।

अस्माकं भारतदेशे अस्य महोदयस्य स्मृत्यर्थं प्रतिवर्षं सेप्टेम्बर् १५ दिनाङ्के अभियन्तृदिनरूपेण (Engineer's day) समायोजयामः । तदीयं त्यागानुशासनपूर्णं जीवनं सर्वेषां कृते प्रेरणादायकम् ।



मैसूरुविश्वविद्यालयः




भारतरत्नपतकम्

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) अस्मात् पाठात् किमवगतम् ?

आ) विश्वेश्वरय्यमहोदयस्य कान् गुणान् भवन्तः इच्छन्ति? किमर्थम् ?

इ) पाठेऽस्मिन् स्वातन्त्र्यसम्पादनात् पूर्वं विद्यमानाः परिस्थितीः ज्ञातवन्तः । वर्तमानकाले समाजस्य परिस्थितिः कथमस्तीति वदन्तु ?

ई) वर्तमानकाले विद्याविषये भवतः अभिप्रायः कः ?

उ) विश्वेश्वरय्यस्य जीवनशैलीम् उद्दिश्य मित्रैः सह चर्चां कुर्वन्तु ।

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठे विद्यमानानि सर्वनामपदानि जानन्तु । तेषामधः रेखाङ्कनं कुर्वन्तु ।

आ) पाठस्य आधारेण अधः दत्तानि वाक्यानि शुद्धीकुर्वन्तु ।

१. विश्वेश्वरय्यमहोदयस्य जन्म आन्ध्रप्रदेशे अभवत् ।

२. विश्वेश्वरय्यः बेङ्गलूरु सेण्ट्रल् कलाशालायाम् अभियन्तृशास्त्रम् (इञ्जनीरिङ्ग्) अपठत् ।

३. १९०८ तमे वर्षे विश्वेश्वरय्यः दिवान् पदं प्राप्तवान् ।

४. मद्रास्नगरे सर्वकारस्य अभियन्तृरूपेण उद्योगं प्राप्तवान् ।

इ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

गङ्गा भारतस्य सर्वासु नदीषु पवित्रतमा अस्ति । इयं हिमालयस्य गङ्गोत्रीनामकात् स्थानात् निर्गच्छति । गङ्गायाः तटे ऋषिकेशः, हरिद्वारम्, प्रयागः, वाराणसी चेति प्रधानानि तीर्थस्थानानि सन्ति। गङ्गाजलं तु अमृतमिति कथ्यते । हरिद्वारतीर्थं द्रष्टुं प्रतिवर्षं लक्षशः यात्रिकाः आयान्ति ।

१. नदीषु पवित्रतमा नदी का अस्ति ?

२. वारणासी कस्याः तटे अस्ति ?

३. गङ्गा कुतः निर्गच्छति ?

४. गङ्ग्याः तटे कानि कानि क्षेत्राणि सन्ति ?

ई) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. विश्वेश्वरय्यमहोदयस्य जन्म कुत्र अभवत् ? तस्य पितरौ कौ ?

२. विश्वेश्वरय्यः कीदृशसेवां कृतवान् ?

३. विश्वेश्वरय्यस्य कस्यचित् व्यवहारस्य विषयं लिखन्तु ?

४. विश्वेश्वरय्यस्य विद्याभ्यासम् अधिकृत्य लिखन्तु ?

५. भारतसर्वकारेण विश्वेश्वरय्याय 'भारतरत्नम्' इति बिरुदं किमर्थं दत्तम् ?


SCERT TELANGANA

### III. स्वीयरचना

**अ) अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. आङ्ग्लेयकालस्य भारतदेशसामाजिकपरिस्थितीः वर्णयन्तु ?

२. निजां नवाब् हैदराबाद् नगरे किं किं निर्मितवान् ?

३. बालैः विश्वेश्वरय्यजीवनम् आदर्शरूपेण किमर्थं स्वीकरणीयम् ?

**आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. विश्वेश्वरय्यः स्वमातृशिक्षणमेव तस्य विकासस्य मूलकारणमिति अवदत् खलु ! एवमेव भवतः विद्याभ्यासे प्रवर्तने च केषां प्रभावः अस्ति, कथमस्ति इति दशवाक्यैः लिखन्तु ।

२. विश्वेश्वरय्यः भारतदेशस्य महतीं सेवाम् अकरोत् इति पाठात् ज्ञातवन्तः खलु ! भवन्तः अपि स्वजीवने देशस्य कीदृशीं सेवां कुर्वन्तीति दशवाक्यैः लिखन्तु ।

### IV. पदजालाभिवृद्धिः

**अ) उदाहरणानुसारम् अधः दत्तानि पदानि उपयुज्य वाक्यानि रचयन्तु ।**

**उदा -** मेधावी - प्रयत्नः

मेधावी अशोकः प्रयत्नेन ख्यातिं सम्पादितवान् ।

१. प्रज्ञा - प्रशंसा

२. परिवारः - समाजः

३. विद्या - प्रगतिः

४. बोधनम् - शिक्षकः

**आ) अधः रेखाङ्कितानां पदानां विरुद्धार्थकपदानि लिखित्वा, तानि उपयुज्य स्वीयवाक्यानि रचयन्तु ।**

**उदा -** अमेरिकातः मम बान्धवाः स्वदेशं प्रत्यागतवन्तः ।

अद्यतनकाले भारतीयाः अनेके विदेशं गच्छन्ति ।

१. राजा जन्मनैव धनिकः आसीत् ।

२. प्रभोः विद्याविषये अनासक्तिः अधिका अस्ति ।

३. देवरायः जन्मना बुद्धिमान् आसीत् ।

४. अहङ्कारशीलस्य प्रगतिः न भवति ।



SCERT TELANGANA

इ) अधः दत्तेषु पदसमूहेषु भिन्नं पदं चिन्वन्तु ।

१. विद्या, दुर्बुद्धिः, प्रज्ञा, कौशलम् ।

२. मुम्बई, मैसूरु, हैदराबाद्, जलबन्धः ।

३. बुद्धिकुशलता, सेवातत्परता, विश्रान्तिः, कार्यदक्षता ।

४. सर्, भारतरत्नम्, पद्मभूषण्, नोबल् ।

## V. सर्जनात्मकता

अ) "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति विषयमुद्दिश्य निबन्धमेकं लिखन्तु ।

आ) अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఏ మనిషి స్వతంత్రంగా, ఎవరి పైనా ఆధారపడకుండా, నిర్భయంగా జీవించగలడో అలాంటి స్వతంత్రజీవి యొక్క జన్మమే సార్థకం. ఒకరిపై ఆధారపడి జీవించడం దుర్భరమైనది. కావున వివేకంతో ఎవరి జీవితాలను వారు ఉద్ధరించుకోవాలి.

## VI. प्रशंसा

(अ) अधः दत्तानि कानिचन कार्याणि वाक्यैः सूचितानि । तेषु भवद्भिः कर्तुं शक्यानि, अशक्यानि च कार्याणि अभिज्ञाय चिह्नीकुर्वन्तु ।

१. अहं कर्तव्यमेव दैवकार्यमिति चिन्तयामि ।

२. अहं सर्वदा सत्यमेव वदामि ।

३. अहम् ऋजुतया व्यवहरामि ।

४. अहम् अनुशासनं पालयामि ।

५. अहं देशसेवां करोमि ।

(आ) विश्वेश्वरय्यमहोदये दृष्टानाम् उत्तमगुणानां सूचीं कुर्वन्तु ।

## VII. भाषांशाः

(१) (अ) अधः दत्तानि वाक्यानि पठन्तु, अवगच्छन्तु ।

१. आरक्षकः चोरम् **अनुसृत्य** धावितवान् ।

२. सेवकः वृक्षात् **अवतीर्य** गतवान् ।

३. बालकः क्षीरं **निपीय** निद्रितवान् ।

SCERT TELANGANA

५. कर्मकरी पात्राणि **प्रक्षाल्य** गतवती ।

- उपरि वाक्येषु स्थूलाक्षराणि **'ल्यप्'** प्रत्ययान्तानि ।

- हरति इत्यस्य (हृधातोः) क्त्वाप्रत्यये कृते सति **हृत्वा** इति भवति । यदि धातुः उपसर्गसहितः भवति तदा क्त्वाप्रत्ययस्य स्थाने ल्यप् प्रत्ययः भवति । यथा **संहृत्य, परिहृत्य, विहृत्य** इति ।

## (आ) उदाहरणमनुसृत्य पट्टिकां पूरयन्तु ।

| क्रियापदम् | उपसर्गसहितक्रियापदम् | ल्यबन्तम् |
|---|---|---|
| गच्छति | आगच्छति | आगत्य |
| नयति | | |
| करोति | | |
| स्मरति | | |
| लिखति | | |
| स्थापयति | | |

## (इ) उदाहरणानुसारं ल्यबन्तरूपाणि लिखन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| **उदा -** | **प्र** | **+** | **क्षालयति** | **=** | **प्रक्षाल्य** |
| १. | प्र | + | नमति | = | ________ |
| २. | निर् | + | गच्छति | = | ________ |
| ३. | सम् | + | आप्नोति | = | ________ |
| ४. | उत् | + | तिष्ठति | = | ________ |
| ५. | वि | + | गणयति | = | ________ |
| ६. | उद् | + | धरति | = | ________ |
| ७. | सम् | + | हरति | = | ________ |
| ८. | परि | + | वेशयति | = | ________ |

SCERT TELANGANA

(२) **अ. अधः दत्तानि उदाहरणानि परिशीलयन्तु ।**

| | | | | | |
|---|---|---|---|---|---|
| बालः | + | तत्र | = | बालस्तत्र | (अः + त = स) |
| रामः | + | च | = | रामश्च | (अः + च = श) |
| डयमानः | + | टिट्टिभः | = | डयमानष्टिट्टिभः | (अः + ट = ष) |

- उपरितनेषु उदाहरणेषु विसर्गस्य स्थाने सकार - शकार - षकाराणामादेशः अभवत् ।

★ **विसर्गस्य तथयोः परयोः सकारः, चछयोः परयोः शकारः, टठयोः परयोः षकारः आदेशः भवति ।**

**विसर्गः + तथ = स, विसर्गः + चछ = श, विसर्गः + टठ = ष**

★ **अयं च कश्चन विसर्गसन्धेः भेदः ।**

**आ. अधः दत्तानि उदाहरणानि परिशीलयन्तु ।**

| | | | | | |
|---|---|---|---|---|---|
| पयः | + | शीतलम् | = | पयश्शीतलम् | (ः + श = श) |
| श्रीधरः | + | षष्ठः | = | श्रीधरष्षष्ठः | (ः + ष = ष) |
| भक्तः | + | सेवते | = | भक्तस्सेवते | (ः + स = स) |

★ **विसर्गस्य शषसपरेषु विकल्पेन क्रमात् शषसा एव आदेशाः भवन्ति ।**

**विसर्गः + (श - ष - स) = श ष स**

★ **अयं च कश्चन विसर्गसन्धेः भेदः ।**

### परियोजनाकार्यम्

विविधरङ्गेषु विद्यामानानां प्रख्यातशास्त्रज्ञानां चित्राणि, तेषां रचनाः, तेषां पुरस्कारान् बिरुदानि च सङ्कलय्य भित्तिपत्रे सुन्दरैः वर्णाक्षरैः विलिख्य प्रदर्शयन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. पाठस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि । | | |
| २. सेवापरायणतायाः विषये लेखितुं शक्नोमि । | | |
| ३. कठिनशब्दान् भाषायामुपयोक्तुं शक्नोमि । | | |
| ४. मातृभाषया दत्तस्य अनुच्छेदस्य संस्कृतभाषया अनुवादं कर्तुं शक्नोमि। | | |

**हितं मनोहारि च दुर्लभं वचः ।**



SCERT TELANGANA

द्वितीयः भागः

# ५. अविचार्य न कर्तव्यम्

## पठन्तु, विचिन्त्य वदन्तु

तेजस्विनी - आचार्य ! भवतां हस्ते नूतनकथापुस्तकं दृश्यते । मया द्रष्टुं शक्यते वा महोदय !

अध्यापकः - अवश्यम् । स्वीकरोतु ।

तेजस्विनी - 'टालस्टाय् कथाः' इति नाम अस्ति । अस्य एताः वैदेशिककथाः खलु ! अस्मभ्यम् उपयुक्ताः वा ?

अध्यापकः - आम् । कथाप्रियानां बालानां कथाः आनन्ददायिकाः एव खलु ! एतादृशानां कथापुस्तकानां पठनेन सर्वदेशानां संस्कृतयः ज्ञातुं शक्यन्ते।

तेजस्विनी - महोदय ! कृपया एकवारं पुस्तकं ददातु । कथाः पठित्वा पुनरर्पयिष्यामि।

अध्यापकः - सायङ्काले दास्यामि । इदानीम् एकां वैदेशिककथां श्रावयिष्यामि ।

## प्रश्नाः

१. कथाप्रियाः के भवन्ति ?

२. कथापुस्तकपठनस्य प्रयोजनं किम् ?

३. कामपि एकां वैदेशिककथां जानन्ति किम् ?

### उद्देश्यम्

★ कथाभिः मनोरञ्जनप्राप्तिः।

★ अपूर्वदेशविदेशीयसाहित्यस्य संस्कृतभाषया परिचयप्रदानम् ।

★ कथाभिः नैतिकमूल्यानां परिचयपुरस्सरम् आचरणाय प्रेरणाप्रदानम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



(अस्माकं देशस्य आग्नेयदिशि वर्तते 'इण्डोनेसिया' देशः। तत्र प्रचलिता कथा एषा ।)

इण्डोनेशियादेशे 'असेरा' नामकं लघुराज्यम् आसीत् । तस्य पालकः 'वैबवः' नाम राजा । सः युवकः, स्फुरद्रूपी च । नूतनतया राज्याधिकारं प्राप्तवानासीत् । तस्य श्मश्रूणां क्षौराय कर्मकुशलः विशिष्टः कश्चन क्षुरकः नियुक्तः आसीत् । तस्य नाम 'बुदिः'। सः प्रतिदिनं प्रातःकाले आगत्य राज्ञः क्षुरकर्म करोति स्म ।

एकस्मिन् दिने राजा निद्रातः नोत्थितः। किन्तु 'बुदिः' महाराजस्य निद्रावस्थायामेव स्वदायित्वं नैपुण्येन परिसमाप्य गृहमगच्छत् । निद्रातः उत्थितः राजा क्षौरकार्यं समाप्तमिति स्पर्शनेन व्यजानात् । तं क्षुरकं मनसि अभ्यनन्दद्च । अनन्तरं सः राजसभायां तमाहूय तस्य कौशलं प्रशंसितवान् । न तावदेव "वरं वृणीष्व, भवदभीष्टं पूरयामि" इति सोत्साहं वाग्दानमकरोत् राजा। बुदिः नितरां सन्तुष्टोऽभवत् ।

तस्य मनसि काचन तीव्रेच्छा चिरकालतः आसीत् । "अहमपि कदाचित् न्यूनातिन्यूनम् एकमासपर्यन्तं

वा मन्त्री भवेयम्'' इति । अनेन वरप्रदानेन स्वकीया चिरकालवाञ्छा साकारा भविष्यतीति स आनन्दम् अन्वभवत् । 'बुदिः' सभामुखं स्वाभिलाषं राज्ञे न्यवेदयत् । अनालोचनतया राजा 'तथेति' वरं दत्त्वा सभासमक्षं तं मन्त्रिणमकरोत्। तथा प्रकटनसमये कुशाग्रबुद्धिः 'सेतियवान्' नाम वृद्धमन्त्री तं राजानं न्यवारयत्। राजा वृद्धमन्त्रिणः वचनानि अन्यथा स्व्यकरोत् । क्रुद्धः सः तं मन्त्रिणं कारागारे बद्धमकरोत् ।

नूतनमन्त्री 'बुदिः' तु राज्यभारं वोढुं सर्वथा अयोग्य एव । अतः स केवलम् अधिकारदर्पं प्रदर्शयन्, सकलभोगैः कालं यापयति स्म । तथैव अनुचितमन्त्राङ्गमपि स करोति स्म । सः एकस्मिन् दिने ''इदानीं राज्यस्य शत्रुभयं नास्ति । राज्यरक्षणाय सैन्यमनावश्यकम् । तस्य पोषणं व्यर्थम् । अतः निष्कासयामि सैन्यम्'' इति निर्णिय सः सैन्यं सर्वमपि निष्कासितवान् ।

एतं वृत्तान्तं ज्ञात्वा पार्श्वराज्यपालकः 'अजुङ्ग' नामकः ससैन्यम् असेरा राज्यमाक्रान्तवान् । गूढचरैः



ज्ञातवार्तः वैबवः तत्क्षणं तं प्रतियोद्धुं मन्त्रिणं बुदिं समादिशत् । तदा सैन्यं तु नासीत् । स मूर्खमन्त्री किं वा कर्तुं शक्नुयात् ?

एकस्मिन् सायङ्काले अजुङ्ग् सहस्राधिकैः सैनिकैः राजधानीम् आक्रान्तवान् । परेद्यवि प्रातःकाले नगरमपि स्वाधीनं करणीयमिति तदीययोजना । तावत् शत्रुसैन्यं दृष्ट्वा मूर्खमन्त्री 'बुदिः' पलायितवान् ।

राजमन्दिरे उपविष्टः 'वैबवः' राज्यदुस्थितिं समीक्ष्य चिन्ताक्रान्तः आसीत् । सैन्यस्य मन्त्रिणश्च अनुपस्थितौ राज्यं कथं रक्षणीयमिति महती चिन्ता तं नितरामबाधत । तेन स्वापराधः ज्ञातः। एतादृशविषमपरिस्थितिषु 'बुद्धिरेव गरीयसी' खलु !

स राजा झटिति कारागृहम् अगच्छत् । बद्धं वृद्धमन्त्रिणं स्वयं विमुच्य स्वयङ्कृतापराधम् अङ्गीकरोत् । तं क्षमाञ्च अयाचत । अनन्तरं सेतियवानं राज्यस्य विपत्करस्थितिं विवृण्वन् कथमपि राज्यं रक्षणीयमिति प्रार्थयत ।

वृद्धमन्त्री काँश्चन क्षणान् चिन्तामग्नः अभवत् । अधुना बलेन किमपि कर्तुं न शक्यते इति तेन अवगतम् ।

उत्तरक्षणे सेतियवान् नगरस्थपौरान् प्रासादे समावेश्य स्वप्रभावपूर्णेन भाषणेन तेषु देशभक्तिमपूरयत्। स असङ्ख्याकानि कदलीपत्राणि आनीय तानि दध्योदनेन संलेप्य नगरसीमां परितः क्षेप्तुमादिशत् । तस्य आज्ञामनुसृत्य पौराः आरात्रं तथैव अकुर्वन् । तत्सर्वं शत्रुसैन्यं दूरतः एव पश्यति स्म ।

अनन्तरं स तस्यां रात्रौ एव नगरस्य धेनूः वृषभान्, महिषीः महिषान् सर्वान् एकत्रीकृत्य एरण्डतैलेन आर्द्रीकृतैः वस्त्रखण्डैः तेषां शृङ्गाग्रान् समावर्त्य तेषु अग्निं प्रज्वाल्य अत्यजत् । तेऽपि अग्निदाहभयेन वेगेन इतस्ततः अधावन् । एतत् सर्वम् अवलोकितवान् अजुङ्ग् भयभ्रान्तः अभवत् । राजा वैबवः लक्षाधिकैः स्वसैनिकैः प्रतियोद्धुं सन्नद्धतां करोतीति विचिन्त्य तस्यामेव रात्रौ स्वसैनिकैस्सह द्रुतं पलायितवान् ।

ततः मन्त्री राजप्रासादं पुनरागत्य राजानं सान्त्वयित्वा "निर्भयं तिष्ठतु" इत्यवोचत् । "विजयी भव" इत्याशीर्वचनमपि अदात् ।

राजा तु आनन्दाश्चर्याभ्यां तस्य पुरतः मुकुलितहस्तोऽभवत् । तस्य उद्विग्नता तु अशमिता एव ।

सूर्योदयात्पूर्वमेव गूढचराः आगत्य राजानं "शत्रुराजः ससैन्यं पलायितवान्" इति वार्तामश्रावयन् । राजा मन्त्रिणं बहुधा प्रशंस्य तं पुनः प्रधानमन्त्रिपदे सगौरवं समस्थापयत् ।

अनन्तरं राज्ञा आज्ञापिताः भटाः पूर्वस्थं मूर्खमन्त्रिणम् आनीय सभायां प्रावेशयन् । स मूर्खः "मम वधः अनिवार्यः" इति चिन्तयन् भयकम्पितः अभवत् । राजा तु हसन् तं तस्य वृत्तिं यथाविधि अकल्पयत् ।

SCERT TELANGANA

# एतानि कुर्वन्तु

## I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) कथायां के अंशाः भवद्भ्यः इष्टाः? के च इष्टाः न इति वदन्तु ।

आ) बुदिः मन्त्रिपदमेव किमर्थम् इच्छति स्म ? कारणानि वदन्तु ।

इ) बुदिः मन्त्रिपदमयाचत । तादृशावकाशः लभ्यते चेत् भवन्तः कीदृशं पदं याचिष्यन्ते ? किमर्थम् ?

ई) सैन्यं नाम केवलं युद्धार्थमेव वा ? तेन अन्यत् किमपि प्रयोजनमस्ति वा ?

उ) राजवृद्धमन्त्रिणोः कतरः विवेकी ? चर्चां कुर्वन्तु । स्वाभिप्रायं वदन्तु ।

ऊ) दध्योदनमिश्रितकदलीपत्राणि दृष्ट्वा शत्रुसैन्येन किमूहितम् ?

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठस्थानि नामवाचकपदानि रेखाङ्कितानि कुर्वन्तु, लिखन्तु ।

आ) कथायाः क्रममनुसृत्य वाक्यानि क्रमशः स्थापयन्तु ।

१. स राजा झटिति कारागृहमगच्छत् ।

२. तथैव अनुचितमन्त्राङ्गमपि करोति स्म ।

३. तं क्षुरकं मनसि अभ्यनन्दत् ।

४. अहमपि कदाचित् न्यूनातिन्यूनम् एकमासपर्यन्तं वा मन्त्री भवेयम् ।

५. तावत् शत्रुसैन्यं दृष्ट्वा मूर्खमन्त्री पलायितवान् ।

६. राजा तु आनन्दाश्चर्याभ्यां तस्य पुरतः मुकुलितहस्तोऽभवत् ।

इ) अधः दत्तानां वाक्यानां सन्दर्भवाक्यानि लिखन्तु ।

१. शत्रुराजः ससैन्यं पलायितवान् ।

२. वरं वृणीष्व, भवदभीष्टं पूरयामि ।

३. मम वधः अनिवार्यः।

४. निर्भयं तिष्ठतु ।

ई) अधः दत्तं परिच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

सच्चिन्तनादेव बुद्धिमत्ता, बलं, तेजः, समयोचितप्रज्ञा, क्रियानुष्ठानं च लभ्यते । सच्चिन्तनादेव तत्त्वज्ञानं लभ्यते । तत्त्वज्ञानात् आत्मशान्तिः, आत्मशान्त्या दुःखानि नश्यन्ति। दुःखरहिते सति सन्तोषः । सन्तोष एव परमश्रेयः, परमसुखं च । सन्तुष्ट एव मोक्षं प्रप्नोति।

१. उपरि अनुच्छेदः कं विषयं बोधयति ?

२. बुद्धिमत्ता बलं च कथं लभ्येते ?



SCERT TELANGANA

३. आत्मशान्त्या कानि नश्यन्ति ?

४. मोक्षं कः प्रप्नोति ?

५. प्रस्तुतानुच्छेदस्य शीर्षिकां लिखन्तु ।

**उ) पाठं पठित्वा अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।**

१. बुदेः दायित्वं किम्? सः स्वदायित्वं कथं निर्व्यूढवान् ?

२. बुदेः मन्त्रिपदप्रदानसमये वैबवः किमर्थं क्रुद्धः अभवत् ? तदा सः किमकरोत् ?

३. राजा वैबवः कथं स्वापराधम् अजानात् ?

४. असेराराज्यं कः आक्रान्तवान् ?

५. बुदिः मन्त्री भूत्वा किम् अकरोत् ?

## III. स्वीयरचना

**अ) अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. बुद्धिबल-देहबलयोः किं गरीयः इति सोदाहरणं लिखन्तु ?

२. अनालोच्य कृतानि कार्याणि हानिकराणि कथं भवन्तीति लिखन्तु ?

३. अस्माभिः कीदृशानि कार्याणि करणीयानि ?

४. वैबवस्य व्यक्तित्वमधिकृत्य स्वीयवाक्यैः लिखन्तु ।

५. सेतियवान्मन्त्रिणः देशभक्तिं विशदयन्तु ।

**आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।**

१. कथां स्वीयवाक्यैः लिखन्तु ।

२. राज्यसंरक्षणाय वृद्धमन्त्री कार्यद्वयमकारयत् । तयोः निर्वहणे किं तस्य मन्त्राङ्गम् ?

## IV. पदजालाभिवृद्धिः

**अ) रेखाङ्कितपदानाम् अर्थानवगच्छन्तु । तानि उपयुज्य अन्यानि वाक्यानि रचयन्तु ।**

१. विवेकानन्दः विनयशीली आसीत् ।

२. श्वः अहं शतरूप्यकाणि तुभ्यं दास्यामीति वाग्दानं करोमि ।

३. सुभाषः प्रतिदिनं न्यूनातिन्यूनम् एकं फलं खादति ।

४. बालकस्य आगमनं दृष्ट्वा चिक्रोडः झटिति वृक्षमारोहति ।

५. क्रीडासु प्रथमस्थानं प्राप्तवतीं सुरेखां प्रधानाध्यापकः बहुधा प्रशंसितवान् ।

आ) उदाहरणानुसारम् अधः दत्तानि पदानि उपयुज्य वाक्यानि रचयन्तु ।

**उदा -** धनम्, पुष्पम्, आकाशम्

आकाशात् धनं तथा पुष्पं नागच्छतः। अस्माभिः ते सम्पादनीये ।

१. कष्टम्, धनम्, ज्ञानम्

२. आर्जनम्, व्ययः, व्यर्थम्

३. सौधम्, रेल्यानम्, मेधावी

इ) पट्टिकातः उचितपदानि चित्वा तैः रिक्तस्थानानि पूरयन्तु ।

| | | |
|---|---|---|
| कुपितः विस्मितः | हस्तगतम् | पादाक्रान्तम् |
| प्रेषयतु न्यवारयत् | आलोचनाग्रस्तः रोद्धुं | बद्धुं |

१. वैबवः राज्यदुस्थितिं समीक्ष्य ............... आसीत् ।

२. अतः ................ सैन्यम् ।

३. ............ सः तं मन्त्रिणं कारागारे बद्धमकरोत् ।

४. प्रातः काले नगरमपि तस्य ............ भविष्यति ।

५. वृद्धमन्त्री तं राजानं ................. ।

## V. सर्जनात्मकता

अ) कथां नाटकरूपेण परिवर्त्य प्रदर्शयन्तु ।

आ) अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

జీవితంలో ధనానికి చాలా ప్రాధాన్యం ఉంది. ధనం లేనిదే భోజనం, గృహం, వస్త్రాలు ఎలా పొందగలుగుతాము? కష్టపడి పనిచేస్తూ ధనాన్ని సంపాదించాలి. కాని లోభం చేత మనం ఎక్కువ డబ్బును పొందగోరుతాము. ఎలాగైనా సరే ధనం సంపాదించి ఉన్నత స్థానాన్ని పొందాలనుకోవడం అనుచితం. మనకు అవసరమైన ధనాన్ని ఉపయోగించుకోవాలి. దీనులకు సహాయం చేయాలి. ధనవ్యామోహం మనిషికి అపకీర్తిని తెచ్చిపెడుతుంది.

## VI. प्रशंसा

भवतां मित्रेषु यः स्वबुद्धिबलेन कार्यं साधितवान् तम् उद्दिश्य वदन्तु ।

## VII. भाषांशाः

अ) अधः दत्तं संवादं पठन्तु ।

पिता - राहुलः कुत्र अस्ति? किं सः अधुना अपि क्रीडति ?

माता - पश्यतु, सः **क्रीडित्वा** आगच्छति ।

पिता - सः विद्यालयकार्यं कदा करोति ?

SCERT TELANGANA

| | | |
|---|---|---|
| माता | - | सः प्रतिदिनं विद्यालयकार्यं **कृत्वा** क्रीडितुं गच्छति । |
| पिता | - | पुत्र राहुल ! मध्याह्ने ओदनं **खादित्वा** किं करोषि ? |
| राहुलः | - | **भुक्त्वा** विश्रामं स्वीकरोमि । तत्पश्चात् गृहकार्यं करोमि । |
| पिता | - | अधुना किं करिष्यसि । |
| राहुलः | - | अधुना दूरदर्शने धारावाहिकां पश्यामि । तां दृष्ट्वा भोजनं करिष्यामि । |

- उपरि संवादे स्थूलाक्षरपदानि अवगच्छन्तु ।
- क्रीडित्वा, कृत्वा, खादित्वा, भुक्त्वा, दृष्ट्वा, एते **क्त्वाप्रत्ययान्तरूपाणि ।** क्त्वाप्रत्यये त्वा एव अवशिष्यते ।

### आ) अधः दत्तेषु वाक्येषु क्त्वाप्रत्ययान्तरूपैः रिक्तस्थानानि पूरयन्तु ।

**उदा** - बालकः स्नात्वा पूजां करोति ।

१. सः पाठशालां ............ (गम् + क्त्वा) पठति ।

२. अहं क्षीरं ............ (पा + क्त्वा) निद्रां करोमि ।

३. अहं पाठं ............ (पठ् + क्त्वा) परीक्षां लिखामि ।

५. बालिका देवं ............ (वन्द् + क्त्वा) गतवती ।

### इ) अधः क्त्वाप्रत्ययान्तपदानि उपयुज्य स्वीयवाक्यानि लिखन्तु ।

पृष्ट्वा, स्मृत्वा, श्रुत्वा, गृहीत्वा, नत्वा, ज्ञात्वा

उदा- उपाध्यायः प्रश्नान् पृष्ट्वा कथां श्रावितवान् ।

## परियोजनाकार्यम्

विदेशीयरचयितॄणां कथाः सङ्कलयन्तु ।
ताः पठित्वा तेषां संस्कृतिम् अवगत्य तत्रत्यान् विशेषान् श्रावयन्तु ।

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | |
| २. कथां स्वीयवाक्यैः लेखितुं शक्नोमि । | | |
| ३. पाठेऽस्मिन् आगतानि नूतनपदानि उपयुज्य वाक्यनिर्माणं कर्तुं शक्नोमि । | | |
| ४. पाठ्यांशकथां नाटकरूपेण प्रदर्शयितुं शक्नोमि । | | |

**जितक्रोधेन सर्वं हि जगदेतद्विजीयते ।**

SCERT TELANGANA

द्वितीयः भागः

# ६. आर्यभटः

## पठन्तु, विचिन्त्य वदन्तु

रामप्रसादः - पितामह ! श्रीरामः लङ्कातः अयोध्यां प्रति विमानेन आगतवान् इति दूरदर्शने पौराणिकः उक्तवान् । रामायणकाले विमानम् आसीत् वा ?

पितामहः - आसीत् । तस्य नाम पुष्पकविमानम् । तत् विश्वकर्मा नाम स्थपतिः निर्मितवान् ।

रामप्रसादः - पितामह ! विमानं रैट् सोदरौ आविष्कृतवन्तौ खलु !

पितामहः - वत्स ! रैट् सोदरौ आधुनिककाले विमानं निर्मितवन्तौ इति तु सत्यमेव। पुराकाले विश्वकर्मा चोदकरहितम् अपरिमितस्थानकम्, बहुविचित्रं विमानं निर्मितवानिति जानीमः ।

रामप्रसादः - अहो ! आधुनिकवैज्ञानिकेभ्यः पूर्वमेव भारतीयाः बहून् वैज्ञानिकांशान् प्रतिपादितवन्तः किल ।

### प्रश्नाः

१. पुष्पकविमानं कः निर्मितवान् ?

२. भारतीयाः वैज्ञानिकांशान् कदा उक्तवन्तः ?

३. भारतीयैः आविष्कृतान् कान् अंशान् जानन्ति?

### उद्देश्यम्

* प्राचीनभरतीयशास्त्रज्ञानां विषये आदरभावनायाः विकासः।
* प्राचीनवैज्ञानिकविषयेषु अवगमनसम्पादनम् ।

## पृष्टभूमिः

अस्माकं देशे सस्यानि, भूगर्भजलानां परिसङ्ख्यानं च अधिकृत्य अध्ययनं प्रचलति । विश्वविद्यालयतः कोणस्थे ग्रामेऽपि विद्याबोधनं दूरदर्शनेन क्रियते । भूगर्भसम्पदः परिशोधनं भवति। जलप्रलयः सम्भवतीति सूचनाः प्राप्नुमः ।

एतान् सर्वानपि विषयान् वयम् अनायासेन जानीमः इत्यत्र कारणं विज्ञानशास्त्रज्ञानमेव। शास्त्रविकासस्य कारणानि वैज्ञानिकैः आविष्कृताः सिद्धान्ताः एव ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

भारतसर्वकारेण विज्ञानशास्त्राभिवृद्ध्यै प्रथमतया १९७५ एप्रिल् १९ तमे दिनाङ्के 'आर्यभटः' नाम प्रथमोपग्रहः अन्तरिक्षे सम्प्रेषितः।

आर्यभटविषये अत्र किञ्चित् ज्ञास्यामः। यथा नवीनान्तरिक्षविज्ञानशास्त्रे 'विक्रमसाराभाई' महोदयः प्रमुखः अस्ति, तथैव प्रपञ्चे प्रप्रथमः 'अन्तरिक्षविज्ञानशास्त्रवेत्ता' 'आर्यभटः'। सः ईसवीयपञ्चमशताब्द्यां केरलप्रान्ते जातः इति कैश्चित् आधारैः ज्ञायते ।

वस्तुतः भारतीयगणितशास्त्रेतिहासः अत्यन्तप्राचीनः। एतस्य शास्त्रस्य 'पौलिश-रोमश-वासिष्ठ-सौर-पैतामहसिद्धान्ताः' प्रचारे आसन् । किन्तु अधुना ते न लभ्यन्ते । इदानीम् आर्यभटेन रचितः 'आर्यभटीयम्' नाम ग्रन्थः एव ज्योतिषशास्त्रस्य प्रमाणभूतः अस्ति । सः अनेकग्रन्थस्थान् शास्त्रविषयान् महता नैपुण्येन सङ्गृह्य ग्रन्थमेनं सङ्क्षिप्ततया कारिकारूपेण व्यरचयत् । आर्यभटेन रचितं 'जिलाभूः' इति सूत्रं भूव्यासमधिकृत्य अस्ति । 'भूव्यासः १०५० योजनमितः भवति' । अर्थात् १०५० X १२ = १२६०० किलोमीटर् दूरमिति तस्य सूत्रस्य भावः। आधुनिकाः अपि एतदेव परिमाणम् इदानीं प्रतिपादयन्ति ।

सूत्रबद्धे आर्यभटीयग्रन्थे चत्वारः पादाः सन्ति । आर्यभटः केवलं ११८ श्लोकैरेव गणितशास्त्रस्य, खगोलशास्त्रस्य च मौलिकविषयान् स्पष्टतया सूत्रबद्धानकरोत् । तेन प्रतिपादितान् अंशान् आधुनिकवैज्ञानिकाः अपि अङ्गीकुर्वन्ति । सः ग्रहाणां भ्रमणकालं गणयित्वा एकस्मिन् महायुगे सूर्यः ४,३२०,००० भ्रमणानि करोतीति सिद्धान्तम् एकेनैव श्लोकेन प्रतिपादितवान्। इत्थम् अन्यग्रहाणां भ्रमणकालश्च अनेन निर्धारितः। सः सङ्ख्याविषये 'एक-दश-शत-सहस्रायुत- वृन्द' (१,०००,०००,०००) पर्यन्तमुक्तवान् । वर्गः, वर्गक्षेत्रं, घनं, घनफलं, वर्गमूलं, घनमूलं, त्रिभुजीनां क्षेत्रफलम् इत्यादीन्



SCERT TELANGANA





विषयान् आर्यभटः प्रतिपादितवान् । 'टालमी' नामकेन ग्रीक्शास्त्रज्ञेन अनवगतं विषयम् ('भुजन्यां' sin) अधिकृत्य निर्दुष्टमुक्तवान् आर्यभटः। एकस्य वृत्तस्य व्यासः २०,००० कि.मी. भवति चेत् तस्य परिधिः ६२,८३२ कि.मी.भवति इति एकेन श्लोकेन अयं न्यरूपयत् । आर्यभटः 'पैथागरस् सिद्धान्तम्' इति प्रथितं सिद्धान्तं पैथागरसस्य पूर्वमेव प्रतिपादितवान्। तथैव सः वृत्त-त्रिभुज-चतुर्भुजानां रचनारीतीः सुस्पष्टम् अबोधयत् । समयस्य विषये वर्ष-मास-दिनानि आरभ्य नाडी-विनाडीपर्यन्तम् अत्यन्तसूक्ष्मविभजनं तथा ग्रहगतीनां सम्बन्धं, भूमितः तेषां दूरं च सः निर्दुष्टम् अगणयत् ।

आर्यभटीयस्य प्रामाणिकतां ज्ञात्वा अष्टमनवमशताब्दीयौ अरब्देशीयौ अब्बासय्यदखालिफ्, अल्मन्सूर् अल्माम्नामकौ शास्त्रज्ञौ तस्य ग्रन्थस्य प्रचारम् अकारयताम् ।

अपूर्वस्य आर्यभटीयस्य आधारेण रचिताः अनेकानेकहस्तलिखितग्रन्थाः (Manuals) तस्य प्रचुरप्राधान्यं प्रमाणयन्ति ।

अतः प्रपञ्चगणितखगोलशास्त्रेषु आर्यभटः मेरुनग इव उन्नतः इति सगर्वं वदेम । अधुना प्रपञ्चे उपयुज्यमानयोः शास्त्रसाङ्केतिकज्ञानयोः मौलिकविषयाः अस्माकं शास्त्रज्ञैः अतिप्राचीनकाले एव निरूपिताः। तादृशान् महनीयान् ज्ञात्वा, स्मृत्वा च वयं वास्तविकभारतीयाः भवेम ।

'जयतु भारतम्, जयतु भारतीयवैज्ञानिकसम्पत्'

SCERT TELANGANA

# एतानि कुर्वन्तु

## I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) अद्यतनभारतीयवैज्ञानिकप्रगतिम् अधिकृत्य वदन्तु ।

आ) केषाञ्चन प्राचीनभारतीयवैज्ञानिकानां नामानि वदन्तु ।

इ) नूतनवैज्ञानिकाविष्कारैः लाभः उत हानिः जायते इति चर्चां कुर्वन्तु ।

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु ।

| | | |
|---|---|---|
| केरलप्रान्ते | प्रमाणभूतः | आर्यभटीयम् |
| जिलाभूः | महायुगे | वृन्दः |
| भुजः | भुजन्यां | रचनारीतिः |
| विनाडी | मौलिकविषयान् | |

आ) अधः दत्तानां वाक्यानां समानार्थकवाक्यानि पाठात् चित्वा लिखन्तु ।

१. वैज्ञानिकविषयान् तीक्ष्णबुद्ध्या सङ्गृह्य इमं ग्रन्थं सूत्रैः लिखितवान् ।

२. एवं रूपेण इतरग्रहाणां भ्रमणकालश्च आर्यभटेन निरूपितः।

३. अद्भुतग्रन्थस्य आर्यभटीयस्य उपयोगेन अनेकैः लेखकैः ग्रन्थाः विरचिताः।

४. नवीनाः एतदेव प्रमाणमिदानीं प्रतिपादयन्ति ।

इ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।

समाजे परस्परव्यवहाराय मानवः वाचः प्रयोगं करोति । सैव वाक् भाषारूपेण आस्माभिः व्यवह्रियते । सर्वासां भाषाणां केचन नियमाः भवन्ति। ते एव भाषानियमाः व्याकरणरूपेण उपनिबद्धाः सन्ति । आदिकालतः संस्कृतभाषायाः बहूनि व्याकरणानि अभवन्। वर्तमानसमये प्रयुज्यमानं संस्कृतव्याकरणं पाणिनिना विरचितम्। अतः सम्प्रति पाणिनिः एव वैय्याकरणानां प्रमाणभूतः आचार्यः वर्तते ।

१. परस्परव्यवहाराय कस्याः प्रयोगः भवति ?

२. भाषानियमाः केन रूपेण उपनिबद्धाः?

३. वैय्याकरणानां प्रमाणभूतः आचार्यः कः?

४. अस्यानुच्छेदस्य शीर्षिकां लिखन्तु ।

SCERT TELANGANA

ई) अधः दत्तानां प्रश्नानां समाधानानि पाठं पठित्वा लिखन्तु ।

१. आर्यभटस्य जन्म कदा कुत्र च अभवत् ?

२. भारतदेशस्य प्रथमः उपग्रहः कः? तस्य प्रयोगः कदा अभवत् ?

३. ञिलाभूः इति सूत्रे किं प्रतिपादितम् ?

४. पुरा गणितशास्त्रीयाः के सिद्धान्ताः प्रचारे आसन् ?

५. आर्यभटः किम् अगणयत् ?

## III. स्वीयरचना

अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. पैथागरसस्य सिद्धान्तः कः?

२. आर्यभटीयस्य आधारेण रचितानां द्वित्राणां ग्रन्थानां नामानि लिखन्तु ।

३. उपग्रहाणामुपयोगाः के ?

४. इदानीन्तनकाले प्रयुक्तः उपग्रहः कः ?

आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. आर्यभटीयम् अधिकृत्य स्वीयवाक्यैः लिखन्तु ।

२. भारतीयवैज्ञानिकानुद्दिश्य भवतः अभिप्रायं लिखन्तु ।

## IV. पदजालाभिवृद्धिः

अ) अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानाम् अर्थं ज्ञात्वा तानि उपयुज्य स्वीयवाक्यानि रचयन्तु ।

१. भारतीयशास्त्रेषु मौलिकविषयाः सन्ति ।

२. चालकः स्वनैपुण्येन यानं चालयति ।

३. डा.अब्दुल् कलां महोदयः उपग्रहविज्ञानखनिः अस्ति ।

४. छात्रैः अनवगतविषयान् शिक्षकः बोधयति ।

५. रामकथायाः विषये वाल्मीकिरामायणमेव प्रमाणम् ।



SCERT TELANGANA

## आ) अधः दत्ताः सङ्ख्याः संस्कृतेन अक्षरैः लिखन्तु ।

**उदा -** १९७५ - पञ्चसप्तत्युत्तरैकोनविंशतिशतम्

१. १०५० -

२. ११८ -

३. १२६०० -

४. ६२८३२ -

५. २०,००० -

## इ) चक्रस्य आधारेण वाक्यानि रचयन्तु ।

**उदा -** संवत्सरे द्वे अयने स्तः।

________________________

________________________

________________________

________________________

________________________

________________________

________________________

________________________




## V. सर्जनात्मकता

अ) आर्यभटविषये वयं ज्ञातवन्तः खलु ! एवं भवदभिज्ञातं भारतीयवैज्ञानिकं, तस्य सिद्धान्तम् उद्दिश्य लिखन्तु ।

आ) अधः दत्तम् अनुच्छेदं पठित्वा संस्कृतभाषया अनुवदन्तु ।

భారతీయశాస్త్రజ్ఞులలో జగదీశ్ చంద్రబోస్ ఒకరు. అతడు చెట్లకు జీవం ఉన్నదని నిరూపించాడు. చెట్లు కూడా ఆనందాన్ని బాధను వ్యక్తపరుస్తాయి అని నిరూపించాడు. ఇతన్ని రేడియోవిజ్ఞానంలో పితామహునిగా పేర్కొంటారు. వృక్షభౌతికశాస్త్రంలో కొన్ని అద్భుతమైన ఆవిష్కారాలు చేశాడు.

## VI. प्रशंसा

आर्यभटः खगोलगणितशास्त्रविज्ञाने बहून् विषयान् निरूपितवान् । तस्य प्रयत्नं पञ्चवाक्यैः प्रशंसन्तु ।

SCERT TELANGANA

## VII. भाषांशाः

### अ) अधः दत्तानि वाक्यानि पठन्तु । रेखाङ्कितपदानि परिशीलयन्तु ।

१. चन्द्रः पूर्णिमायामत्यन्तं शोभते - चन्द्रः पूर्णिमायामत्यन्तं शोभमानः अस्ति ।

२. शिशुः प्रतिदिनं वर्धते । - शिशुः प्रतिदिनं वर्धमानः अस्ति ।

३. लता सर्पं दृष्ट्वा कम्पते । - लता सर्पं दृष्ट्वा कम्पमाना अस्ति ।

४. ललिता मातरं दृष्ट्वा मोदते । - ललिता मातरं दृष्ट्वा मोदमाना अस्ति ।

५. रात्रौ नक्षत्रं प्रकाशते । - नक्षत्रं रात्रौ प्रकाशमानम् अस्ति ।

६. मित्रं स्पर्धते । - मित्रं स्पर्धमानम् अस्ति ।

७. नवरत्नेषु वज्रमत्यन्तं भासते । - नवरत्नेषु वज्रमत्यन्तं भासमानं भवति ।

एतेषु वाक्येषु रेखाङ्कितानि पदानि **शानच्प्रत्ययान्तानि** । आत्मनेपदिनां धातूनामेव वर्तमानकालार्थे शानच्प्रत्ययः भवति । एषः त्रिषु लिङ्गेषु भवति ।

### आ) उदाहरणानुसारं शानजन्तरूपाणि त्रिषु लिङ्गेषु लिखन्तु ।

| | | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|
| **उदा -** | **वन्दते -** | वन्दमानः | वन्दमाना | वन्दमानम् |

१. सेवते २. विद्यते ३. शोभते

४. लभते ५. वर्धते ६. ईक्षते

**परियोजनाकार्यम्** **अधः निर्दिष्टानुसारं तथ्यानि सङ्कलय्य तेषां पट्टिकां लिखन्तु ।**

| क्र.सं | नाम | कालः | आविष्कारः |
|---|---|---|---|
| १. | आर्यभटः | क्री.श.५ | खगोलगणितशास्त्रे |
| २. | | | |
| ३. | | | |
| ४. | | | |
| ५. | | | |

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. अद्यतनभारतीयवैज्ञानिकप्रगतिम् उद्दिश्य वक्तुं शक्नोमि । | | |
| २. पाठस्य सारांशं स्वीयवाक्यैः वक्तुं शक्नोमि । | | |
| ३. कठिनपदानां प्रयोगं स्वीयवाक्यैः कर्तुं शक्नोमि । | | |
| ४. एकमपरं वैज्ञानिकमुद्दिश्य स्वीयवाक्यैः लेखितुं शक्नोमि । | | |

SCERT TELANGANA

पठन्तु - नन्दन्तु

# प्रशंसायाः प्राप्त्यर्थम्.....

द्वितीयः भागः

पुरा कश्चन मूर्तिकारः आसीत् । सः स्वपुत्रम् अपि उत्तममूर्तिनिर्मातारं कर्तुम् इच्छति स्म । अतः सः महता श्रमेण पुत्रं मूर्तिनिर्माणकलाम् अशिक्षयत् । अनन्तरकाले पुत्रेण अपि मूर्तिनिर्माणकार्यम् आरब्धम् । पुत्रेण निर्मिताः मूर्तयः सुन्दर्यः उत्कृष्टाः च भवन्ति स्म । जनाः तेन निर्मितानां मूर्तीणां प्रशंसां कुर्वन्ति स्म । अचिरात् एव तस्य कीर्तिः सर्वासु दिक्षु प्रसृता ।

किन्तु पिता तेन निर्मितासु मूर्तिषु कमपि दोषं पश्यति स्म एव । पितुः प्रशंसा प्राप्तव्या एव इति निश्चित्य पुत्रः अधिकया श्रद्धया मूर्तिनिर्माणम् करोति स्म । तस्मात् तस्य कौशलं पूर्वापेक्षया अपि प्रवृद्धम् । अतिसूक्ष्माणाम् अंशानां विषये अपि सः अवधानं दत्त्वा मूर्तीः निर्माति स्म । तथापि पिता तु एकमपि प्रशंसावचनं न वदति स्म । पितुः प्रशंसा कथमपि प्राप्तव्या एव इति पुत्रः विशेषप्रयासं करोति स्म । किन्तु तस्य इच्छा कदापि सफला न जाता ।



कदाचित् पुत्रः महता परिश्रमेण एकां मूर्तिं निर्माय मित्रेण तां पितुः समीपं प्रेषितवान्, पितुः प्रतिस्पन्दं ज्ञातुं रहसि स्थितवान् च । पिता तां मूर्तिं दृष्ट्वा महान्तं सन्तोषं प्रकटयन् - ''अहो ! परमसुन्दरी मूर्तिः एषा !! एतां निर्मितवान् कलाकारः निश्चयेन अस्ति उत्कृष्टः। एतादृशी प्रतिभा लोके विरला एव'' इति प्रशंसावचनानि उक्तवान् ।

एतत् श्रुत्वा नितरां सन्तुष्टः पुत्रः रहस्यस्थानात् बहिः आगत्य सगर्वम् अवदत् - ''पितः! एषा मूर्तिः मया निर्मिता । अद्य भवता मया निर्मितायाः मूर्तेः प्रशंसा करणीया एव अभवत् । उत्कृष्टताकारणतः भवान् अत्र एकमपि दोषं दर्शयितुं न शक्तः''।

पुत्रस्य मुखं निर्निमेषं दृष्ट्वा पिता क्षणात् अनन्तरं सविषादम् अवदत् - ''वत्स ! सर्वदा स्मर्तव्यं यत् गर्वः उन्नतेः बाधकः इति । सः सफलताद्वाराणि सर्वाणि पिदधाति । मया अद्यपर्यन्तं भवतः प्रशंसा न कृता इत्यतः भवतः गुणवत्तायाः वृद्धिः जाता । मम प्रशंसायाः प्राप्त्यर्थं भवता, अहोरात्रं कार्यं कृतम् । एतस्मात् भवतः कौशलं प्रवृद्धम् । मम प्रशंसायाः प्राप्त्यर्थम् एव भवता अद्य यदि एवं कृतं स्यात् तर्हि निश्चितं यत् एतत् भवतः प्रगतेः अवरोधं कुर्यात् इति''।

पितुः वचनं श्रुत्वा पुत्रः महतीं लज्जां प्राप्नोत् । स्वस्य दोषम् अवगत्य सः पितरं क्षमाम् अयाचत ।

तृतीयः भागः

# ७. बृहत्कथावृत्तान्तम्

## पठन्तु, विचिन्त्य वदन्तु

| | | |
|---|---|---|
| पौत्री | - | पितामह ! भवान् प्रतिदिनं कथामेकां वदति खलु ! अद्यापि कृपया कथामेकां वदतु । |
| पितामहः | - | कां कथां वदामि ? अद्य यावत् बहुकथाः अवदम् खलु ! |
| पौत्री | - | कथाः मह्यं बहु रोचन्ते । किन्तु अद्य सामान्यकथां न, विशेषकथामिच्छामि । |
| पितामहः | - | विशेषकथां वा ? अस्तु कथानां कथामेव वदामि । |
| पौत्री | - | पितामह ! विशेषकथायाः श्रवणे मम बहुकुतूहलम् । शीघ्रं प्रारभताम् । |
| पितामहः | - | 'यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।<br>कथाच्छलेन बालानां नीतिस्तदिह कथ्यते' ॥ |
| भावः | - | यथा नूतने पात्रे संलग्नस्य संस्कारः विपरीतः न स्यात् । तथा बालानां कृते कथाव्याजेन नीतिबिषयः बोध्यते । |

## प्रश्नाः

१. पौत्री प्रतिदिनं पितामहं किं पृच्छति ?

२. पितामहः पौत्र्यै कीदृशीं कथां वक्तुम् इष्टवान् ?

३. पितामहः कथानां कथा इत्यवदत् । तादृशी कथा अस्तीति जानाति किम् ?

४. श्लोके कथाव्याजेन कः विषयः बोध्यते .

**उद्देश्यम्**

★ कथाभिः मनोरञ्जनप्राप्तिः।

★ कथाभिः नैतिकमूल्यानाम् आचरणाय प्रेरणाप्रदानम् ।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।

२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।

३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

प्रायशः ईसवीयद्वितीयशताब्दी शातवाहनानां राज्यपालनसमयः। हालशातवाहनचक्रवर्ती राज्यं पालयति स्म । तस्यास्थाने संस्कृतप्राकृतभाषयोः समादरः आसीत् । राजा तु प्राकृतभाषाभिमानी तद्वेत्ता च। किन्तु स संस्कृतज्ञानी न । तस्य भार्या संस्कृतविदुषी ।

एकदा प्रवृत्ते वसन्तोत्सवे सुगन्धद्रव्यजलैः ताडयन्तं राजानं हालं राज्ञी ''मोदकैस्ताडय'' इति न्यवारयत् । 'मा उदकैः ताडय' इति तदीयवाक्यार्थः। किन्तु संस्कृतज्ञानशून्यः राजा ''मुद्गतण्डुलचूर्णमिश्रितैः मोदकैः ताडय'' इति वाक्यार्थमवागच्छत् । अतः स मोदकान् आनीतवान् । तद्दृष्ट्वा राज्ञी तं राजानं परिहसितवती । अवमानभारेण हालशातवाहनेन तदैव निश्चितं यत् अचिरेणैव कालेन कथञ्चित् संस्कृतज्ञो भवेयम् इति ।

अनन्तरदिने सभायाम् उपविष्टानां संस्कृतपण्डितानां सम्मुखं सः स्वाभिलाषं प्राकटयत् । सभायां 'गुणाढ्यः' नामकः कश्चन महाकविः आस्थानपण्डितः आसीत् । सः अहं षड्वर्षेषु राजानं संस्कृतज्ञं करिष्यामि इत्यवदत् । अन्यः 'शर्ववर्मा' इति नाम कश्चन पण्डितः ''अहं षण्मासेषु भवन्तं संस्कृतज्ञं करिष्यामि'' इति सोत्साहमवोचत् । तेन तयोः द्वयोः पण्डितयोः मध्ये वाग्विवादः प्राचलत्। तदा गुणाढ्यः ताडितभुजङ्ग इव शर्ववर्मणः वचनम् असहमानः सरोषं ''यदि त्वं तथा करिष्यसि तर्हि अहं संस्कृतप्राकृतभाषे त्यक्ष्यामि । ताभ्यां भाषाभ्यां सम्भाषणमपि न करिष्यामि'' इति भीषणप्रतिज्ञामकरोत् । तदा तस्य भीषणप्रतिज्ञां श्रुत्वा सभा विभ्रान्ता अभवत् ।



शर्ववर्मा स्वमेधाशक्त्या 'कातन्त्रं' नाम विशिष्टं व्याकरणं रचयित्वा तदाधारेण राजानं स्वप्रतिज्ञानुसारं षण्मासैः संस्कृतज्ञम् अकरोत् ।

प्रतिज्ञानुसारं गुणाढ्यः तत्क्षणे

SCERT TELANGANA

एव स्वस्थलं, स्वजनं, सर्वं विहाय विन्ध्यविपिनं प्रविश्य संस्कृत-प्राकृतभाषाभ्यां सर्वमपि व्यवहारम् अत्यजत् । ततस्सः 'भूतभाषेति' व्यवहृतां प्राकृतभेदेन विलसितां 'पैशाची' भाषामभ्यस्तवान् ।

तस्मिन्नेव महारण्ये शापभ्रष्टः 'काणभूतिः' नाम पिशाचः वसति स्म । तेन काणभूतिना गुणाढ्यं प्रति 'नरवाहनदत्तादिगान्धर्वकथाः' श्राविताः । तासां कथानां कथनमात्रेणैव स शापविमुक्तो भूत्वा ततः निरगच्छत् ।

गुणाढ्यः तावत्पर्यन्तं लोकव्यवहारे प्रचलिताः सप्तकथाः पैशाचीभाषया सप्तलक्षात्मकश्लोकैः निबध्य बृहत्कथां संरच्य महाराजमदर्शयत्। ग्रन्थस्य विशिष्टतामजानन् स राजा तं ग्रन्थमनवलोक्यैव तिरश्चकार । अतर्कितेन परिहासेन परिभूतः गुणाढ्यः आशोपहतः अभवत् ।

अत्यन्तं श्रमेण संरचितां स्वकथां व्यर्थां मन्यमानः सः एकैकां कथाम् उच्चैः वाचयन् तत्तालपत्रग्रन्थम् अग्नौ न्यक्षिपत् । ताः कथाः शृण्वन्तः सर्वे पशुपक्ष्यादयः अरण्यजीविनः आहारविहारादीन् अत्यजन् । कृशानां जन्तूनां वृत्तान्तं श्रुत्वा राजा हालः बृहत्कथायाः 'रसास्वादनेनैव अरण्यजीविनः आहारं त्यक्तवन्तः' इति ज्ञातवान्। कृतोन्मीलितनयनः राजा सत्वरमेव विपिनमागत्य गुणाढ्यं काव्यज्वालनकार्यात् न्यवारयत् । स्वापराधाय क्षमां च अयाचत।



तावति काले षट्कथाः अग्निदग्धाः अभवन् । तदा 'लक्षश्लोकनिबद्धा' एका कथैव अवशिष्टा । महाराजः हालः तस्याः अवशिष्टकथायाः प्रचुरप्रचारम् अकारयत् ।

यद्यपि सा पैशाच्या भाषया विलिखिता कथा इदानीं नोपलभ्यते तथापि संस्कृतानुवादेन सा कथा उपलभ्यते एव । सा कथा पण्डितसोमदेवेन 'कथासरित्सागर'नाम्ना संस्कृतेन अनूदिता। ततःपरं इयं संस्कृतकथा अनेकप्रान्तीयभाषाभिः अनूदिता च । तत्कथापठनम् अस्माकं सौभाग्यम् ।



तादृशीभिः लोकोत्तरकथाभिः संशोभिता संस्कृतभाषा अस्माकं रसनाग्रेषु चिरं विलसतु । सम्प्रति प्रचारे स्थितानां कथानां बह्वीनां मूलग्रन्थः अयं कथासरित्सागर एव ।

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) श्रुतां कथां स्वीयवाक्यैः वदन्तु ।

आ) कथायाः महत्त्वं किम् ?

इ) अधिकभाषाणां ज्ञानेन के उपयोगाः भवन्तीति अंशम् उद्दिश्य कक्ष्यायां चर्चां कुर्वन्तु ।

ई) कथाश्रवणेन कानि प्रयोजनानि भवन्ति ?

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) अधः दत्तानि पदानि दृष्ट्वा तत्सम्बद्धमनुच्छेदं पठित्वा तेषां पदानामधः रेखाङ्कनं कुर्वन्तु । अनुच्छेदसङ्ख्यामपि लिखन्तु ।

१. ताडितभुजङ्ग इव
२. कथनमात्रेणैव
३. संस्कृतप्राकृतभाषयोः
४. आहारविहारादीनत्यजत्
५. रसनाग्रेषु
६. अनेकप्रान्तीयभाषासु
७. विन्ध्यविपिनम्

आ) अधः दत्तानि वाक्यानि कः कं प्रति वदतीति लिखन्तु ।

| | कः | कं प्रति |
|---|---|---|
| १. मोदकैस्ताडय । | | |
| २. नरवाहनदत्तादिगान्धर्वकथाः | | |
| ३. अहं षण्मासेषु भवन्तं संस्कृतज्ञं करिष्यामि । | | |
| ४. अहं मम संस्कृतप्राकृतभाषे त्यक्ष्यामि । | | |

इ) घटनाक्रमानुसारं लिखन्तु ।

१. शर्ववर्मा कातन्त्रं नाम व्याकरणग्रन्थस्य साहाय्येन षण्मासेषु महाराजं हालं संस्कृतज्ञमकरोत् ।
२. सोमदेवः बृहत्कथां कथासरित्सागरनाम्ना संस्कृतेन अनूदितवान् ।
३. राज्ञी मोदकैस्ताडय इति राजानमवदत् ।
४. काणभूतिः नाम राक्षसः गुणाढ्यं कथाः श्रावितवान् ।
५. शातवाहनचक्रवर्ती हालः राज्यं पालयति स्म ।
६. गुणाढ्यः उच्चैः तालपत्रस्थकथाः वदन् अग्नौ न्यक्षिपत् ।
७. अरण्यजीविनः आहारं त्यक्त्वा कथाः शृण्वन्तः अतिष्ठन् ।
८. तस्मिन् काले संस्कृतप्राकृतभाषयोः आदरः आसीत् ।



SCERT TELANGANA

**ई) अधः ग्रन्थानां नामानि दत्तानि सन्ति । तान् ग्रन्थानुद्दिश्य एकैकं वाक्यं लिखन्तु ।**

१. कातन्त्रम्
२. बृहत्कथा
३. कथासरित्सागरः

**उ) यथोचितं योजयन्तु ।**

| | |
|---|---|
| शर्ववर्मा | कथासरित्सागरः |
| काणभूतिः | बृहत्कथा |
| गुणाढ्यः | पैशाचीभाषा |
| सोमदत्तः | कातन्त्रम् |

**ऊ) अधः दत्तम् अनुच्छेदं पठित्वा प्रश्नानां समाधानानि लिखन्तु ।**

एकस्मिन् वटवृक्षे द्वौ शुकौ निवसतः । एकः व्याधः जालं प्रसार्य द्वौ शुकौ बन्धितवान् । मार्गे सः व्याधः गच्छन् एकस्य साधोः कृते एकं शुकम्, अन्यं शुकं तस्करस्य कृते विक्रीतवान् । साधुः स्वनिकटे स्थितस्य शुकस्य नाम रामः इति, तस्करः स्वनिकटे स्थितस्य शुकस्य नाम दुर्मुखः इति स्थापितवन्तौ । रामशुकस्य साधुसहवासेन सद्गुणाः, तस्करसहवासेन दुर्मुखस्य दुष्टगुणाः समागताः। एवं प्रकारेण परेषां साहाय्यं कुर्वन् रामशुकः, अन्यान् पीडयन् दुर्मुखः च जीवनं यापितवन्तौ ।

१. साधोः समीपे स्थितस्य शुकस्य नाम किम् ?
२. तस्करस्य समीपे स्थितस्य शुकस्य नाम किम् ?
३. राम-दुर्मुखनामकशुकयोर्मध्ये को भेदः ?
४. अस्य अनुच्छेदस्य शीर्षिकां सूचयन्तु ।

**ऋ) अधः दत्तानां प्रश्नानां समाधानानि पाठात् चित्वा लिखन्तु ।**

१. गुणाढ्यः काः भाषाः जानाति ?
२. राज्ञी किमर्थं राजानं परिहसितवती ?
३. गुणाढ्यशर्ववर्मणोः मध्ये संवादः किमर्थमभवत् ?
४. पशुपक्षिणः क्षीणाः किमर्थमभवन् ?
५. बृहत्कथायाः रचना कथमभवत् ?

## III. स्वीयरचना

**अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।**

१. कुपितः गुणाढ्यः पैशाचीभाषामभ्यस्तवान् । तयैव भाषया एकं ग्रन्थमपि रचितवान् । तस्याः घटनायाः सांरांशः कः?
२. महाराजः हालः शर्ववर्मणः साहाय्येन षण्मासेषु संस्कृतज्ञानं सम्पादितवान् । भवान् कतिमासेषु संस्कृतज्ञानं प्राप्नोति ?
३. भवान् भवतः मित्रं कथं संस्कृतं पाठयति ?

SCERT TELANGANA

### आ) अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. कथायाः भावं सरलवाक्यैः लिखन्तु ।

२. पाठस्थानां पात्राणां स्वभावं स्वीयवाक्यैः लिखन्तु ।

## IV. पदजालाभिवृद्धिः

### अ) अधः दत्तं परिच्छेदं पठन्तु ।

एकत्र बृहत् विपिनम् आसीत् । तस्मिन् अरण्ये अनेके सिंहाः, गजाः, व्याघ्राः स्नेहेन वसन्ति स्म । तस्मिन्नेव कानने बहुविधवृक्षाः आसन् । एकः मानवः ताम् अटवीम् आगत्य तेषाम् अन्योन्यजीवनं दृष्ट्वा मुदितः अभवत् ।

**- उपरितनपरिच्छेदे विपिनस्य पर्यायपदानि सन्ति । तथैव अधः दत्तानां पदानां पर्यायपदानि विलिख्य वाक्यानि रचयन्तु ।**

१. सर्पः

२. शशाङ्कः

३. जलम्

४. निष्णातः

### आ) अधः रेखाङ्कितानि पदानि दृष्ट्वा तानि पदानि उपयुज्य पुनः नूतनवाक्यानि रचयन्तु ।

१. हालः गाथासप्तशतीम् अरचयत् ।

२. गुणाढ्यः हालस्य आस्थानपण्डितः आसीत् ।

३. शर्ववर्मा स्वमेधया कातन्त्रव्याकरणग्रन्थम् अलिखत् ।

४. गुणाढ्यः पैशाचीभाषाम् अभ्यस्तवान् ।

### इ). अधः दत्तेषु पदेषु असङ्गतपदस्य अधः रेखाङ्कनं कुर्वन्तु ।

१. गाथासप्तशती, कातन्त्रम्, बृहत्कथा, मोदकम् ।

२. गुणाढ्यः, हालभार्या, शर्ववर्मा, हालः ।

३. संस्कृतम्, हिन्दी, प्राकृतम्, पैशाची ।

४. आसीत्, अवदत्, शृण्वन्ति, अलिखत् ।

## V. सर्जनात्मकता

१. पाठस्थकथां संवादरूपेण लिखन्तु ।

२. अधः दत्तं परिच्छेदं संस्कृतभाषया अनुवदन्तु ।

సంస్కృత భాషలో వివిధ విషయములతో కూడిన అనేకమైన గ్రంథాలు ఉన్నాయి. ఆ గ్రంథ పఠనం ద్వారా మానవులు విశిష్టమైన జ్ఞానాన్ని పొందుచున్నారు. ఈ సంస్కృత భాషయే అనేక ప్రపంచభాషలకు ఆధారమై విలిసిల్లుచున్నది. ప్రాచీనసాహిత్యము ఆధునిక సాహిత్యానికి ఆదర్శమైనది.

SCERT TELANGANA

## VI. प्रशंसा

हालस्य स्फूर्तिम् उद्दिश्य भवान् किं वदति ?

## VII. भाषांशाः

### अ) सन्धिं कृत्वा सन्धिनाम निर्दिशन्तु ।

| | | | | |
|---|---|---|---|---|
| १. | स्व | + | अपराधः | - |
| २. | त्यक्त | + | आहारविहारः | - |
| ३. | क्षमा | + | अर्पणम् | - |
| ४. | रसना | + | अग्रेषु | - |
| ५. | प्रतिज्ञा | + | अनुसारं | - |
| ६. | आशा | + | उपहतः | - |
| ७. | लोक | + | उत्तरकथाः | - |
| ८. | न | + | उपलभ्यते | - |
| ९. | स | + | उत्साहम् | - |

### आ) अधः दत्तानां विग्रहवाक्यानां समस्तपदानि लिखन्तु ।

१. स्वस्य अभिलाषः
२. भाषायाः अभिमानी
३. महान् च असौ कविश्च
४. महान् च असौ राजा च
५. संस्कृतं जानाति इति ।

### इ) अधः दत्तानि वाक्यानि पठन्तु ।

सीता जलं हरति ।

भीमः दुर्योधनं प्रहरति ।

सा पुण्यम् आहरति ।

रामः रावणं संहरति ।

सर्वे चन्द्रिकायां विहरन्ति ।

गुरुः संशयं परिहरति ।

- अत्र एकमेव क्रियापदमस्ति । हरति इति ।
- क्रियापदस्य पुरतः प्र, आ, सं, वि, परि इत्यादयः सन्ति खलु !
- उपरि उदाहरणेषु स्थितस्य 'हरति' इति क्रियापदस्य पुरतः स्थितानि **उपसर्गाः** इत्युच्यन्ते । उपसर्गयोजनेन क्रियापदानाम् अर्थः विपरिणमते ।

SCERT TELANGANA

प्रादयः उपसर्गाः द्वाविंशतिः सन्ति ।

**प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, अभि, सु, उत्, प्रति, परि, उप** इति ।

**ई) अधः दत्तेषु वाक्येषु रेखाङ्कितानि क्रियापदानि अवगच्छन्तु । तेषां क्रियापदानां समुचितान् उपसर्गान् उपयुज्य रिक्तस्थानानि पूरयन्तु ।**

अ. वानरः वृक्षस्य शाखायां वर्तते ।

अद्य मम विद्यालये सांस्कृतिककार्यक्रमः .................।

आ. बालः मार्गे धावति ।

रक्षरभटं दृष्ट्वा चोरः .........................।

इ. परिश्रमेण अङ्गानि सीदन्ति ।

स्तोत्रैः देवाः ......................।

ई. सदानन्दः मातरं श्रद्धया नमति ।

दुग्धं दधिरूपेण ...................।

उ. नारायणः कन्दुकं क्षिपति ।

रक्षकभटः चोरम् .....................।

## परियोजनाकार्यम्

१. भवतः विद्यालयीयग्रन्थालये स्थितानां संस्कृतपुस्तकानां नामानि सङ्गृह्य सूचीं कुर्वन्तु ।

२. सङ्गृहीतेभ्यः कथापुस्तकेभ्यः एकां कथां सुन्दरैः वर्णाक्षरैः भित्तिपत्रे लिखित्वा आनयन्तु । प्रदर्शयन्तु ।

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. पाठं धारालतया पठितुं शक्नोमि । | | |
| २. गुणाढ्यस्य कथां स्वीयवाक्यैः वक्तुं शक्नोमि । | | |
| ३. पाठस्थकठिनपदानामर्थाः ज्ञाताः । तेषाम् अर्थान् उपयोक्तुं शक्नोमि । | | |
| ४. कथां सम्भाषणरूपेण लेखितुं शक्नोमि । | | |

SCERT TELANGANA

तृतीयः भागः

# ८. पुरस्कारः

## चित्रं पश्यन्तु, विचिन्त्य वदन्तु



### प्रश्नाः

१. चित्रे का कथा वर्णिता अस्ति ?

२. एषा कथा कुत्र वर्तते ?

३. एतस्य काव्यस्य विषये भवन्तः किं जानन्ति ?

### उद्देश्यम्

संस्कृतकथापठने अभिरुचेः विकासः।
कथानां पठनेन मनोविनोदः।
पाठमाध्यमेन लेखस्वरूपविवेचनम् ।
पुस्तकसमीक्षालेखनकौशलविकासः ।

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।




SCERT TELANGANA

**विश्वनाथपुरम्,**
**१२.०८.१२**

**मित्र ! श्रीराम !**

अहमत्र कुशली । भवानपि तत्र कुशली इति भावयामि । बहुकालतः भवतः सकाशात् कापि वार्तैव नास्ति ।

श्रावणपूर्णिमायां संस्कृतदिनोत्सवं पुरस्कृत्य मम पाठशालायां 'निबन्धलेखनस्पर्धा' आयोजिता । तस्यां स्पर्धायां प्रथमः पुरस्कारः प्राप्तः मया । अस्माकं प्रधानोपाध्यायः पुरस्काररूपेण 'पञ्चतन्त्रं' नामकं पुस्तकम् अदात् । अहं तत् पुस्तकं दिनद्वये एव पूर्णतया अपठम् । तत्पठनसमये प्राप्ताम् अनुभूतिं वचसा वक्तुं न पारयामि । किन्तु पुस्तकस्य वैशिष्ट्यम् अवश्यं वक्तुमिच्छामि ।

संस्कृतसाहित्ये अत्यन्तं प्रसिद्धः कथाग्रन्थः पञ्चतन्त्रम् । अस्मिन् काव्ये पञ्चाध्यायाः सन्ति । मित्रसम्प्राप्तिः, मित्रभेदः, काकोलूकीयं, लब्धप्रणाशम्, अपरीक्षितकारकम् इति तेषाम् अध्यायानां नामानि। इमानि नामानि कथानुगुणं दत्तानि । उत्तममित्राणां लक्षणानि कानि, कुमित्राणि कपटभावेन मैत्रीं कृत्वा कथं वञ्चयन्ति, अनालोचितकार्यकरणेन के अनर्थाः भवन्ति इत्यादिविषयाः विविधकथाभिः सुष्ठु वर्णितास्सन्ति

अस्मिन् कथाग्रन्थे । प्रत्येकस्यां कथायाम् अनेकाः उपकथाः भवन्ति इत्ययम् अन्यः विशेषः अस्य ।

एतत् पञ्चतन्त्रं महापण्डितेन विष्णुशर्मणा विरचितम् । एतस्य विषये एषा कथा श्रूयते । 'महिलारोप्यनगर्याम् अमरशक्तिः नाम राजा आसीत् । तस्य पुत्राः अविवेकिनः, लौकिकज्ञानशून्याः च आसन् । तान् राजपुत्रान् राजनीतिशास्त्रपारङ्गतान् कर्तुं राजा विष्णुशर्माणं न्ययोजयत् । महाराजस्य आज्ञां पालयता विष्णुशर्मणा इदं पञ्चतन्त्रं रचितम्' । अस्मिन् अनेके नीतिविषयाः मनोरञ्जककथाभिः सुनिरूपितास्सन्ति । आसां कथानां श्रवणेन षण्मासाभ्यन्तरे राजकुमाराः नीतिनिपुणाः, कुशाग्रबुद्धयश्च सञ्जाताः इति प्रसिद्धिरस्ति । अत्र सर्वासु कथासु संवर्णितानि पात्राणि पशुपक्ष्यादयः एव इत्यन्यो विशेषः अस्य ग्रन्थस्य । ते मनुष्यभाषया एव भाषन्ते, ते भिन्नसमस्यानां परिष्कारानपि सूचयन्ति । वयमेतासां कथानां पठनसमये कार्टून् चित्रस्य दर्शनानुभूतिं प्राप्नुमः। आधुनिककार्टून् चित्राणां मूलरूपेण कश्चन ग्रन्थः द्विसहस्रवर्षेभ्यः पूर्वमेव रचितः इत्यंशः मयि आश्चर्यं जनयति ।



पात्राणां नामान्यपि तेषां स्वभावबोधकान्येव । यथा काकस्य 'लघुपतनकः', 'मेघवर्णः' इति, वञ्चकस्य जम्बुकस्य 'दुष्टबुद्धिः' इति, चित्रवर्णकण्ठस्य कपोतस्य 'चित्रग्रीवः' इति, मन्दगमनस्य कूर्मस्य 'मन्थरकः' इति सार्थकनामानि वयं पश्यामः। एवमत्र प्रत्येकमपि पशुः पक्षी वा तस्य स्वभावप्रकटनेन नीतिं बोधयति । पठनसमये काठिन्यं कुत्रापि न दृश्यते । सकलनीतिशास्त्रसारः अस्मिन् वर्णितः। कविना विष्णुशर्मणा स्वयमेवोक्तम् -

''सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम् ।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् ।।''

इदं पञ्चतन्त्रम् बहुभिः भाषाभिः अनूदितम् इति अस्माकम् अध्यापकेन उक्तम् । एतदेव ग्रन्थस्यास्य प्रामुख्यं बोधयति ।

एतत् पुस्तकं भवते प्रेषयामि । भवान् अपि अस्य पठने महान्तमाह्लादं प्राप्स्यतीति मम विश्वासः। शीघ्रमेव पुस्तकं पठित्वा भवतः अभिप्रायं मामवश्यं सूचयतु । भवतः परिवारस्य क्षेमवार्तां च सूचयतु ।

**इति भवतः प्रियमित्रम् ,**
**साकेतः ।**

# एतानि कुर्वन्तु

## I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) केषु सन्दर्भेषु लेखः लिख्यते ?

आ) लेखलेखनावसरे अवधेयाः अंशाः के ?

इ) 'पञ्चतन्त्रम्' इति कीदृशः ग्रन्थः ?

ई) पञ्चतन्त्रसदृशस्य कस्यापि एकस्य कथापुस्तकस्य नाम वदन्तु ।

उ) पञ्चतन्त्रसम्बद्धां कामपि एकां कथां वदन्तु ।

## II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठं पठित्वा नामवाचकपदानाम् अधः रेखाङ्कनं कुर्वन्तु ।

आ) अधः दत्तानि वाक्यानि पठित्वा तत्समानार्थकवाक्यानि पाठात् चित्वा लिखन्तु ।

1. నేనిక్కడ క్షేమమే.
2. అధ్యాయముల పేర్లు కథలకు అనుగుణంగా ఉన్నవి.
3. నీవు కూడా దీన్ని చదవడం వల్ల ఎంతో ఆహ్లాదం పొందుతావు.
4. చదువుతున్న సమయంలో ఏ ఆనందాన్ని పొందానో ఆ ఆనందాన్ని మాటలలో చెప్పలేకపోతున్నాను.
5. పాత్రల పేర్లు వాటి స్వభావాన్ని చెప్పే విధంగా ఉంటాయి.

इ) यथोचितं योजयन्तु ।

| | |
|---|---|
| काकः | दुष्टबुद्धिः |
| जम्बुकः | मन्थरकः |
| कपोतः | मेघवर्णः |
| कूर्मः | चित्रग्रीवः |

## ई) अधः दत्तस्य अंशस्य पुरतः तस्य सन्दर्भं लिखन्तु ।

**उदा** - साकेतः पुरस्कारं प्राप्तवान् - निबन्धलेखनस्पर्धायां प्रथमस्थानं प्राप्तवान् ।

१. विष्णुशर्मा ग्रन्थं लिखितवान् ।

२. पञ्चतन्त्ररचनाविषये कथा अस्ति ।

३. राजकुमाराः षण्मासेषु कुशाग्रबुद्धयः अभवन् ।

४. साकेतः लेखं लिखति ।

५. संस्कृतदिनोत्सवे स्पर्धा आयोजिता ।

६. ग्रन्थस्यास्य लेखनं बहुपूर्वमभवदिति आश्चर्यमनुभवामि ।

## उ) अधः दत्तानां प्रश्नानां समाधानानि लिखन्तु ।

१. पञ्चतन्त्रे कति तन्त्राणि सन्ति ?

२. पञ्चतन्त्रं किमर्थं रचितम् ?

३. के विषयाः पञ्चतन्त्रे वर्णिताः सन्ति ?

४. साकेतः कस्यां स्पर्धायां भागं गृहीतवान् । तत्र कं पुरस्कारं प्राप्तवान् ?

५. पाठे एकः श्लोकः दत्तः अस्ति । तस्य भावं लिखन्तु ।

# III. स्वीयरचना

## अ. अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. लेखलेखनसमये आरम्भे सम्बोधनं कथं भवेत् ?

२. भवन्तः श्रावणपूर्णिमायां किं किं कुर्वन्ति ?

३. संस्कृते लिखितानां पञ्चमहाकाव्यानां नामानि लिखन्तु ?

४. भवन्तः विद्यालयस्य कासु स्पर्धासु भागं गृह्णन्ति ?

## आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

१. पञ्चतन्त्रमुद्दिश्य स्वीयवाक्यैः लिखन्तु ?

२. संस्कृतदिनोत्सवमुद्दिश्य लेखमेकं लिखन्तु ?

SCERT TELANGANA

## IV. पदजालाभिवृद्धिः

### अ. श्लोकं पठित्वा उदाहरणानुसारेण वाक्यानि रचयन्तु ।

**पापान्निवारयति योजयते हिताय**
**गुह्यं निगूहति गुणान् प्रकटीकरोति ।**
**आपद्गतं च न जहाति ददाति काले**
**सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥**

**उदा -** सन्मित्रं पापात् निवारयति ।

### आ. अधः दत्तायां मञ्जूषायां बहवः शब्दाः दत्ताः सन्ति । तेषां साहाय्येन वाक्यानि रचयन्तु।

| | | | |
|---|---|---|---|
| हे पितः | स्पर्धा | अगस्ट् १५ | गीतगानम् |
| ध्वजवन्दनम् | अतिथिः | ध्वजोत्तोलनम् | तृतीयः पुरस्कारः |
| श्वेतवस्त्राणि | मिष्टान्नम् | कुशली | |

**उदा -** आगस्ट् १५ दिनाङ्के राष्ट्रियध्वजोत्तोलनं भवति ।

### इ. अधः दत्तानि पदानि उपयुज्य एकैकं वाक्यं लिखन्तु ।

**उदा** - **श्रावणपूर्णिमा**

- श्रावणपूर्णिमायां रक्षाबन्धनकार्यक्रमः भवति ।

१. संस्कृतदिनोत्सवः

२. निबन्धलेखनम्

३. संस्कृतसाहित्ये

४. कुशाग्रबुद्धयः

५. कार्टून् चित्राणि

६. दुष्टबुद्धिः

७. अद्भुतम्

८. प्रतिकृतिः

## V. सर्जनात्मकता

### अ) स्वीयविहारयात्रायाः अनुभवं वर्णयन्तः मित्राय लेखमेकं लिखन्तु । लेखरचनायाम् अधः दत्तानां शब्दानाम् उपयोगं कुर्वन्तु ।

| | | | |
|---|---|---|---|
| विहारयात्रा | बस् याने | पञ्चविंशतिः | बालबालिकाः |
| रमणीयं दृश्यम् | मनोरञ्जनम् | वैज्ञानिकाः | शिक्षकः |
| मार्गदर्शनम् | कुशली | स्वानुभवः | नमस्कारः |

### आ) अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

మానవుడు ఉత్తముడు అనిపించుకోవాలంటే రెండు ముఖ్యమైన గుణాలు కలిగి ఉండాలి. ఎక్కడా, ఎవ్వరినీ మనస్సు నొచ్చుకొనేట్టుగా మాట్లాడకుండా ఉండాలి. పాపకార్యాలు చేయకుండా ఉండాలి. ఈ రెండూ జీవితంలో సదా అనుసరిస్తే మానవుడు ఉత్తమమానవుడై రాణిస్తాడు.

## VI. प्रशंसा

१. पञ्चतन्त्रकथाः सर्वाकर्षिकाः। किमर्थम् ?

२. भवन्तः प्रथमपुरस्कारविजेतारं साकेतं कथं प्रशंसन्ति ?

## VII. भाषांशाः

### अ) अधः दत्तानि वाक्यानि पठन्तु, अवगच्छन्तु ।

१. छात्रः धावति । क्रीडाङ्गणं गच्छति ।
छात्रः धावितुं क्रीडाङ्गणं गच्छति ।

२. शिवः जलम् पिबति । पाकशालाम् गच्छति ।
शिवः जलम् पातुं पाकशालाम् गच्छति ।

३. बालकः पठति । पुस्तकं स्वीकरोति ।
बालकः पठितुं पुस्तकं स्वीकरोति ।

४. श्यामः लिखति। परीक्षाकेन्द्रं गच्छति ।
श्यामः लेखितुं परीक्षाकेन्द्रं गच्छति ।

५. बालकः खादति । उपाहारगृहं गच्छति ।
बालकः खादितुम् उपाहारगृहं गच्छति ।

SCERT TELANGANA

★ **उपरि रेखाङ्कितपदानि तुमुन् प्रत्ययान्तानि। धातोः यदा तुमुन् प्रत्ययः क्रियते तदा एतादृशरूपाणि भवन्ति ।**

**उदा -** गम् + तुमुन् - गन्तुम्

पठ् + तुमुन् - पठितुम्

## आ) कोष्ठके विद्यमानानि पदानि दृष्ट्वा उदाहरणानुसारं वाक्यानि रचयन्तु ।

| | | | |
|---|---|---|---|
| | क्रीडति | क्रीडाङ्गणम् | |
| | भ्रमति | उद्यानम् | |
| | अर्चति | देवालयम् | गच्छति |
| शिवरामः | जानाति | महाविद्यालयम् | |
| | क्रीणाति | आपणम् | |
| | पश्यति | चलनचित्रं | |

**उदा -** १. शिवरामः क्रीडितुम् क्रीडाङ्गणं गच्छति ।

### परियोजनाकार्यम्

पठितस्य ग्रन्थस्य समीक्षां विलिख्य प्रदर्शयन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. लेखलेखनक्रमं ज्ञातवान् । मित्राय वक्तुं शक्नोमि । | ☐ | ☐ |
| २. नूतनपदनां प्रयोगं स्वीयवाक्यैः कर्तुं शक्नोमि । | ☐ | ☐ |
| ३. एकां पञ्चतन्त्रकथां वक्तुं शक्नोमि । | ☐ | ☐ |
| ४. विहारयात्रायाः अनुभवं वर्णयन्/वर्णयन्ती मित्राय लेखमेकं लेखितुं शक्नोमि । | ☐ | ☐ |

**न तितिक्षासममस्ति साधनम् ।**

SCERT TELANGANA

तृतीयः भागः

# ९. नारायणगुरुः

## पठन्तु, विचिन्त्य वदन्तु

सुमतिः - मालति ! चन्दमामापुस्तकं दृष्ट्वा किं लिखति ?

मालती - अहं कथायाः प्रश्नान् लिखामि ।

सुमतिः - कथायां प्रश्नाः सन्ति वा ?

मालती - कथां दृष्ट्वा कथं प्रश्नाः करणीयाः इति अभ्यासं करोमि ।

सुमतिः - कापि प्रश्नकरणस्पर्धा अस्ति वा ?

मालती - नैव भोः! अहं वार्ताहारिणी भवितुमिच्छामि। अतः प्रश्नाः कथं करणीयाः इति अभ्यासं करोमि । प्रत्यहम् अध्यापकः एकैकस्य महापुरुषस्य जीवनचरितं पाठयति । तत्र एकः छात्रः बहून् प्रश्नान् पृच्छति । अन्यः समाधानानि ददाति । तेन एकस्य महापुरुषस्य चरितं ज्ञातुं शक्नुमः।

सुमतिः - रोचकमस्ति ।

### उद्देश्यम्

★ वसुधैवकुटुम्बकभावनायाः वर्धनम्, समाजे सर्वे समानाः न्यूनताधिक्ययोः भावना न स्यादिति ज्ञापनम् ।

### प्रश्नाः

१. मालती किं करोति ?
२. प्रश्नाः कथं क्रियन्ते ?
३. मालती किं भवितुमिच्छति ?
४. अध्यापकः केषां जीवनचरितं पाठयति ?

### छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA

(प्रभाकरचन्द्रशेखरौ बाल्यमित्रे । प्रभाकरः कस्मिंश्चित् विद्यालये अध्यापकः अस्ति । चन्द्रशेखरस्तु वार्ताहरः अस्ति । प्रश्नकरणादिवृत्तिजीवनलक्षणानि तस्य स्वाभाविकजीवने अपि परिदृश्यन्ते । सः एकस्मिन् दिने ग्रन्थालये प्रभाकरेण सह मिलति ।)

प्रभाकरः - एकः एव समाजः । एकः एव धर्मः । एकः एव देवः। स एव सर्वान् रक्षति ।



चन्द्रशेखरः - किं पुस्तकं पठति भवान् ?

प्रभाकरः - अहं नारायणगुरोः पुस्तकं पठामि ।

चन्द्रशेखरः - सः कुत्रस्थः?

प्रभाकरः - सः केरलराज्यस्य तिरुवनन्तपुरसमीपस्थस्य 'चम्पाजण्डी' इति ग्रामवासी ।

चन्द्रशेखरः - तस्य विशिष्टता का ?

प्रभाकरः - सः सामाजिकपरिवर्तनाय एकम् उत्तममार्गं दर्शितवान् , महात्मा साधुश्च । सः दीनानां दुःखितानां पीडितानां च सेवाम् अकरोत् । सः तेषां कल्याणाय देवं प्रार्थयति स्म ।

चन्द्रशेखरः - सः देवं किं प्रार्थितवान् ?

प्रभाकरः - ईश्वरकृपा अस्मासु सर्वेषु निरन्तरं भवतु । निर्धनानाम् अन्नार्तानां दुःखं दूरीभवतु । ते अभिवृद्धिं प्राप्नुयुः । प्रतिदिनं तेषाम् उदरपूरणे कष्टं किमपि न भवेत् । एवं नारायणगुरुः प्रार्थितवान् ।

चन्द्रशेखरः - मानवानाम् असमानताविषये तस्य भावना कीदृशी ?

प्रभाकरः - देवस्य सन्निधौ सर्वे समानाः। अन्तर्गतभेदभावं त्यक्त्वा परस्परद्वेषं विहाय अस्माभिः सर्वैः बान्धव्यं निर्मातव्यम् इति तस्य भावना ।

चन्द्रशेखरः - नारायणगुरुः समाजसंस्कर्ता इति भवान् उक्तवान् । सः किमकरोत् ?

प्रभाकरः - तस्य जीवनकाले देशे सर्वत्र दुराचाराः दुरभ्यासाः च अधिकाः आसन् । मानवाः सर्वे समानाः इति भावः विलुप्तः । तदा नारायणगुरुः समाजस्य सर्वैः जनैस्सह मिलित्वा



SCERT TELANGANA

तान्नुनीय तैः सह चर्चां कृत्वा तेषां हृदयानि जयति स्म । एतदर्थं सः केरलदेशे पञ्चदशवर्षाणि पर्यटितवान् ।

चन्द्रशेखरः - पर्यटनसमये सः विशेषतया किं किं कृतवान् ?

प्रभाकरः - अज्ञानिनां जनानां मूढविश्वासान् निवारयितुं विशेषप्रयत्नं कृतवान् । तेषां जीवनपद्धतौ परिवर्तनमानीतवान् ।

चन्द्रशेखरः - नारायणगुरुः विद्याविकासार्थं प्रयतितवान् वा ?

प्रभाकरः - आम् । 'शिवगिरि' नामके स्थाने संस्कृतपाठशालां प्रारब्धवान् । सर्वे जनाः तत्रागत्य संस्कृताध्ययनं वेदाध्ययनं च कर्तुं शक्नुवन्ति स्म ।

चन्द्रशेखरः - मन्दिरेषु सर्वेषां प्रवेशः सर्वत्र नासीत् खलु ! तदर्थं नारायणगुरोः प्रयत्नः कः आसीत् ?

प्रभाकरः - सर्वजातिजनानां मन्दिरप्रवेशकल्पनाय स्वयं नारायणगुरुः अनेकानि मन्दिराणि निर्मितवान्। तस्य प्रयत्नेनैव 'तिरुवान्कूर्' सर्वकारः राज्ञः नाम्ना एकं शासनं निर्माय सर्वेषां मन्दिरप्रवेशार्हताम् अकल्पयत् ।

चन्द्रशेखरः - नारायणगुरोः कापि साहित्यरचना अस्ति किम् ?

प्रभाकरः - नारायणगुरुः उत्तमसंस्कृतपण्डितः । 'जातिमीमांसा' इत्यस्मिन् पुस्तके मानवानां मध्ये भेदभावो नास्ति । भाषायाम् आचारव्यवहारेषु च भेदः स्यात् । सर्वे समानाः भवेयुः। सर्वेषाम् एकैव जातिः। सर्वेषां शरीरनिर्माणरीतिः एकविधा । सर्वेषु एकविधमेव रक्तं प्रवहति इत्यादिकं सः प्राबोधयत् । समसमाजस्थापनमेव तस्य ध्येयम् । तमेव सिद्धान्तं सः सर्वत्र प्रसारितवान् ।

चन्द्रशेखरः - महान् सन्तोषः। नारायणगुरोः प्रयत्नः श्लाघनीयः। ''सर्वे जनाः सुखिनो भवन्तु'' इति प्रार्थनायाः मूलमन्त्रः एष एव । धन्यवादः।

प्रभाकरः - स्वागतम् ।

''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत् ।।''
''।। ओं शान्तिः शान्तिः शान्तिः ।।''

SCERT TELANGANA

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) निर्धनानाम् अन्नार्तानां दुःखं दूरीभवतु । ते अभिवृद्धिं प्राप्नुयुः इति नारायणगुरुः हृदयेन भगवन्तं प्रार्थितवान् । इदानीमपि समाजे तादृशजनाः सन्ति किम् ? तान् अधिकृत्य वदन्तु।

आ) भवान् समाजसंस्कर्ता भवति चेत् किं करोति इति वदतु ।

इ) सामाजिकपरिवर्तनविषये भवतः अभिप्रायः कः?

ई) आधुनिकसमाजे काः समस्याः सन्ति ? तासां परिष्कारोपायाः के ?

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठे प्रश्नवाचकवाक्यानामधः रेखाङ्कनं कुर्वन्तु ।

आ) पाठे विद्यमानानि सर्वनामवाचकपदानि रेखाङ्कितानि कुर्वन्तु ।

इ) अधः दत्तानि वाक्यानि पठन्तु । तत्समानार्थकवाक्यानि पाठे अन्विष्य लिखन्तु ।

१. निर्धनानामन्नार्तानाम् उदरपूरणे कष्टं किमपि न भवेत् ।

२. समाजे सर्वे मानवाः एकविधाः इति भावना नष्टा ।

३. शिवगिरौ वेदाध्ययनव्यवस्था सर्वेभ्यः कल्पिता ।

४. मानवानां सर्वेषां देहस्थितिः एकैव ।

५. सर्वे जीवाः सुखवन्तः भवन्तु ।

ई) पाठं पठित्वा अधः निर्दिष्टवाक्यानि क्रमेण स्थापयन्तु ।

१. सर्वे देवस्य सन्निधौ समानाः ।

२. नारायणगुरोः प्रयत्नेन सर्वेषां मन्दिरप्रवेशः अभवत् ।

३. जातिमीमांसा इत्यस्मिन् पुस्तके मानवानां मध्ये कुलवर्गभेदाः न सन्ति इत्युक्तम् ।

४. शिवगिरौ सर्वेषां विद्याबोधनार्थं संस्कृतपाठशालां प्रारब्धवान् ।

५. सर्वे जनाः सुखिनो भवन्तु ।

६. नारायणगुरुः सामाजिकपरिवर्तनाय एकम् उत्तममार्गं दर्शितवान् ।

७. निम्नजनानां मूढविश्वासनिवारणाय यत्नं कृतवान् ।

SCERT TELANGANA

## उ) अधः दत्तं परिच्छेदं पठित्वा दत्तानां प्रश्नानां समाधानानि चित्वा कुण्डल्यां सूचयन्तु ।

१८३१ वर्षस्य जनवरीमासस्य तृतीयदिवसे महाराष्ट्रे सावित्री अजायत । तस्याः मातापितरौ लक्ष्मीबाई खण्डोजी । नववर्षीया सा ज्योतिबापूले महोदयेन परिणीता । सोऽपि तदानीं त्रयोदशवर्षीयः आसीत् । यतो हि सः स्त्रीशिक्षायाः प्रबलसमर्थकः आसीत् । अतः सावित्र्यां स्थितः अध्ययनाभिलाषः कार्यरूपे परिणमितः अभवत् । सा आङ्ग्लभाषायाः अध्ययनं कृतवती ।

१८४८ तमे वर्षे पूने नगरे सावित्री ज्योतिबामहोदयेन सह कन्यानां कृते विद्यालयम् आरभत। तदानीं सा केवलं सप्तदशवर्षीया आसीत् । १८५१ तमे वर्षे बालिकानां कृते पृथक्तया अपरः विद्यालयः प्रारब्धः।

१. सावित्री कदा जन्म प्राप्तवती ? ( )
   - अ) १८४८ तमे वर्षे   आ) १८३१ तमे वर्षे
   - इ) १८५१ तमे वर्षे   ई) १९४७ तमे वर्षे

२. आरम्भमकरोत् इत्यर्थकं पदं किमस्ति ? ( )
   - अ) अजायत   आ) आसीत्
   - इ) आरभत   ई) अकरोत्

३. सा सप्तदशवर्षीया आसीत् इत्यत्र सा का ? ( )
   - अ. लक्ष्मीबाई   आ. सावित्री
   - इ. ज्योतिबा   ई. दुर्गाबाई

४. अधुना इति पदस्य विरुद्धार्थकं पदम् किम् ? ( )
   - अ) इतः   आ) तदानीम्
   - इ) परम्   ई) ततः

## ऋ ) अधः दत्तानां प्रश्नानां समाधानानि पाठे अन्विष्य लिखन्तु ।

१. नारायणगुरुः कुत्र जन्म लब्धवान् ?

२. कस्य सन्निधौ सर्वे समानाः ?

३. देशे सर्वत्र के के अधिकाः आसन् ?

४. नारायणगुरुः केषां मूढविश्वासान् दूरीकर्तुं यत्नं कृतवान् ?

५. नारायाणगुरुः जनानां हृदयानि कथं जयति स्म ?

६. नारायणगुरोः ध्येयः कः ?

SCERT TELANGANA

## III. स्वीयरचना

### अ .अधः दत्तानां प्रश्नानां समाधानानि स्वीयवाक्यैः लिखन्तु ।

१. अधुना मद्यपानसमस्या अधिका । तस्याः निवारणाय उपायान् सूचयन्तु ।

२. समाजे मूढविश्वासान् दूरीकर्तुं कीदृशं प्रयत्नं करिष्यन्तीति लिखन्तु ।

३. स्त्रीशिक्षायाः प्राधान्यमुक्तवतां महापुरुषाणां नामानि लिखन्तु ।

४. अधुना सर्वकारः समाजे समभावनां कल्पयितुं किं करोति इति विशदयन्तु ।

५. स्त्रियः साक्षराः भवन्ति चेत् समाजस्य के लाभाः भविष्यन्ति इति स्वीयवाक्यैः लिखन्तु ।

### आ. अधः दत्तयोः प्रश्नयोः समाधाने निबन्धरूपेण लिखन्तु ।

६. नारायणगुरोः समाजसेवां स्वीयवाक्यैः लिखन्तु ।

७. ''विद्या सार्वजनीना'' इत्यंशं सूचयन् निबन्धमेकं लिखन्तु ।

## IV. पदजालाभिवृद्धिः

### अ) अधः दत्तानि पदानि उपयुज्य नारायणगुरोः समाजसेवां पुरस्कृत्य वाक्यानि लिखन्तु ।

१. दीनजनसेवा

२. सर्वेषां मन्दिरप्रवेशः

३. मूढविश्वासस्य दूरीकरणम्

४. विद्यावकाशः

### आ) अधः कानिचन रिक्तस्थानानि सन्ति । तानि उचितपदैः पूरयन्तु ।

ईश्वरस्य कृपा .......... सर्वेषु ............ भवतु । ................. अन्नार्तानां दुःखं ...........। ते ............... प्राप्नुयुः। प्रतिदिनं तेषाम् .................... कष्टं .......न भवेत् ।

### इ) अधः दत्तानि पदानि पठित्वा सम्बद्धपदयुगलानि चित्वा लिखन्तु ।

| | | | |
|---|---|---|---|
| उपाध्यायः | धूमशकटम् | सुवर्णम् | घटः |
| लेखनी | भवननिर्माणम् | आभरणम् | अभियन्ता |
| कुलालः | लिपिकः | छात्रः | अयःपट्टिका |

SCERT TELANGANA

## V. सर्जनात्मकता

**१. नारायणगुरुणा कृतं सन्देशम् अधिकृत्य एकं निबन्धं लिखन्तु ।**

**२. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।**

మంచివాళ్ళకి చేసే ఉపకారం కొబ్బరిచెట్టుకు పోసే నీళ్ళ వలె శ్రేష్ఠమయినది. కొబ్బరిచెట్టు తన కాయలలోని తియ్యని నీళ్ళిచ్చి తృప్తి పరచిన విధంగా మేలు మరువని బుద్ధిమంతులు అవసరమైనపుడు తోడ్పడి ఎంతో సంతోషాన్ని కల్గిస్తారు.

## VI. प्रशंसा

**भोजनसमये कक्ष्यायां सर्वे बालबालिकाः मिलित्वा स्वीयं खाद्यपदार्थं परस्परं वितरन्तः खादन्ति । तदुद्दिश्य भवदभिप्रायं वदन्तु ।**

## VII. भाषांशाः

**अ) अधः दत्तानि वाक्यानि पठन्तु ।**

१. विन्ध्यः, हिमालयः

विन्ध्यहिमालययोः हिमालयः उन्नततरः।

२. कृष्णा, गोदावरी

कृष्णागोदावर्योः गोदावरी दीर्घतरा ।

३. स्वर्णम्, रजतम्

स्वर्णरजतयोः स्वर्णम् अनर्घतरम् ।

* उपरि रेखाङ्कितानि पदानि **तरप् प्रत्ययान्तानि ।**
* तरप् प्रत्ययः अतिशयार्थं सूचयति। द्वयोः एकस्मिन् अतिशयं दर्शयितुं तरप् प्रत्ययस्य उपयोगः क्रियते ।

**आ) अधः दत्तपदानां 'तरप्' प्रत्ययं योजयित्वा वाक्यानि लिखन्तु ।**

१. एरण्डः - तालवृक्षः (उन्नत)

२. नर्मदा - गङ्गा (दीर्घा)

३. ज्ञानम् - ध्यानम् (श्रेष्ठ)

SCERT TELANGANA

### इ) अधः दत्तानि वाक्यानि पश्यन्तु । रेखाङ्कितपदानि परिशीलयन्तु ।

१. बालकेषु रामः सुन्दरतमः।

२. भाषासु संस्कृतभाषा सरलतमा ।

३. प्रयाणेषु विमानप्रयाणं शीघ्रतमम् ।

★ उपरि रेखाङ्कितानि पदानि **तमप् प्रत्ययान्तानि ।**

★ तमप् प्रत्ययः अतिशयार्थं सूचयति । बहूनाम् एकस्मिन् अतिशयं दर्शयितुं तमप् प्रत्ययस्य प्रयोगः क्रियते ।

### ई) उदाहरणानुसारं तमप् प्रत्ययान्तपदं रिक्तस्थानेषु लिखन्तु ।

१. जनेषु गुणी जनः ........... (विरल)

२. पिपीलिकाः प्राणिषु .............(लघु)

३. नदीषु गङ्गा .......... (पवित्र)

### परियोजनाकार्यम्

समाजसंस्कर्तॄणां जीवनविशेषान् सङ्गृह्य एकां सूचीं सज्जीकुर्वन्तु ।

### स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. पाठस्य सारांशं स्वीयवाक्यैः वक्तुं शक्नोमि । | | |
| २. स्वीयवाक्यैः कठिनशब्दानाम् प्रयोगं कर्तुं शक्नोमि । | | |
| ३. नारायणगुरोः समाजसेवामधिकृत्य दशवाक्यानि वक्तुं शक्नोमि । | | |
| ४. आधुनिकसमाजस्य दुराचारान् उद्दिश्य दशवाक्यानि लेखितुं शक्नोमि । | | |

**सतां हि वाणी गुणमेव भाषते ।**

SCERT TELANGANA

तृतीयः भागः

# १०. जीववैविध्यम्

## गीतं पठन्तु, विचिन्त्य वदन्तु

गीतम् - मानव ! मानवो भव न तु दानवः ।
मानव ! त्वं विजानीहि मानव त्वं जानीहि ।
प्राणिहिंसां दूषयति यो यश्च सर्वान् समं पश्यति ।
आर्तानामाश्रयं दत्त्वा दुष्टचरितान् शिक्षयति यः।
स एव मानव रे ।
।। मानव ! मानवो भव ।।

## प्रश्नाः

१. इदं गीतं कं भावं सूचयति ?

२. कां दूषयति चेत् मानवो भवति ?

३. मानवः कीदृशो भवेत् ?

**उद्देश्यम्**

★सृष्टौ समस्तजीवराशीनां संरक्षणं करणीयमिति अभिबोधनम् ।

★प्रकृतौ समस्तप्राणिनाम् आवश्यकता भवतीति अवबोधनम् ।

## पृष्ठभूमिः -

चराचरसृष्टौ जीवतः प्रत्येकमपि प्राणिनः जीवनाधिकारः अस्त्येव । आधुनिककाले वैज्ञानिकविकासस्य कारणतः, मानवानाम् अनालोचितचर्याभिः सहस्रशः प्राणिनः म्रियन्ते । प्रकृत्यां प्रत्येकमपि प्राणी प्रकृतेः संरक्षणे सहकरोति । प्राणिनां नाशेन प्रकृतेः समतोलनं नश्यति । तेन प्रकृतौ विपरीतपरिणामाः सम्भवन्ति। अनेन भविष्यति काले मानवस्य अस्तित्वमेव सन्देहास्पदं भविष्यति । एतां परिस्थितिं निवारयितुं, जीववैविध्यस्य, तस्य रक्षणोपायानां च विषये अवगाहनम् अनिवार्यमिति अयं पाठः समारचितः।

## छात्रेभ्यः सूचनाः

१. पाठं पठन्तु । पदकोशं दृष्ट्वा पदानाम् अर्थान् जानन्तु ।
२. सन्दर्भोचितान् अर्थान् ज्ञात्वा चित्राणाम् आधारेण पाठस्य भावम् अवगच्छन्तु ।
३. अनधिगतविषयान् उद्दिश्य आदौ समूहे चर्चां कुर्वन्तु । अनन्तरम् अध्यापकेन सह चर्चां कृत्वा अवगमनम् अभिवर्धयन्तु ।

SCERT TELANGANA



अतलवितलसुतलरसातलादिलोकवासिनां सकलचराचरप्राणिनां वयमेव शासकाः इति चिन्तयामः। प्रकृतिं वशीकर्तुं प्रयतामहे । क्रूरमृगाणां दन्तान् उत्पाटयामः। घोरारण्यानि आक्रमामः । हिमायलयेषु पताकाः उत्तोलयामः। आकाशे विहारम् कुर्मः। वयं मनुष्याः केवलं स्वीयवेषभाषे एव न परिवर्तयामः। आत्मानम् एव परिवर्तयामः । अस्मिन् विश्वे, भूमण्डले एतस्मिन् जीवचक्रे अस्माकं यावत् प्राधान्यमस्ति तावदेव प्राधान्यम् जीवसामान्यत्वेन एकस्याः पिपीलिकायाः, मक्षिकायाः, मधुमक्षिकायाः, एकस्य मशकस्य, गृध्रस्य, वृषभस्य, गजस्य, व्याघ्रस्य, सिंहस्य च अस्ति। तावदेव न





एकस्य अल्पजीविनः
सरीसृपस्य, वृष्टिसर्पस्य च
किञ्चिन्न्यूनाधिक्येन तावदेव
प्राधान्यमस्तीति इदानीं स्पष्टमभवत्।
वयम् बुद्धिशालिनः अत एव उन्नतप्राणिनः इति चिन्तयन्तः स्वीयं
बुद्धिकौशलं परप्राणिनां विनाशार्थम् उपयुञ्ज्महे इति न
कदापि अचिन्तयाम। 'आदिमृगयाकालम्' आरभ्य
आधुनिकम् 'उद्योगीकरणयुगं' यावत् वयम्
इतरप्राणिनां प्राकृतिकं जीववैविध्यं
समस्तसंसाधनानि च नाशयन्तः एव स्मः।
एतस्य परिणामतः अस्यां
भूमौ अस्माकम्





SCERT TELANGANA



अस्तित्वमेव सन्देहास्पदं जातम्। प्राकृतिकविलयमेनं दृष्ट्वा भयं, जीववैविध्यस्य अभावे वयमपि विलयं गच्छामः इति ज्ञानञ्च इदानीं मनुष्ये उत्पन्नम्। मानवम् अतिरिच्य चतुरशीतिलक्षप्रकाराः जीवराशयः मनुष्यवदेव जीवन्त्यत्र।

तेषु पशुपक्षिजात्योः प्रभावः मानवे महानस्ति। विष्णुशर्मणः पञ्चतन्त्रे पशुपक्षिणः खलु मानवान् अमूल्यानि मूल्यानि बोधयन्ति। गरुडात् लघुचटकपर्यन्तं समस्तपक्षिणः सृष्टौ अनन्तं वैविध्यं कल्पयन्ति।

'मानवः लोके अहमेक एव जीवेय'मिति चिन्तयति चेत् जीववैविध्यं विलुप्य सः स्वजीवने दुःखम् अनुभोक्ष्यति। मानवेन सह इतरजीविनः सहजीवन्ति चेदेव तस्य जीवनं परिपूर्णं भवति। प्राधान्येन समीपे

SCERT TELANGANA



जीवतां पशुपक्षिणाम् आवश्यकता मानवाय अतीव अस्ति । तैस्सहजीवनेन मानवः एव अधिकं लाभं विन्दति - इति प्रतिपादयन्ति पर्यावरणशास्त्रज्ञाः।



अस्मान् परितः जीवतां पशुपक्षिणां संरक्षणं करणीयं चेत् तेषां जीवनशैली अवगन्तव्या भवति। प्रतिवर्षं क्रियमाणायाः गणनायाः अनुसारम् एकस्मिन्नेव वर्षे मानवस्य अश्रद्धास्वार्थयोः कारणेन दशशः पक्षिजातयः विलयं गच्छन्तीति अभिज्ञातम्। इदानीं पर्यावरणपरिरक्षणस्य दृष्टिः समस्तप्रपञ्चे व्याप्नोत्। प्रकृतेः संरक्षणेन सहैव विलयं गच्छतां जीवराशीनां रक्षणम् अनिवार्यं कर्मेति अवबोधः विकसितः।

१९५० तमे वर्षे छायाचित्रग्रहणस्य (Photography) विस्तरणेन पर्यावरणपरिरक्षणोद्यमाः विनूतनस्फूर्तिं प्राप्नुवन् ।



विकासनाम्ना मानवेन क्रियमाणानि कर्माणि पर्यावरणं, जीववैविध्यञ्च कथं नाशयन्तीति विषयं छायाचित्राणि प्रत्यक्षं दर्शयन्ति । तानि अस्माकं मनांसि द्रवीभूतानि कुर्वन्ति । १९७० तमे वर्षे मार्च्मासस्य २१तमे दिनाङ्के अमेरिकादेशे ''शान् फ्रान्सिस्को'' नगरे, अन्यनगरेषु च ''धरित्रीदिनोत्सवम्'' इदम्प्रथमतया समायोजयन् । इदानीम् उत्सवमेनं १७५ देशेषु प्रतिवर्षम् आयोजयन्ति । अस्माकं देशे २००४ तमे वर्षे जीववैविध्यनियमः क्रियान्वितः अभवत् ।

पर्यावरणपरिरक्षणविषये वयम् अन्येषाम् अपेक्षया किञ्चिदिव अग्रे स्मः। ''१७३० तमे वर्षे राजस्थाने जोधपुरे वृक्षाणां रक्षणार्थं ३६२ जनाः स्वीयप्राणानेव अत्यजन्'' इत्ययं विषयः प्रपञ्चजनेषु आश्चर्यकारकः घटनाविशेषः। जोधपुरपालकः महाराजः अभयसिंहः स्वनूतनप्रासादनिर्माणार्थं काष्ठान्यानेतुं स्वीयभटान् महावृक्षपरिपूर्णं 'खेजार्जि' नाम ग्रामं प्रैषयत् । ते तत्रत्यान् वृक्षान् छेत्तुं यदा आरभन्त तदा ''अमृतादेवी'ति महिला अन्यमहिलाभिस्सह तान् तीव्रं निरुद्धवती । 'बिष्णोयि' वर्गीयाः ''वयं वृक्षान् दैवसमानान् पश्यामः'' इति, ''मा छिन्दन्तु वृक्षान्'' इति च वदन्त्यः ताः वृक्षान् समालिङ्गितवत्यः ।

प्रत्येकमपि जातेः अस्तित्वाय जीववैविध्यम् अत्यावश्यकम् । हरिण-महिषादयः तृणं चरन्ति । तान् मांसभक्षिणः सिंहव्याघ्रादयः भक्षयन्ति । तृणजलूकाः (గొల్లభామలు) तृणं खादन्ति चेत् ताः मण्डूकाः भक्षयन्ति । अस्मिन् चक्रे एकोऽपि बन्धः छिन्नश्चेत् तत्प्रभावः अनेकरूपेषु प्रतिफलति । सर्पाः नश्यन्ति चेत् मूषकसन्ततिः अनूह्यतया वर्धते । तथा वर्धितास्ते सस्यबीजानि भक्षयन्ति । जीववैविध्यनाशेन कियती हानिः जायते इति विषयः मण्डूकानां बहिः प्रेषणेन स्पष्टोऽभवत् । बहुकालतः अस्मद्देशतः मण्डूकपादान् ऐरोपा-उत्तरामेरिकादिदेशान् प्रेषयन्ति स्म । १९८३ तमे वर्षे अमेरिका-फ्रान्स्-ऐरोपादेशान् ३६,५०० टन् परिमिताः मण्डूकपादाः प्रेषिताः । तेन मण्डूकसङ्ख्या अतितरां न्यूना अभवत् । अनेन मण्डूकानाम् आहारभूताः कृमिकीटकादयः अत्यन्तं वर्धिता इति तेषां कारणेन सस्यानि पूर्वापेक्षया आधिक्येन विनश्यन्तीति वैज्ञानिकैः अभिज्ञातम् । तेन जागृतः केन्द्रसर्वकारः १९८७ तमे वर्षे मण्डूकानां बहिः प्रेषणं निषिद्धवान्।

प्रकृतौ प्रत्येकमपि प्राणी मूल्यवानेव । अत्यल्पः अकिञ्चनः इति गण्यमानः गोमयकृमिरपि जीववैविध्ये स्वीयं पात्रं निर्वहत्येव । अयमल्पजीवी जन्तुव्यर्थान् अपाकृत्य तान् भूमौ निक्षिप्य भूमिं सारवतीं करोति ।

मानवः अरण्यानि विनाश्य नगराणां विस्तरणं, जलबन्ध-रेल्यानमार्गादीनां निर्माणञ्च करोति । तेन विभिन्नजीवजातयः विलयं गताः, गच्छन्ति च ।

''भूमिरियं न केवलं मनुष्यस्य परन्तु सर्वेषामपि प्राणिनाम्'' इत्यवगतं तेन । कस्या अपि जातेः नाशनाधिकारः न कस्याप्यस्ति । भूमौ जीवतां सर्वप्रकारजातीयपक्षिजन्तुवृक्षाणां परिरक्षणं सर्वैरपि मानवैः करणीयमेव । पर्यावरणपरिरक्षणे जनेषु जागरूकता आनेया । प्रत्येकस्मिन् गृहे, विद्यालये नियमेन वृक्षाणां रोपणस्य संरक्षणस्य च उत्तरदायित्वं स्वीकरणीयम् ।

पर्यावरणपरिरक्षणनियमान् सर्वे सम्पूर्णतया यथा पालयेयुः तथा जागरूकता स्यात् ।

'एकस्य कृते सर्वे, सर्वेषां कृते एकः' इति ध्येयेन जीववैविध्यं रक्षणीयम् ।

SCERT TELANGANA

## एतानि कुर्वन्तु

### I. श्रुण्वन्तु, विचिन्त्य वदन्तु

अ) अनेन पाठेन भवान् किम् अवगतवान् ?

आ) जीववैविध्यं नाम किम्? एतं विषयम् उद्दिश्य भवतः अभिप्रायः कः ?

इ) 'मानवेन सह इतरे प्राणिनः अपि सहजीवनं कुर्युः' अयमंशः कियत्पर्यन्तं समर्थनीयः इति चर्चयन्तु ।

ई) कस्याः अपि जीवजातेः नाशे कारणानि कानि ?

### II. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ) पाठं पठित्वा "जीववैविध्यम्" इति पदस्य अधः रेखाङ्कनं कुर्वन्तु ।

आ) अधः दत्तैः पदैः युक्तानि वाक्यानि पाठे अभिज्ञाय लिखन्तु ।

१. शासकाः - ..................

२. बुद्धिकौशलम् - ..................

३. सन्देहास्पदम् - ..................

४. खेजार्जि - ..................

५. धरित्रीदिनोत्सवः - ..................

इ) अधः दत्तम् अनुच्छेदं पठन्तु । तदाधारेण प्रश्नान् रचयन्तु ।

अरण्यानि मानवजीवनस्य आधारभूतानि । नगराणि वर्धमानजनसङ्ख्यया पूर्णानि जायन्ते । वाहनानां सम्मर्दस्य वायुभूगर्भजलकालुष्यस्य च वर्धनेन जीवनाधारं जलं कालुष्यपूर्णं जायते । अस्यां परिस्थितौ प्रकृत्या मानवाय दत्तं महद्वरं वृक्षाः एव । अतः प्रत्येकमपि मानवः वृक्षकान् आरोप्य संवर्ध्य च स्वीयम् अस्तित्वं संरक्षेत् ।

ई) अधः दत्तानां प्रश्नानां समाधानानि पाठ्यांशाधारेण लिखन्तु ।

१. १९८७ तमे वर्षे केन्द्रसर्वकारः किं निषिद्धवान् ?

२. जीववैविध्यस्य राज्याङ्गनियमः कदा क्रियान्वितः अभवत् ?

३. अनेन नियमेन कीदृशं परिवर्तनं कर्तुं शक्यते ?

४. छायाचित्रग्रहणविस्तरात् पर्यावरणस्य सञ्जातं हितम् उद्दिश्य लिखन्तु ।

SCERT TELANGANA

## III. स्वीयरचना

### अ) अधः दत्तानां प्रश्नानां लघुसमाधानानि स्वीयवाक्यैः लिखन्तु ।

१. पर्यावरणकालुष्यं कथं निवारयितुं शक्यम् ?

२. जन्तूनां मृगयया काः हानयः भवन्ति ?

३. औद्योगिककालुष्येण काः हानयः भवन्ति ?

४. पशुपक्षिपरिरक्षणे कार्यं कुर्वतीः स्वच्छन्दसंस्थाः उद्दिश्य लिखन्तु ?

५. प्राकृतिकवैपरीत्यं नाम किम्? तेन काः हानयः भवन्ति ?

### आ) अधः दत्तानां प्रश्नानां समाधानानि निबन्धरूपेण लिखन्तु ।

६. जीववैविध्यम् उद्दिश्य स्वीयवाक्यैः लिखन्तु ।

७. विनश्यमानानां जीवराशीनां संरक्षणार्थं भवन्तः किं करिष्यन्ति इति विवृण्वन्तु ।

८. अरण्यानां नाशेन जायमानाः हानयः काः? दशवाक्यैः लिखन्तु ।

## IV. पदजालाभिवृद्धिः

### अ) अधः दत्तानि पदयुगलानि उपयुज्य वाक्यानि लिखन्तु ।

१. भूमिः - मनुष्यः

२. अरण्यम् - पक्षी

३. सहजीवनम् - अस्तित्वम्

४. अभिवृद्धिः - अश्रद्धा

### आ) अधः दत्तायाः सारिण्याः आधारेण के जीवाः कम् आहारं गृह्णन्तीति विचिन्त्य पदानि योजयन्तु ।

| | |
|---|---|
| १. अश्वः | मांसम् |
| २. मूषकाः | कीटकाः |
| ३. मण्डूकाः | तृणधान्यानि |
| ४. सिंहः | तृणः |

### इ) अधः रेखाङ्कितानां पदानां समानार्थकपदानि लिखित्वा तानि उपयुज्य वाक्यानि रचयन्तु ।

१. सिंहात् शशः अल्पः ।

२. मनुष्येण सह अनेके जीवराशयः जीवन्ति ।

३. वृक्षाणां रक्षणम् अस्माकं कर्तव्यम् ।

४. रामः रावणं हतवान् ।

SCERT TELANGANA

## V. सर्जनात्मकता

१. वृक्ष-जन्तु-गुल्म-सरोवरैः युक्तम् अरण्यचित्रं निर्माय तदुद्दिश्य पञ्चवाक्यानि लिखन्तु ।

२. ''प्रकृतिः रक्षति रक्षिता'', ''प्रकृतिविनाशः मानवतायाः शापः'' । ईदृशानि कानिचन ध्येयवाक्यानि रचयन्तु ।

३. अधः दत्तम् अनुच्छेदं संस्कृतभाषया अनुवदन्तु ।

ఆదిమానవుడు కందమూలాలు, మొక్కలు, చెట్లనుంచే తన మనుగడకు అవసరమైన ఆహారం, ఔషధాలు, ఆవాసాలను, ఏర్పరచుకున్నాడు. క్రమంగా పంటలు, పశువుల పెంపకం అలవరచుకుని జీవనవిధానాన్ని పరిస్థితులకు, ప్రదేశాలకు అనుగుణంగా మలచుకున్నాడు. మానవాభివృద్ధి మొక్కలు, చెట్లతో ముడిపడి ఉంది.

## VI. प्रशंसा

१. २०१२ तमवर्षस्य अक्टोबर्मासे प्रथमदिनाङ्कतः नवदशदिनाङ्कपर्यन्तं प्रपञ्चदेशानां जीववैविध्यगोष्ठी हैदराबाद् नगरे प्राचलत् । अस्यां गोष्ठ्यां १९३ देशानां प्रायः ८००० प्रतिनिधयः भागम् अवहन् । ईदृशी अतिमहत्त्वपूर्णा गोष्ठी अस्माकं राज्ये प्रचलिता । एतां गोष्ठीं अभिनन्दन् / अभिनन्दन्ती मित्राय / सख्यै पत्रं लिखतु ।

२. सर्वकारेण (प्रभुत्वेन) स्वच्छन्दसंस्थाभिश्च प्रचाल्यमानेषु वृक्षारोपणकार्यक्रमेषु भागं गृह्णन्तु । भवत्सु एकैकः स्वयमपि वृक्षं संरोप्य तस्य रक्षणं करोतु ।

## VII. भाषांशाः

अ) अधः दत्तम् उदाहरणद्वयं परिशील्य विषयमवगच्छन्तु ।

| | | | | | |
|---|---|---|---|---|---|
| बालाः | + | अत्र | = | बाला अत्र | (ः + अ = विसर्गलोपः) |
| लताः | + | एधन्ते | = | लता एधन्ते | (ः + ए = विसर्गलोपः) |
| ताः | + | गच्छन्ति | = | ता गच्छन्ति | (ः + ग = विसर्गलोपः) |
| लताः | + | लसन्ति | = | लता लसन्ति | (ः + ल = विसर्गलोपः) |

★ **आकारात् परस्य विसर्गस्य स्वरेषु मृदुहल्सु परेषु विसर्गस्य लोपो भवति ।**

**आ + ः + स्वराः / मृदुहलः = लोपः**



SCERT TELANGANA

## आ) अधः दत्तम् उदाहरणद्वयं परिशीलयन्तु ।

रामः + एधते = राम एधते (अः + ए = विसर्गलोपः)

कृष्णः + एति = कृष्ण एति (अः + ए = विसर्गलोपः)

★ **अकारात् परस्य विसर्गस्य अकारं वर्जयित्वा स्वरे परे विसर्गस्य लोपो भवति ।**

**अ + ः + अकारं विना स्वराः = विसर्गलोपः**

## इ) अधः दत्तानि उदाहरणानि परिशीलयन्तु ।

एषः + इच्छति = एष इच्छति (एषः + इ = विसर्गलोपः)

एषः + धावति = एष धावति (एषः + धा = विसर्गलोपः)

सः + तत्र = स तत्र (सः + त = विसर्गलोपः)

सः + गच्छति = स गच्छति (सः + ग = विसर्गलोपः)

★ **एषः, सः इत्यनयोः पदयोः, स्वरे, व्यञ्जने परेऽपि विसर्गस्य लोपः भवति ।**

**एषः / सः + स्वराः / व्यञ्जनानि = विसर्गलोपः**

## ई) अधः दत्तानि उदाहरणानि परिशीलयन्तु ।

कविः + रचयति = कवी रचयति (इः + र = विसर्गलोपः, पूर्वस्य वर्णस्य दीर्घः)

भानुः + राजते = भानू राजते (उः + रा = विसर्गलोपः, पूर्वस्य वर्णस्य दीर्घः)

पुनः + रमते = पुना रमते (अः + र = विसर्गलोपः, पूर्वस्य वर्णस्य दीर्घः)

★ **अकारं वर्जयित्वा स्वरात् परस्य विसर्गस्य रेफे परे विसर्गलोपः भवति । लोपे कृते पूर्वस्वरः दीर्घः च भवति । अव्ययसम्बन्धिनः विसर्गस्य अकारात् परस्यापि लोपः भवति।**

**अकारं विना स्वरः + ः + (र्) = लोपः, पूर्वस्य वर्णस्य दीर्घः**

★ **एते केचन विसर्गसन्धेः भेदाः ।**

## उ) सन्धिं कुर्वन्तु ।

| | | | |
|---|---|---|---|
| भूमिः + तोयम् | = ________ | तैः + अपि | = ________ |
| गुरोः + भाषणम् | = ________ | कः + चित् | = ________ |
| बालाः + धावन्ति | = ________ | शिवः + वन्द्यः | = ________ |

SCERT TELANGANA

गुरुः + त्राता = ________ स: + अब्रवीत् = ________

हे मातः + आगच्छ = ________

## (ए) विसन्धिं कुर्वन्तु ।

| | | | |
|---|---|---|---|
| ततस्ततः | ________ | पितुरिच्छा | ________ |
| हरिरवदत् | ________ | कपिरपि | ________ |
| देवा आगच्छन्ति | ________ | क इदानीम् | ________ |
| गजो गच्छति | ________ | स खादति | ________ |
| एष आसीत् | ________ | बालस्तिष्ठति | ________ |
| भ्रातर्गच्छ | ________ | ता गच्छन्ति | ________ |
| वृद्धा यान्ति | ________ | कुत आयाति | ________ |

## परियोजनाकार्यम्

१. जन्तुरक्षणार्थं कार्यं कुर्वतीभिः 'ब्लूक्रास्' इत्यादिसंस्थाभिः क्रियमाणानि कार्याणि लिखित्वा प्रदर्शयन्तु ।

२. विनाशोन्मुखानां पशुपक्षिणां चित्राणि तेषां संरक्षणे उपयुक्ताः सूचनाश्च सङ्कलय्य भित्तिपत्रेषु लेपयित्वा प्रदर्शयन्तु ।

## स्वीयमूल्याङ्कनम्

| | आम् | न |
|---|---|---|
| १. जीववैविध्यम् उद्दिश्य दशवाक्यानि वक्तुं शक्नोमि । | | |
| २. प्रकृतिः कथं, किमर्थं च परिरक्षणीया इति वक्तुं शक्नोमि । | | |
| ३. पाठस्थनूतनपदानि उपयुज्य वाक्यनिर्माणं कर्तुं शक्नोमि । | | |
| ४. प्रकृतिरक्षणात्मकानि ध्येयवाक्यानि लेखितुं शक्नोमि । | | |

**आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि ।**

SCERT TELANGANA

# पायसप्रहसनम्



पतिः - (गृहं प्रविशन्) नन्दिनि ........ भोः नन्दिनि ....... !

पत्नी - किं भोः .......... किमर्थं तावत् उच्चैः आह्वयति ..... ?

पतिः - नन्दिनि ! पश्यतु, किम् आनीतवान् अस्मि इति ।

पत्नी - किम् आनीतवान् ?

पतिः - भवती एव पश्यतु .......... (स्यूतं ददाति)

पत्नी - (स्यूतम् उद्घाट्य) भोः, गुडः, मुद्गाः धान्यं च....। अहो ..... एला अपि अस्ति । एतत्सर्वं कथम् आनीतवान् भोः ।

पतिः - हू ............. महता प्रयत्नेन षड्रूप्यकाणां सञ्चयनं कृत्वा तेन धनेन पादकिलोपरिमितं गुडं, पादकिलोपरिमितं मुद्गधान्यं, किञ्चित् एलां च आनीतवान् । आवयोः बहु इच्छा आसीत् खलु ! पायसं कृत्वा पातव्यम् इति । अतः आनीतवान् ।

पत्नी - तर्हि अहं पाकस्य आरम्भं करोमि किम् ?

पतिः - करोतु, शीघ्रं करोतु, अद्य सम्यक् पायसं पिबावः (पत्नी पाकं करोति, पतिः गायन् गृहं मार्जयति।)

पत्नी - चषकद्वयपरिमितमेव अभवत् ।

पतिः - भवतु, एकैकस्य एकचषकपरिमितं पायसं लभ्यते खलु ! भवती अपि सम्यक्, उपविशतु .... पिबावः ।

पत्नी - किञ्चित् उष्णम् अस्ति ।

पतिः - एलायाः सुगन्धः कथम् अस्ति ? (जिघ्रति) आ ....... बहुरुचिकरं स्यात् पायसम्।(द्वारे शब्दः)

पत्नी - अरे .......... कोऽपि आगतवान् इति मन्ये !

पतिः - कः धूर्तः भोः इदानीम् आगतः खलु !

पत्नी - द्वारमपि न कीलितं भोः ......... सः अन्तः आगच्छति चेत् .....

पतिः - पायसं तस्मै अपि दातव्यं भवति । किं कुर्मः इदानीम् ......... ?

अतिथिः - (द्वारे) भोः महाशय.......... !

पत्नी - अरे ..... सः आगतवान् एव ....... पायसं ......... पायसम्.......

पतिः - (स्वगतम्) एकम् उपायं करोमि .......... पत्नीम् उद्दिश्य भोः दुष्टे ! मूर्खे ... बुद्धिहीने ....!

पत्नी - भवानेव दुष्टः, मूर्खः, बुद्धिहीनः ...........।

SCERT TELANGANA

पतिः - रे शाकिनि ! ढाकिनि। राक्षसि ? मां निन्दति चेत् भवतीं ताडयामि ।

पत्नी - ताडयतु भोः ......... यदि धैर्यम् अस्ति ..........।

पतिः - एवं वा .......... ? पश्यतु .........। (ताडयति)

पत्नी - भोः ....... देव .... भगवन् ....! एष राक्षसः माम् अद्य मारयति .....। कोऽपि मां रक्षतु । (उच्चैः रोदिति ।) **(एतत् दृष्ट्वा अतिथिः भीतः इव पलायनं करोति ।)**

पतिः - (तस्य गमनं दृष्ट्वा, दीर्घं निःश्वस्य) .. कथमपि गतवान् । पायसं तु रक्षितम् ! (पत्नीम् उद्दिश्य) पश्यतु भोः कथमस्ति मम बुद्धिचातुर्यम् ! कथमस्ति मम उपायः ......ह .......

ह....... (हसति) अहं भवतीं साक्षात् ताडितवान् इव अभिनयं कृतवान् ..... !

ह ..... ह....ह.....।

पत्नी - अहं किं न्यूना वा ? अहमपि साक्षात् रोदनं कृतवती इव अभिनयं कृतवती ...। ह... ह....ह..(हसति)

अतिथिः - (समीपम् आगच्छन्) अहमपि तथैव ......... साक्षात् धावितवान् इव अभिनयं कृतवान्, अहम् अत्रैव अस्मि !

दम्पती - हा ....... (हस्तं शिरसि स्थापयतः।)



# शब्दाः

## 1. तकारान्तः पुंलिङ्गो भवच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | भवान् | भवन्तौ | भवन्तः |
| सम्बोधनप्रथमा विभक्तिः | हे भवन् | हे भवन्तौ | हे भवन्तः |
| द्वितीया विभक्तिः | भवन्तम् | भवन्तौ | भवतः |
| तृतीया विभक्तिः | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी विभक्तिः | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी विभक्तिः | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी विभक्तिः | भवतः | भवतोः | भवताम् |
| सप्तमी विभक्तिः | भवति | भवतोः | भवत्सु |

## 2. तकारान्तः स्त्रीलिङ्गो भवच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | भवती | भवत्यौ | भवत्यः |
| सम्बोधनप्रथमा विभक्तिः | हे भवति | हे भवत्यौ | हे भवत्यः |
| द्वितीया विभक्तिः | भवतीम् | भवत्यौ | भवतीः |
| तृतीया विभक्तिः | भवत्या | भवतीभ्याम् | भवतीभिः |
| चतुर्थी विभक्तिः | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| पञ्चमी विभक्तिः | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| षष्ठी विभक्तिः | भवत्याः | भवत्योः | भवतीनाम् |
| सप्तमी विभक्तिः | भवत्याम् | भवत्योः | भवतीषु |

## 3. तकारान्तः नपुंसकलिङ्गो भवच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | भवत् | भवती | भवन्ति |
| सम्बोधनप्रथमा विभक्तिः | हे भवत् | हे भवती | हे भवन्ति |
| द्वितीया विभक्तिः | भवत् | भवती | भवन्ति |
| तृतीया विभक्तिः | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी विभक्तिः | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी विभक्तिः | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी विभक्तिः | भवतः | भवतोः | भवताम् |
| सप्तमी विभक्तिः | भवति | भवतोः | भवत्सु |

SCERT TELANGANA

## 4. चकारान्तः पुंलिङ्गो जलमुच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | जलमुक् | जलमुचौ | जलमुचः |
| सम्बोधनप्रथमा विभक्तिः | हे जलमुक् | हे जलमुचौ | हे जलमुचः |
| द्वितीया विभक्तिः | जलमुचम् | जलमुचौ | जलमुचः |
| तृतीया विभक्तिः | जलमुचा | जलमुग्भ्याम् | जलमुग्भिः |
| चतुर्थी विभक्तिः | जलमुचे | जलमुग्भ्याम् | जलमुग्भ्यः |
| पञ्चमी विभक्तिः | जलमुचः | जलमुग्भ्याम् | जलमुग्भ्यः |
| षष्ठी विभक्तिः | जलमुचः | जलमुचोः | जलमुचाम् |
| सप्तमी विभक्तिः | जलमुचि | जलमुचोः | जलमुक्षु |

एवं पयोमुच्, सुवाच् इत्यादयः

## 5. दकारान्तः पुंलिङ्गः तच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | सः | तौ | ते |
| द्वितीया विभक्तिः | तम् | तौ | तान् |
| तृतीया विभक्तिः | तेन | ताभ्याम् | तैः |
| चतुर्थी विभक्तिः | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी विभक्तिः | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी विभक्तिः | तस्य | तयोः | तेषाम् |
| सप्तमी विभक्तिः | तस्मिन् | तयोः | तेषु |

## 6. दकारान्तः स्त्रीलिङ्गः तच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | सा | ते | ताः |
| द्वितीया विभक्तिः | ताम् | ते | ताः |
| तृतीया विभक्तिः | तया | ताभ्याम् | ताभिः |
| चतुर्थी विभक्तिः | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी विभक्तिः | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी विभक्तिः | तस्याः | तयोः | तासाम् |
| सप्तमी विभक्तिः | तस्याम् | तयोः | तासु |

SCERT TELANGANA

## 7. दकारान्तः नपुंसकलिङ्गः तच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | तत् | ते | तानि |
| द्वितीया विभक्तिः | तत् | ते | तानि |
| तृतीया विभक्तिः | तेन | ताभ्याम् | तैः |
| चतुर्थी विभक्तिः | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी विभक्तिः | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी विभक्तिः | तस्य | तयोः | तेषाम् |
| सप्तमी विभक्तिः | तस्मिन् | तयोः | तेषु |

## 8. दकारान्तः त्रिषु लिङ्गेषु युष्मच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | त्वम् | युवाम् | यूयम् |
| द्वितीया विभक्तिः | त्वाम्,त्वा | युवाम् ,वाम् | युष्मान्, वः |
| तृतीया विभक्तिः | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी विभक्तिः | तुभ्यम्,ते | युवाभ्याम्,वाम् | युष्मभ्यम्, वः |
| पञ्चमी विभक्तिः | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी विभक्तिः | तव, ते | युवयोः,वाम् | युष्माकम्,वः |
| सप्तमी विभक्तिः | त्वयि | युवयोः | युष्मासु |

## 9. दकारान्तः त्रिषु लिङ्गेषु अस्मच्छब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | अहम् | आवाम् | वयम् |
| द्वितीया विभक्तिः | माम्,मा | आवाम्,नौ | अस्मान्,नः |
| तृतीया विभक्तिः | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी विभक्तिः | मह्यम्,मे | आवाभ्याम्,नौ | अस्मभ्यम्,नः |
| पञ्चमी विभक्तिः | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी विभक्तिः | मम,मे | आवयोः, नौ | अस्माकम्,नः |
| सप्तमी विभक्तिः | मयि | आवयोः | अस्मासु |

SCERT TELANGANA

# धातवः

## 1. दु - नदि (नन्द् समृद्धौ) - परस्मैपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नन्दति | नन्दतः | नन्दन्ति |
| मध्यमपुरुषः | नन्दसि | नन्दथः | नन्दथ |
| उत्तमपुरुषः | नन्दामि | नन्दावः | नन्दामः |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अनन्दत् | अनन्दताम् | अनन्दन् |
| मध्यमपुरुषः | अनन्दः | अनन्दतम् | अनन्दत |
| उत्तमपुरुषः | अनन्दम् | अनन्दाव | अनन्दाम |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नन्दतु,नन्दतात् | नन्दताम् | नन्दन्तु |
| मध्यमपुरुषः | नन्द,नन्दतात् | नन्दतम् | नन्दत |
| उत्तमपुरुषः | नन्दानि | नन्दाव | नन्दाम |

### विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नन्देत् | नन्देताम् | नन्देयुः |
| मध्यमपुरुषः | नन्देः | नन्देतम् | नन्देत |
| उत्तमपुरुषः | नन्देयम् | नन्देव | नन्देम |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नन्दिष्यति | नन्दिष्यतः | नन्दिष्यन्ति |
| मध्यमपुरुषः | नन्दिष्यसि | नन्दिष्यथः | नन्दिष्यथ |
| उत्तमपुरुषः | नन्दिष्यामि | नन्दिष्यावः | नन्दिष्यामः |

SCERT TELANGANA

## 2. अर्च - पूजायाम् - परस्मैपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अर्चति | अर्चतः | अर्चन्ति |
| मध्यमपुरुषः | अर्चसि | अर्चथः | अर्चथ |
| उत्तमपुरुषः | अर्चामि | अर्चावः | अर्चामः |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आर्चत् | आर्चताम् | आर्चन् |
| मध्यमपुरुषः | आर्चः | आर्चतम् | आर्चत |
| उत्तमपुरुषः | आर्चम् | आर्चाव | आर्चाम |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अर्चतु, अर्चतात् | अर्चताम् | अर्चन्तु |
| मध्यमपुरुषः | अर्च, अर्चतात् | अर्चतम् | अर्चत |
| उत्तमपुरुषः | अर्चानि | अर्चाव | अर्चाम |

### विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अर्चेत् | अर्चेताम् | अर्चेयुः |
| मध्यमपुरुषः | अर्चेः | अर्चेतम् | अर्चेत |
| उत्तमपुरुषः | अर्चेयम् | अर्चेव | अर्चेम |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अर्चिष्यति | अर्चिष्यतः | अर्चिष्यन्ति |
| मध्यमपुरुषः | अर्चिष्यसि | अर्चिष्यथः | अर्चिष्यथ |
| उत्तमपुरुषः | अर्चिष्यामि | अर्चिष्यावः | अर्चिष्यामः |

SCERT TELANGANA

## 3. भा - दीप्तौ - परस्मैपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भाति | भातः | भान्ति |
| मध्यमपुरुषः | भासि | भाथः | भाथ |
| उत्तमपुरुषः | भामि | भावः | भामः |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भातु, भातात् | भाताम् | भान्तु |
| मध्यमपुरुषः | भाहि, भातात् | भातम् | भात |
| उत्तमपुरुषः | भानि | भाव | भाम |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभात् | अभाताम् | अभुः, अभान् |
| मध्यमपुरुषः | अभाः | अभातम् | अभात |
| उत्तमपुरुषः | अभाम् | अभाव | अभाम |

### विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भायात् | भायाताम् | भायुः |
| मध्यमपुरुषः | भायाः | भायातम् | भायात |
| उत्तमपुरुषः | भायाम् | भायाव | भायाम |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भास्यति | भास्यतः | भास्यन्ति |
| मध्यमपुरुषः | भास्यसि | भास्यथः | भास्यथ |
| उत्तमपुरुषः | भास्यामि | भास्यावः | भास्यामः |

SCERT TELANGANA

## 4. अस - भुवि - परस्मैपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमपुरुषः | असि | स्थः | स्थ |
| उत्तमपुरुषः | अस्मि | स्वः | स्मः |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमपुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमपुरुषः | आसम् | आस्व | आस्म |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अस्तु,स्तात् | स्ताम् | सन्तु |
| मध्यमपुरुषः | एधि, स्तात् | स्तम् | स्त |
| उत्तमपुरुषः | असानि | असाव | असाम |

### विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्यात् | स्याताम् | स्युः |
| मध्यमपुरुषः | स्याः | स्यातम् | स्यात |
| उत्तमपुरुषः | स्याम् | स्याव | स्याम |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

SCERT TELANGANA

## 5. डु कृञ् - करणे - परस्मैपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमपुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत |
| उत्तमपुरुषः | अकरवम् | अकरवाव | अकरवाम |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करोतु,कुरुतात् | कुरुताम् | कुर्वन्तु |
| मध्यमपुरुषः | कुरु, कुरुतात् | कुरुतम् | कुरुत |
| उत्तमपुरुषः | करवाणि | करवाव | करवाम |

### विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यमपुरुषः | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तमपुरुषः | कुर्याम् | कुर्याव | कुर्याम |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमपुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमपुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

SCERT TELANGANA

## 6. शृ - श्रवणे - परस्मैपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शृणोति | शृणुतः | शृण्वन्ति |
| मध्यमपुरुषः | शृणोषि | शृणुथः | शृणुथ |
| उत्तमपुरुषः | शृणोमि | शृणुवः,शृण्वः | शृणुमः, शृण्मः |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अशृणोत् | अशृणुताम् | अशृण्वन् |
| मध्यमपुरुषः | अशृणोः | अशृणुतम् | अशृणुत |
| उत्तमपुरुषः | अशृणवम् | अशृणुव,अशृण्व | अशृणुम,अशृण्म |

### विध्याशिषोः लोट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शृणोतु,शृणुतात् | शृणुताम् | शृण्वन्तु |
| मध्यमपुरुषः | शृणु, शृणुतात् | शृणुतम् | शृणुत |
| उत्तमपुरुषः | शृणवानि | शृणवाव | शृणवाम |

### विधिलिङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शृणुयात् | शृणुयाताम् | शृणुयुः |
| मध्यमपुरुषः | शृणुयाः | शृणुयातम् | शृणुयात |
| उत्तमपुरुषः | शृणुयाम् | शृणुयाव | शृणुयाम |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | श्रोष्यति | श्रोष्यतः | श्रोष्यन्ति |
| मध्यमपुरुषः | श्रोष्यसि | श्रोष्यथः | श्रोष्यथ |
| उत्तमपुरुषः | श्रोष्यामि | श्रोष्यावः | श्रोष्यामः |

SCERT TELANGANA

## 7. वृतु - वर्तने - आत्मनेपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्तते | वर्तेते | वर्तन्ते |
| मध्यमपुरुषः | वर्तसे | वर्तेथे | वर्तध्वे |
| उत्तमपुरुषः | वर्ते | वर्तावहे | वर्तामहे |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवर्तत | अवर्तेताम् | अवर्तन्त |
| मध्यमपुरुषः | अवर्तथाः | अवर्तेथाम् | अवर्तध्वम् |
| उत्तमपुरुषः | अवर्ते | अवर्तावहि | अवर्तामहि |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते |
| मध्यमपुरुषः | वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे |
| उत्तमपुरुषः | वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे |

## 8. भाष - व्यक्तायां वाचि - आत्मनेपदी

### लट् वर्तमाने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भाषते | भाषेते | भाषन्ते |
| मध्यमपुरुषः | भाषसे | भाषेथे | भाषध्वे |
| उत्तमपुरुषः | भाषे | भाषावहे | भाषामहे |

### अनद्यतनभूते लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभाषत | अभाषेताम् | अभाषन्त |
| मध्यमपुरुषः | अभाषथाः | अभाषेथाम् | अभाषध्वम् |
| उत्तमपुरुषः | अभाषे | अभाषावहि | अभाषामहि |

### भविष्यति लृट्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भाषिष्यते | भाषिष्येते | भाषिष्यन्ते |
| मध्यमपुरुषः | भाषिष्यसे | भाषिष्येथे | भाषिष्यध्वे |
| उत्तमपुरुषः | भाषिष्ये | भाषिष्यावहे | भाषिष्यामहे |

SCERT TELANGANA

# पदकोशः

### अ

अंशुमन्तम् = కిరణాలతో ప్రకాశిస్తున్న

अचिरेण = తక్కువ సమయంలో

अज्ञानतिमिरान्धस्य = అజ్ఞానమనే చీకటి కలిగిన గుడ్డివాడికి

अज्ञैः = అజ్ఞానుల చేత / జ్ఞానం లేని వారి చేత

अतिरिच्य = మించిపోయి

अनर्थाः = మోసాలు /కష్టములు/ ప్రయోజనములేనివి

अन्नार्तानाम् = అన్నం కొరకు బాధపడుతున్న వారియొక్క

अनूदिता = అనువదించబడినది

अपत्यनां = సంతానములకు

अभियन्ता = ఇంజనీర్

अभियान्तं = అభిముఖంగా (ఎదురుగా) వచ్చినటువంటి

अभिलाषः = కోరిక

अम्बरस्थः = ఆకాశంలో ఉన్నటువంటి

अर्णवः = సముద్రం

अलुप्तः = నష్టం కానటువంటి

अविरतं = విశ్రాంతి లేకుండా

अश्वत्थवृक्षच्छायायां = రావిచెట్టుయొక్క నీడయందు

असङ्ख्याकानि = లెక్కలేనన్ని

अहर्निशं = పగలు, రాత్రి

### आ

आचूडापादम् = శిఖ నుండి పాదాల వరకు

आदिमृगयाकालम् = మొదటి వేటయుగమును / సమయమును

आनायितम् = తేబడినది

आपादिके ! = కూర్చినదానా!

आयोजिता = నిర్వహించబడినది

आरात्रं = రాత్రివరకు

आरुरुक्षोः = ఎక్కుటకు ఇష్టపడుతున్న వాని యొక్క / వానికి

आलीढम् = ఓర్చుకొను

आशोपहतः = ఆశచేత కొట్టబడిన

### उ

उग्रम् = భయంకరమైన

उच्चतरः = మిక్కిలి ఎత్తైన

उच्चशृङ्गः = ఉన్నతమైన శిఖరముగా

उदकैः = నీటిచేత

उदग्रः = ఉన్నతమైన

उन्मथिता = నలిపివేయబడిన

उन्मीलितम् = తెరిపించిన

उन्मूलनम् = పెరికివేయుట

उपकथाः = చిన్నకథలు

उपक्रोशः = నింద

उपशमः = శాంతము / మౌనము

उपेत्य = పొంది

SCERT TELANGANA

**ऋ**

ऋद्धम् = సమృద్ధమైన

**ऐ**

ऐन्द्रम् = ఇంద్రసంబంధమైన

**क**

ककुद्मान् = ఎద్దు

कदलीपत्राणि = అరటి ఆకులు

कपोतस्य = పావురం యొక్క

कन्दरः = గుహ

कांस्यवत् = రాగిలోహం వలె

काचफलानि = అద్దాలను

कान्तम् = మనోహరమైన

कुमित्राणि = చెడ్డమిత్రులు

कुन्दम् = మల్లె

कूर्मस्य = తాబేలు యొక్క

कृतकृत्यः = మంచిపనులను చేసినవాడు

कृशानां = బక్కచిక్కిన వారియొక్క / కి

कैङ्कर्यसम्पादिके = సేవను చేయు దానా

केरवचक्रवालम् = కలువమొగ్గను

क्रुद्धः = కోపగ్రస్తుడై

**ख**

खलस्य = దుర్జనుని యొక్క

**ग**

गर्वितकुञ्जरस्थः = మదించిన ఏనుగులపై ఉన్నటువంటి

गरीयसी = గొప్పనైనది

गलत् = జారుతున్న

गाननाट्ययोः = గానం మరియు నాట్యములయందు

गुरुतरं = మిక్కిలిభారమును

गृध्रस्य = రాబందు యొక్క

गोष्ठे = గోశాలయందు

**च**

चक्षुः = కన్ను

चतुर्मुखं = బ్రహ్మదేవుని గూర్చి

चतुरशीतिलक्षप्रकाराः= 80 లక్షల భేదాలు కల

चम्पूकाव्यम् = గద్యపద్యాలతో కూడిన కావ్యం

चारु = సుందరమైన

चित्तसंशोषिके = మనస్సును ఎండగట్టుదానా

**छ**

छिन्दन्तु = నరకండి

छेत्तुं = నరుకుటకు

**ज**

जम्बूकस्य = నక్కయొక్క

जर्जरीभूतशरीरः = కృశించిపోయిన శరీరం కల

जाम्बूनदबद्धशृङ्गः = బంగారపు తొడుగు గల దంతము

जाङ्गलम् = అడవికి సంబంధించినది

जाया = భార్య

ज्ञानदायकम् = జ్ఞానాన్ని ప్రసాదించునది

ज्ञानाञ्जनशलाकया = జ్ఞానమనే కాటుకపుల్ల చేత

ज्योत्स्नावितानं = వెన్నెలచేత విస్తరింపబడిన

SCERT TELANGANA

**झ**

झटिति = వెంటనే

**ड**

डोलायमानम् = ఊగుతున్న

**त**

तक्रं = మజ్జిగ

तृणजलूकाः = గొల్లభామలు

तण्डुलचूर्णम् = బియ్యపుపిండి

ताडनैः = దెబ్బల చేత

तमांसि = చీకట్లు

ताडितभुजङ्गः = కొట్టబడినపాము

तापत्रयम् = ఆధ్యాత్మిక - ఆధిదైవిక - ఆధిభౌతికమనే మూడురకాల కష్టాలు

तोयेषु = నీటియందు

त्रासार्थम् = కష్టపెట్టడానికి

त्रिचतुराः = ముగ్గురు లేక నలుగురు

त्रिदिवम् = స్వర్గమును గూర్చి

त्वक् = చర్మము

**द**

दन्तः = దంతము

दयालुः = దయాస్వభావం గలవాడు

दिवि = ఆకాశమందు

दुर्भरा = భరించరానిదై

दुर्लभम् = కష్టముగా దొరకునది

देवगवी = కామధేనువు

देशकालज्ञः = దేశకాలాలను తెలిసినవాడు

द्रवीभूतानि = కరిగించబడినవై

**ध**

धीरता = ధైర్యము

ध्वंसयन्तः = ధ్వంసం చేయుచున్నవారై

**न**

नगाधिराजः = పర్వతాలకు రాజు (హిమవంతుడు)

नाकः = స్వర్గము

नाना = ఎన్నో

निरयः = నరకం

निर्मलाङ्कः = మలినములేని చిహ్నము కలవాడు

निर्व्याजता = నిష్కపటత

निष्पक्षपातः = పక్షపాతబుద్ధి లేనటువంటి

नीतिसन्मार्गविश्लेषिके = నీతి మరియు మంచి మార్గములనుండి దూరము చేయుదానా

**प**

पताकाः = పతాకములను /జెండాలను

पथिकः = బాటసారి

पदाब्जैः = తామరపూలవంటి పాదములచేత

पर्जन्यः = మేఘము

पलायितवान् = పారిపోయెను

पाण्यन्तरावासिके = చేతిలో నుండుదానా!

पारवश्योत्थवाचाल = ఒళ్ళు మరచుటచే పుట్టిన వాగుడుకాయా!

पिपीलिकायाः = చీమయొక్క

पिपीलनिर्मिता = చీమ చేత నిర్మించబడిన

SCERT TELANGANA

| | |
|---|---|
| पीडनैः | = బాధలచేత |
| पुष्करस्था | = తామర పువ్వులో ఉన్నటువంటి |
| पूतं | = పవిత్రమైన / శుద్ధమైన |
| पेयम् | = తాగదగినది |
| पैशुन्यम् | = ఇతరులను దూషించడం |
| प्रतिभासि | = అనిపించుచున్నావు |
| प्रतिहन्यमानाः | = కొట్టుమిట్టాడుతున్న |
| प्राङ्गणे | = ముందటి ప్రదేశము |
| प्राज्ञः | = విశేషమైన జ్ఞానం కలిగిన వాడు |
| प्राप्य | = పొంది |
| प्रायशः | = సాధారణముగా |

**ब**

| | |
|---|---|
| बहुतरी | = మిక్కిలి ఎక్కువైన |
| बालपादपैः | = చిన్నచిన్న మొక్కలతో |

**भ**

| | |
|---|---|
| भद्राणि | = శుభములు |
| भस्मीभूताः | = బూడిదైపోయినారు |
| भित्तिकायाम् | = గోడయందు |
| भुक्तिः | = జీవనాధారము |
| भूतले | = భూమి యందు |
| भूतानि | = ప్రాణులు / లను |
| भूरिशः | = ఎక్కువగా |
| भृत्यम् | = సేవకుని |

**म**

| | |
|---|---|
| मक्षिकायाः | = ఈగ యొక్క |
| मधुमक्षिका | = తేనెటీగ |
| मनुजसम्पर्कसंवर्धिके | = మానవులమధ్య సంబంధములను పెంపొందించుదానా! |
| मण्डूकाः | = కప్పలు |
| मर्त्यमर्त्यान्तराबद्ध | = మానవుల మధ్యలో పెనవేసుకున్న |
| मलीमसैः | = మాసినవస్తువులచేత / మలినములైన వాటితో |
| मस्तकम् | = తల |
| महारणम् | = గొప్పయుద్ధమును |
| महोग्रम् | = మిక్కిలి భయంకరమైన |
| महोदधिम् | = సముద్రాన్ని |
| मा | = వద్దు |
| मारुतस्य | = గాలియొక్క |
| मिलित्वा | = కలిసి |
| मीनगणाः | = చేపల సమూహాలు |
| मुकुलितहस्तः | = ముడుచుకున్న చేతులు కలవాడై |
| मुक्तिः | = మోక్షము |
| मूर्ध्नि | = శిరస్సునందు |
| मृत्तिका | = మట్టి |
| मोदकैः | = లడ్డుల చేత |

SCERT TELANGANA

### र

रजः = ధూళి
रंहः = వేగము
रथ्याः = వీధి యొక్క
राजतपञ्जरस्थः = వెండితో తయారు చేసిన పంజరంలో ఉన్న
रूढः = నిశ్చితమైన (పరంపరగా వచ్చుచున్న)
रोपणस्य = మొలకెత్తించుటకు

### ल

लक्ष्मीः = లక్ష్మీదేవి / శోభ

### व

वन्द्याः = నమస్కరింపదగినవారు
वन्यद्विपेन = వనగజముతో
वार्तार्पणानन्दसन्दायिके = సమాచారములను అందించుటలో ఆనందమును కలిగించుదానా!
विकचं = వికసించిన దానినిగా
विचिकित्सायां = సంశయమందు
विद्युल्लता = మెరుపుతీగ
विधाय = చేసి
विपिनम् = అడవి
विमूढाः = మిక్కిలి మూర్ఖబుద్ధులు
विलयम् = వినాశనమును
विलुप्तः = లోపించినది
विलुप्य = లోపించి
विवस्वान् = సూర్యుడు
विश्वद! = విశ్వాన్ని ఇచ్చిన భగవంతుడా!
विहाय = విడిచి / వదలిపెట్టి
विहिताभियोगाः = మనసుపెట్టిన వారు/ నిత్యసంబంధము కలవారు
वृषं = ఎద్దును
वृष्टिसर्पस्य = వానపాముయొక్క
वेम = తెలివైనవాడా!
वैमुख्यवैफल्यसंसूचिके= విముఖత, విఫలమగుటలను సూచించుదానా!
वोढुम् = మోయుటకు / ఓర్చుటకు
व्यापारितः = నియమించబడిన

### श

शशाङ्कः = చంద్రుడు
शासकाः = ప్రభువులు
शिक्षाम् = విద్యను
शिलातलम् = బండపైన
शिलोच्चये = పర్వతముపై
शिष्यश्रेयोऽभिवर्धकः = విద్యార్థుల శ్రేయస్సును అభివృద్ధిచేసేవాడు
शीतांशुः = చంద్రుడు
शुभवाग्बुद्धिः = మంగళకరమైన మాట మరియు బుద్ధి కలవాడు
श्मश्रूणाम् = గడ్డముల యొక్క
श्लाघनीयः = కీర్తించదగినది
श्यामलम् = శ్యామ(నల్లని) వర్ణంతో కూడిన

SCERT TELANGANA

## स

| | | |
|---|---|---|
| सकातरं | = | పిరికితో కూడిన |
| सत्त्वगुणोपेतः | = | సాత్త్విక గుణముతో కూడిన వాడు |
| सद्ग्रन्थवेत्ता | = | మంచి గ్రంథములు తెలిసిన వాడు |
| सन्दूषणोत्पादिके | = | నిందలను పుట్టించుదానా! |
| सप्तार्णवा | = | ఏడు సముద్రాలచేత చుట్టబడిన |
| समयोचितभाषणः | = | సమయానికి తగిన విధంగా మాట్లాడేవాడు |
| समस्तसंसाधनानि | = | అన్ని విధములైన వనరులు |
| सम्भूताः | = | జరిగినటువంటి / అయినటువంటి |
| समासाद्य | = | పొంది |
| सरीसृपस्य | = | ప్రాకే జంతువు యొక్క |
| सस्यबीजानि | = | పంటగింజలు / ధాన్యపుగింజలు |
| सान्त्वयन् | = | ఊరడించుచున్నవాడై |
| सुधाप्रदायिनी | = | అమృతానిచ్చే |
| सुराः | = | దేవతలు |
| सुवेषः | = | మంచివేషము కలవాడు |
| सोत्साहम् | = | ఉత్సాహముతో |
| सौम्यः | = | మృదువైన స్వభావం కలవాడు |
| स्वदायित्वम् | = | తన బాధ్యతను |
| स्फुरद्रूपी | = | ప్రకాశించేరూపం కలవాడై |
| समालोक्य | = | చక్కగా చూసి |
| स्वर्गङ्गायाः | = | స్వర్గంలోని గంగాదేవి యొక్క |

## ह

| | | |
|---|---|---|
| हरिणमहिषादयः | = | జింక , దున్న మొదలైనవి |
| हातुम् | = | విడిచిపెట్టుటకు |
| हित्वा | = | వదలిపెట్టి |

* * *



SCERT TELANGANA

# क्रियापदकोशः

## अ

| | | |
|---|---|---|
| अकथयत् | = | చెప్పెను |
| अकारयत् | = | చేయించెను |
| अगणयत् | = | లెక్కించెను |
| अङ्ग्यकरोत् | = | అంగీకరించెను |
| अत्यजत् | = | వదిలిపెట్టెను |
| अत्यजन् | = | వదిలిపెట్టిరి |
| अदात् | = | ఇచ్చెను |
| अधावन् | = | పరుగెత్తిరి |
| अन्वभवत् | = | అనుభవించెను |
| अपठम् | = | చదివాను |
| अपूरयत् | = | పూరించాడు / నింపెను |
| अबाधत | = | బాధించెను |
| अबोधयत् | = | బోధించెను |
| अभ्यनन्दत् | = | అభినందించెను |
| अयाचत | = | కోరెను / అడిగెను |
| अरचयत् | = | రచించెను |
| अवागच्छत् | = | అర్థం చేసుకొనెను |
| अवादीत् | = | చెప్పెను |
| अवेहि | = | రక్షించు / కాపాడు |
| अवोचत् | = | పలికెను |
| अश्रावयन् | = | వినిపించారు |

## आ

| | | |
|---|---|---|
| आक्रमामः | = | ఆక్రమించుచున్నాము |
| आगच्छत् | = | వచ్చెను |
| आचरत् | = | ఆచరించెను |
| आनीयताम् | = | తీసుకురండి |
| आप्नुहि | = | పొందు |
| आयोजयन्ति | = | నిర్వహించుచున్నారు |
| आराधय | = | పూజించు |
| आरभन्त | = | మొదలుపెట్టారు |
| आविवेश | = | ప్రవేశించెను |
| आसन् | = | ఉండిరి |
| आस्ताम् | = | ఇద్దరు ఉండిరి |
| आहुः | = | పలికిరి |

## उ

| | | |
|---|---|---|
| उत्तोलयामः | = | ఎగురవేయుచున్నాము |
| उपयुङ्क्ते | = | ఉపయోగించుచున్నాడు/ది |
| उपयुञ्ज्महे | = | ఉపయోగించుచున్నాము |
| उवाच | = | పలికెను |

## क

| | | |
|---|---|---|
| क्षिणोति | = | హింసించుచున్నది |

## च

| | | |
|---|---|---|
| चचार | = | చరించెను / నడిచెను |

## ज

| | | |
|---|---|---|
| जगाम | = | వెళ్ళెను |
| जघान | = | చంపెను |
| जीवेयम् | = | జీవిస్తాను |
| ज्ञास्यामः | = | తెలుసుకోగలము |

SCERT TELANGANA

**त**

तिरश्चकार = తిరస్కరించెను
त्यक्ष्यामि = వదిలిపెట్టగలను
त्रायते = రక్షిస్తున్నాడు / ది

**न**

निधीयताम् = ఉంచుము
निरगच्छत् = వెళ్ళెను
निरगात् = వెళ్ళెను
निहन्ति = నశింపజేయుచున్నాడు
न्यक्षिपत् = పడవేసెను
न्ययोजयत् = ఏర్పాటు చేసెను
न्यरूपयत् = నిరూపించెను
न्यवारयत् = నివారించెను
न्यवेदयत् = నివేదించెను

**प**

परिवर्तयामः = మార్చుచున్నాము
पश्यत = చూడండి
पश्याम = చూస్తాము
पारयामि = చేయుటకు సమర్థుడనై ఉన్నాను
पालयति स्म = పరిపాలించుచుండెడివాడు
पुष्णाति = వృద్ధిచెందుచున్నాడు / ది
प्राकटयत् = ప్రకటించెను
प्राचलत् = జరిగెను
प्रतिभासि = ప్రకాశిస్తున్నావు
प्रदीयताम् = ఇచ్చుగాక
प्रयतामहे = ప్రయత్నం చేయుచున్నాము
प्राप्नुयुः = పొందుదురు
प्राबोधयत् = ప్రబోధించెను/మేలుకొల్పెను
प्रायतत = ప్రయత్నించెను
प्रैषयत् = పంపెను

**ब**

बभ्राज = ప్రకాశించెను
बाधते = బాధించుచున్నది

**भ**

भवेम = ఉందాము / అవుదాము
भवेयुः = అగుదురు / ఉండాలి
भाति = ప్రకాశించుచున్నాడు / ది

**द**

ददर्श = చూచెను

**म**

मूर्छति = మూర్ఛపొందుచున్నాడు/ది
म्रियते = మరణిస్తున్నాడు / ది

**र**

रराज = ప్రకాశించెను

**ल**

लसन्तु = ప్రకాశించండి / ప్రకాశించాలి

**व**

वञ्चयामि = మోసగిస్తున్నాను
वदेम = చెప్తాము
विजह्यात् = వదిలి పెట్టాలి
विन्दति = పొందుచున్నాడు / ది
विन्दते = పొందుచున్నాడు / ది
विभाति = ప్రకాశించుచున్నాడు / ది

SCERT TELANGANA

विरराज = విరాజిల్లెను

विलसतु = ప్రకాశించుగాక !

वृणीष्व = వరించు / వరం కోరుకో

व्यजानात् = తెలిసికొనెను

व्यभूषयत् = అలంకరించెను

व्याप्नोत् = వ్యాపించెను

**श**

शुशोच = ఏడ్చెను / శోకించెను

श्रूयताम् = వినండి

श्रूयते = వినబడుచున్నది

**स**

समायोजयन् = నిర్వహించారు

समीयताम् = కలసి వెళ్ళండి

स्व्यकरोत् = స్వీకరించెను / తీసుకొనెను

**ह**

हीयताम् = విడిచిపెట్టండి

* * *



SCERT TELANGANA